पर्यावरणाध्ययनम्
आस-पास
चतुर्थकक्षायै पाठ्यपुस्तकम्



पर्यावरणाध्ययनम्

आस-पास इति

चतुर्थकक्ष्यायै पाठ्यपुस्तकम्

राष्ट्रीय-शैक्षिक-अनुसंधानम् एवञ्च प्रशिक्षण-परिषद्

NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING

दिसम्बरमासः 2014 इत्यस्मात् संस्करणात् अस्माभिः संस्कृतानुवादः कृतः ।

ISBN – 81 -7450-692-6

सर्वाधिकारेण सुरक्षितम्

- प्रकाशकस्य पूर्वानुमतिं विना अस्य कस्यापि भागस्य मुद्रणं तथा च इलेक्ट्रोनिक-यान्त्रिक-प्रतिलिपि-रिकार्डिंग-माध्यमेन अथवा अन्यपुनः-प्रयोगविधिना संग्रहणं प्रसारणं च वर्जितम् अस्ति ।
- अस्य पुस्तकस्य विक्रयणम् अनेन पणेन कृतम् अस्ति यत् प्रकाशकस्य पूर्वानुमतिं विना सावरणम् एतत् पुस्तकम् ऋणेन, पुनर्विक्रयणेन अथवा आभाटकेन न प्रदास्यते, न च विक्रेष्यते ।
- अस्य प्रकाशनस्य यथार्थमूल्यम् अस्मिन् पृष्ठे मुद्रितम् अस्ति । निर्यास-मुद्रया अथवा संश्लिष्ट-पत्रखण्डेन अन्यविधिना च अङ्कितं मूल्यम् अयथार्थम् अस्ति ।

एन. सी. ई. आर. टी. इत्यस्य प्रकाशनप्रभागस्य कार्यालयाः
एन.सी.आर.टी.ई.कैंपस श्री-अरविन्दमार्गः
नवदेहली 110016 दूरभाषः 011 – 26562708

108, 100 फीटमार्गः
हेली-एक्सटेंशन-होस्डेकेरे बनीशंकरी इस्टेज
बेंगलुरुः 560085 दूरभाषः 080 26725740

नवजीवनम्, ट्रस्टभवनम्
पत्रालयः नवजीवन
अहमदाबादः 380014 दूरभाषः 079 – 27541446

सी.डब्ल्यू.सी. कैंपससमीपम् धनकलबसस्थानकम् पनिहटी
कोलकाता 700114 दूरभाषः 033 – 25530454

सी.डब्ल्यू.सी. कॉम्प्लैक्स मालीग्रामः
गुवाहाटी 781021 दूरभाषः 0361 - 2674869

प्रकाशनसहयोगः

अध्यक्षः प्रकाशनप्रभागः - एन. के. गुप्ता
मुख्य-उत्पादन-अधिकारी - कल्याण-बनर्जी
मुख्यसंपादकः - श्वेता-उप्पलः
मुख्य-व्यापार-अधिकारी - गौतमगांगुली
उत्पादनसहायकः - सुनीलकुमारः

आवरणम्, चित्राणि तथा सज्जता

श्वेतारावः

चित्रांकनम्

जोयलगिलः आलोकहरिः अरूपगुप्ता, मनीषराजः दीपाबलसावरः, पर्यावरणशिक्षाकेन्द्रम्, अहमदाबादः अवेही-अबेकस-प्रोजेक्ट-मुंबई

आमुखम्

राष्ट्रियपाठ्यचर्यायाः रूपरेखा (2005) परामृशति यत् बालकानां विद्यालयस्य जीवनं समाजस्य जीवनेन सह योजनीयम् । अयं सिद्धान्तः पुस्तकीयज्ञानस्य तस्मात् न्यासात् विपरीतः अस्ति, यस्य प्रभावेण अस्माकं व्यवस्था अधुना यावत् विद्यालयस्य गृहस्य च मध्ये अन्तरालं स्थापयति । नूतानायां राष्ट्रियपाठ्यचर्यायाम् आधारितः पाठ्यक्रमः पाठ्यपुस्तकानि च तस्य एव विचारस्य, आचरणस्य प्रयासः अस्ति । अस्मिन् प्रयासे, प्रत्येकं विषयस्य रूढवादैः विचारैः आक्रमणस्य, सूचनानां रटनस्य च प्रवृत्तेः विरोधः अस्ति । आशा अस्ति यत् वयम् एतेन प्रयासेन राष्ट्रिय-शिक्षा-नीतौ(1986) वर्णितायाः बाल-केन्द्रित-व्यवस्थायाः दिशायाम् उन्नतिं कुर्मः।

यदि विद्यालयानां प्राचार्याः अध्यापकाः च बालकेभ्यः कल्पनाशीलानां गतिविधीनाम् आधारेण प्रश्नानां च आधारेण ज्ञाने, ज्ञानस्य समये च ये अनुभवाः भवन्ति, तेषां विषये विचारकरणस्य अवसरं ददति, तदा एव अस्माकम् अयं प्रयासः सफलः भविष्यति । एतत् अस्माभिः मन्तव्यं यत् बालकेभ्यः यदि स्थानं, समयः, स्वतन्त्रता च दातव्या, तदा बालकाः ज्येष्ठैः प्रदत्तया सामग्र्या सह संयुज्य, अवगम्य च नव्यज्ञानं सृजन्ति । शिक्षायाः विविधानां साधनानां स्रोतसां च अवहेलनायाः प्रमुखं कारणं, पाठ्यपुस्तकम् एव परीक्षायाः एकमात्रम् आधारस्वीकरणस्य प्रवृत्तिः अस्ति । सृजनात्मकतायाः प्राथमिकतायाः च विकासाय आवश्यकम् अस्ति यत् अस्माभिः बालकाः शिक्षणस्य प्रक्रियायां पूर्णभागिनः मन्तव्याः निर्मातव्याः च । अस्माभिः ते केवलं निश्चितस्य ज्ञानस्य ग्राहकाः एव न मान्याः ।

विद्यालयस्य दैनन्दिनजीवने कार्यशैल्यां च बहूनि परिवर्तनानि कृत्वा एतानि उद्देश्यानि सिद्ध्यन्ति । दैनिक-समय-सारिण्याम् अवनमनं तथा एव आवश्यकम् अस्ति, यथा वार्षिक-समय-सारण्याः आचरणे जागरूकता आवश्यकी अस्ति, येन शिक्षणाय निश्चितानां दिनानां सदुपयोगः भवेत् । शिक्षणस्य मूल्याङ्कनस्य च विधिभिः अपि एतत् निश्चीयते यत् एतत् पाठ्यपुस्तकं विद्यालये बालकानां जीवनं, मस्तिष्के भारस्य, क्लेशस्य च अपेक्षया प्रसन्नतायाः उत्पादने कियत् प्रभावयुक्तं सिद्ध्यति । मानसिकभारस्य समस्यायाः निवारणार्थं पाठ्यक्रमस्य निर्मातारः, विभिन्नचरणेषु ज्ञानस्य पुनर्निर्धारणस्य समये बालकानां मनोविज्ञानाय अध्यापनाय च उपलब्धस्य समयस्य सदुपयोगाय, पूर्वापेक्षया अधिकं प्रयासं कृतवन्तः । एतत् पाठ्यपुस्तकं बालकान् विचाराय प्रेरयति । बालकानां विस्मयं वर्धयति । लघुसमूहैः वार्तालापकरणे, ज्ञानवर्धनाय वाद-विवादकरणे, क्रियात्मकेषु गतिविधिषु च अस्य पुस्तकस्य प्राथमिकता अस्ति ।

एन.सी.ई.आर.टी. इति इयं संस्था, अस्य पुस्तकस्य रचनार्थं, निर्मितायाः पाठ्यपुस्तक-निर्माणसमितेः परिश्रमाय तस्यै कृतज्ञतां ज्ञापयति । इयं परिषद्, अस्याः समितेः कार्येषु मार्गदर्शनाय प्राथमिक-पाठ्यपुस्तक-समितेः परामर्शदातृ-समूहस्य अध्यक्षा, अनीता रामपालः, आचार्या, सी. आई. ई., दिल्लीविश्वविद्यालयः दिल्ली, मुख्यपरामर्शदात्री डॉ. सावित्री सिंहः, प्राचार्या, आचार्यः नरेन्द्रदेवः कॉलेज, दिल्लीविश्वविद्यालयः दिल्ली, सह-मुख्य-परामर्शदाता, प्रवाचकः जामिया-मिल्लिया-इस्लामिया-विश्वविद्यालयः दिल्ली इत्येतेभ्यः विशेषरूपेण कृतज्ञतां ज्ञापयति । अस्य पुस्तकस्य विकासाय अनेके शिक्षकाः

योगदानं दत्तवन्तः । एतदर्थं वयं तेषां प्राचार्याणां कृतज्ञाः स्मः। वयं तेभ्यः सर्वासां संस्थानां, सर्वेषां सङ्गठनानां च कृतज्ञाः स्मः, ये अस्मान् स्वकीयैः संसाधनैः, सामग्रीभिः, सहयोगीभिः च उपकृतवन्तः । वयं माध्यमिकः एवं उच्चशिक्षाविभागः, मानव-संसाधन-विकासमन्त्रालयस्य पक्षतः आचार्या मृणालमीरी, आचार्यः जे.पी.देशपाण्डे च इत्येतयोः अध्यक्षतायां गठितायाः निरीक्षणसमितेः सदस्येभ्यः अमूल्यपरामर्शदानाय कृतज्ञतां ज्ञापयामः । व्यवस्थागत-परिमार्जनाय स्वप्रकाशनेषु च प्रतिदिनं नव्यमार्जनाय समर्पिता एन.सी.ई.आर.टी. इति संस्था, टिप्पणीः परामर्शान् च स्वागतीकरोति, येन अग्रिमसंशोधनेषु साहाय्यं प्राप्येत।

नवदेहली
20 नवम्बरः 2006

निदेशकः
राष्ट्रिय-शैक्षिकानुसन्धानम् एवञ्च प्रशिक्षण-परिषद्

शिक्षकेभ्यः अभिभावकेभ्यः च शब्दद्वयम्

राष्ट्रियपाठ्यचर्यायाः रूपरेखायां कथितानाम् उद्देश्यानां, कस्मिंश्चित् राष्ट्रियस्तरस्य पर्यावरणाध्ययनस्य पाठ्यपुस्तके प्रस्तुतीकरणम्, वस्तुतः लेखकमण्डलाय अपि सरलं कार्यं न आसीत् । लेखकगणः स्वानुभवान् विशेषतथ्यान् च सर्वान् वदिष्यति ।

अस्मिन् वयसि बालकाः स्वपरिवेशं खण्डेषु न पश्यन्ति, अपितु समग्ररूपेषु पश्यन्ति । बालकाः परिवेशस्य कञ्चित् अपि विषयं विज्ञानस्य सामाजिकाध्ययनस्य च रूपे न पश्यन्ति । अतः अत्र एतत् आवश्यकं अस्ति यत् अस्मिन् पुस्तके बालकानां परिवेशस्य प्राकृतिकाः सामाजिकाः च घटकाः समग्ररूपे प्रस्तोतव्याः। पर्यावरणाध्ययनस्य पाठ्यक्रमे अपि पृथक् पृथक् विषयाणां सूची अत्र न गृहीता, अपितु तादृशाः उपविषयाः स्वीकृताः, ये बालकानां जीवनस्य समीपं भवेयुः । अस्मिन् पाठ्यपुस्तके अस्माकं प्रयासः अस्ति यत् प्रत्येकम् उपविषयेण सह युक्ताः प्राकृतिकाः, सामाजिकाः, सांस्कृतिकाः च पक्षाः सूक्ष्मरूपेण स्पष्टाः स्युः, येन बालकाः तत्र सम्यग्रूपेण विचारं कर्तुं शक्नुयुः ।

राष्ट्रियस्तरे कक्षायाः बहुसांस्कृतिकस्वरूपस्य प्रतिबिम्बीकरणं वस्तुतः कठिनं कार्यम् आसीत् । अत्र पुस्तके एतत् आवश्यकं यत् सर्वविधेभ्यः बालकेभ्यः महत्त्वम् अवसरं च दीयेत - प्रत्येकं बालकस्य समाजः संस्कृतिः निवासः वेशभूषा इत्यादयः सर्वे अपि पक्षाः महत्त्वपूर्णाः सन्ति । पाठ्यपुस्तकस्य लेखनसमये अस्माकं समक्षम् अयं प्रश्नः आसीत् यत् वयं कान् बालकान् सम्बोधयन्तः स्म ? किम् एते कस्यचित् महानगरस्य प्रसिद्धविद्यालयस्य बालकाः सन्ति, कस्मिंश्चित् मलिने कुटीरे स्थितविद्यालयस्य वा? कस्यचित् ग्रामीणविद्यालयस्य वा ? दूरे स्थितस्य कस्यचित् पर्वतीयस्य विद्यालयस्य वा ? कथं पाठ्यपुस्तके एतावत्यः विविधताः समाहिताः कर्तव्याः? लिङ्गम्, वर्गः, संस्कृतिः, धर्मः, भाषा, भौगोलिकस्थितिः इत्यादयः कथं समाहिताः कार्याः। व्यक्तिषु याः भिन्नताः ताः प्रति कथं बालकान् संवेदनशीलान् क्रियेत ? – एते केचित् प्रमुखाः बिन्दवः आसन्, ये अस्माभिः पाठ्यपुस्तके समाहिताः कृताः । एतानि तथ्यानि शिक्षकैः अपि स्वकुशलतया आचरणीयाः ।

अस्य विषयस्य बिन्दूनां वार्तालापात् पूर्वम् अस्य विषयस्य पाठ्यक्रमः पठितव्यः । अस्य विषयस्य पाठ्यक्रमः षट्सु (6) बिन्दुषु विभक्तः अस्ति- 1.कुटुम्बः मित्राणि च 2. भोजनम् 3. जलम् 4. आवासः 5. यात्रा तथा च 6. वयं वस्तूनि कथं निर्मामः । अयं पाठ्यक्रमः एन.सी.ई.आर.टी. इति संस्थायाः जालपुटे www.ncert.nic.in इत्यत्र अपि उपलब्धः अस्ति । शिक्षकाः पाठ्यक्रमं पठित्वा एव पाठयिष्यन्ति चेत् तदा सम्यक्तया पाठने सक्षमाः भविष्यन्ति ।

अस्मिन् पुस्तके विषयवस्तु बालकेन्द्रितम् अस्ति । अनेन बालकाः स्वयम् अन्विष्य तथ्यस्य ज्ञाने समर्थाः भवन्ति । अस्मिन् पाठ्यक्रमे अयं प्रयासः अस्ति यत् रटनस्य प्रवृत्तिः न्यूना भवेत् । अतः अत्र परिभाषाणां, वर्णनस्य, अमूर्तप्रत्ययानां च कृते स्थानं न दत्तम् अस्ति । पाठ्यपुस्तके सूचनाप्रदानं तु बहु सरलं कार्यम् अस्ति । किन्तु अस्माकं कर्तव्यम् अस्ति यत् बालकेभ्यः अवसरं प्रदीयेत, येन ते स्वविचाराणां प्रकटने समर्थाः स्युः, उत्सुकतां वर्धयेयुः, प्रयोगं कृत्वा ज्ञानं कुर्युः, प्रश्नं कुर्युः, ज्ञानस्य प्रयोगं च कुर्युः । बालकाः पाठ्यपुस्तकं रुचिपूर्वकं पठेयुः, एतदर्थं पाठानां प्रस्तुतीकरणं विविधैः उपायैः कृतम् अस्ति, यथा – कथाः, संवादाः, कविताः, प्रहेलिकाः, हास्यखण्डः, नाटकम्, क्रियाकलापाः इत्यादयः । बालकेषु संवेदनशीलतायाः विकासाय प्रायः कथानां प्रयोगः महत्त्वपूर्णः मतः, यतः कथायाः पात्रैः सह बालकाः आत्मानं सरलतया योजयन्ति । पुस्तके प्रयुक्ता भाषा अपि औपचारिकी भाषा न अस्ति, अपितु बालकानां व्यवहारस्य भाषा अस्ति ।

ज्ञानस्य सर्जनाय बालकानां क्रियात्मकरूपेण योगः अपि अत्र आवश्यकः अस्ति । पर्यावरणाध्ययनस्य शिक्षा कक्षां यावत् एव न अस्ति । पाठ्यपुस्तके निर्दिष्टैः क्रियाकलापैः बालकेषु अवलोकनस्य क्षमतायाः विकासाय तेषां प्राकृतिकपरिवेशेन, यथा - उद्यानम्, तडागः, प्रकृतिभ्रमणम् इत्यादीनाम् अनुभवैः सह योजनस्य आवश्यकता अस्ति । अनेन तेषु अवलोकनेन सह एव अन्येषाम् अपि कौशलानां विकासः भविष्यति । अस्मिन् पाठ्यपुस्तके बालकानां स्थानीयज्ञानस्य विद्यालयीयज्ञानेन सह योजनस्य प्रयासः अस्ति । एतत् ध्यातव्यम् अस्ति यत् पाठ्यपुस्तके निर्दिष्टाः क्रियाकलापाः केवलं परामर्शात्मकाः सन्ति । अत्र क्रियाः प्रश्नाः च पाठस्य अन्ते न सन्ति, अपितु पाठस्य अङ्गरूपेण एव स्वीकृताः सन्ति । अतः शिक्षकाः पुस्तके निर्दिष्टान् क्रियाकलापान् प्रयुक्तसामग्रीः च स्थानीयपरिवेशानुसारेण च परिवर्तयेयुः । अत्र पुस्तके विविधाः क्रियाकलापाः सन्ति ये बालकेभ्यः अवलोकनम्, अन्वेषणम्, वर्गीकरणम्, प्रयोगः, चित्रनिर्माणम्, वार्तालापः, भेदान्वेषणम्, लेखनम् इत्यादिकौशलानां शिक्षणस्य अवसरं दास्यन्ति । अस्मिन् पाठ्यपुस्तके बहवः तादृशाः क्रियाकलापाः सन्ति, यान् बालकाः स्वहस्ताभ्यां करिष्यन्ति, तेन बालकेषु क्रियात्मककौशलस्य विकासः भविष्यति । बालकेषु सर्जनात्मकतायाः विकासः, रचनात्मकतायाः कौशलस्य सौन्दर्यबोधस्य च अपि विकासः भविष्यति । क्रियाकलापानाम् अनन्तरं तस्मिन् विषये चर्चा बालकेभ्यः अवलोकनानां निष्कर्षप्राप्तौ सहायिका भविष्यति । अनेन सह एव उचितदिशायां चर्चाः परामर्शाः वा बालकस्य व्यक्तिगतरूपेण शिक्षणे अधिकाः सहायकाः भवितुं शक्यन्ते ।

पुस्तके एतत् अपि स्वीकार्यं भवति यत् बालकाः ज्ञानाय शिक्षकं पाठ्यपुस्तकं च अतिरिच्य अन्येषां स्रोतसाम् अपि सहायतां स्वीकुर्युः । यथा-कुटुम्बस्य सदस्याः, समुदायस्य जनाः, समाचारपत्राणि अन्यानि पुस्तकानि च । अनेन एतत् स्पष्टं भविष्यति यत् केवलं पाठ्यपुस्तकानि एव ज्ञानस्य स्रोतांसि न सन्ति । पुराकालस्य ज्ञानाय इतिहासाय वा बालकाः ज्येष्ठानां सहायतायाः ग्रहणाय प्रोत्साहिताः सन्ति । अनेन अभिभावकानां समाजस्य च विद्यालयेन सह योगः तु भविष्यति एव, सह एव शिक्षां प्रति तेषां योगदानम् अपि भविष्यति । शिक्षकाः अपि बालकानां कुटुम्बानां विषये ज्ञानस्य अवसरं प्राप्स्यन्ति ।

चित्राणि अस्य वयसः बालकानां कृते महत्त्वपूर्णानि भवन्ति । चित्राणां प्रकृतिः लिखितवार्तानां प्रकृतिं प्रतिबिम्बितं कुर्यात् इति अस्मिन् विषये लेखकैः विशेषम् अवधानं कृतम् । अस्मिन् पुस्तके चित्राणां माध्यमेन विषयवस्तुनः पाठनम् एतत् प्रमुखाधारत्वेन स्वीकृतम् अस्ति । चित्राणि लिखितकार्याणाम् अपि पूरकाणि स्युः, एवम् अत्र तेषां प्रयोगः कृतः । चित्रैः बालकाः प्रसन्नाः तु स्युः एव, तैः शिक्षिताः अपि स्युः ।

पाठ्यपुस्तके बालकेभ्यः कार्यकरणस्य विविधाः अवसराः प्रदत्ताः सन्ति, यथा - एकाकी भूत्वा, लघुसमूहे, दीर्घसमूहे वा कार्यकरणम् । समूहे कृतैः पारस्परिकैः क्रियाकलापैः बालकाः शीघ्रं शिक्षां प्राप्नुवन्ति, अनेन मिलित्वा कार्यकरणस्य क्षमता वर्धते । बालकाः शिल्पकलां चित्रकलां च समूहे कृत्वा प्रसन्नाः भवन्ति । यदा बालकानां रचनात्मकतायाः प्रशंसा क्रियते, तदा ते प्रसन्नाः भवन्ति, तत् प्रति प्रेरिताः च भवन्ति । अतः तेषां प्रशंसा कार्या, ते रचनात्मकतां प्रति निरुत्साहिताः न कर्तव्याः ।

पाठे प्रश्नानां क्रियाकलापानां च उद्देश्यं, सूचनानां ज्ञानस्य वा निरीक्षणं न अस्ति, अपितु बालकेभ्यः स्वविचाराणां प्रकटनस्य अवसरप्रदानम् अस्ति । एतेषां प्रश्नानां क्रियाकलापानां च करणार्थं बालकेभ्यः उचितः समयः दातव्यः, यतः प्रत्येकं बालकः स्वगत्याः अनुसारम् एव शिक्षते । अध्यापकः बालकानाम् आवश्यकतानुसारं, पाठनस्य शैलीं, स्थानीयस्थितेः अनुसारं च स्वमूल्याङ्कनस्य शैलीं स्वयम् एव निर्धारयेत् । मूल्याङ्कनं सम्यक्तया अवगन्तुम् एन.सी.ई.आर.टी. इति संस्थायाः अस्मिन् विषये अपि पुस्तकम् अस्ति । तत् अपि अवश्यं पठनीयम् । बालकैः कक्षासु कक्षातः बहिः वा कृतानां क्रियाणाम् आधारेण एव तेषां मूल्याङ्कनं कर्तव्यम् । मूल्याङ्कनम् एका सततप्रक्रिया अस्ति । अतः अवलोकने, प्रश्नकरणे, चित्रनिर्माणे, समूहचर्चायाम् इत्यादीनाम् अवसरे मूल्याङ्नम् आवश्यकम् अस्ति। अतः प्रत्येकं पाठे क्रियाकलापाः प्रश्नाः च पाठे एव सन्ति, न तु पाठस्य अन्ते । ते क्रमेण एव कार्याः ।



पाठ्यपुस्तकस्य विकासे लेखकमण्डलस्य समक्षम् अयं प्रमुखः बिन्दुः आसीत् यत् समाजे याः भिन्नताः ताः प्रति बालकानां संवेदनशीलतां वर्धयेत् । अस्माकं शारीरिकक्षमतानां कारणेन याः भिन्नताः, आर्थिकस्थितीनां कारणेन याः भिन्नताः, व्यवहारस्य कारणेन च याः भिन्नताः, ताः अत्र ग्रहीतुं शक्यन्ते । एते सर्वे भेदाः अस्माकम् आवासे, वेशभूषायां भौतिकसुविधानाम् उपलब्धतासु च परिलक्षिताः भवन्ति । प्रत्येकं बालकाय बोधं कारयेत् यत् कस्मिंश्चित् अपि समाजे भिन्नता स्वाभाविकी भवति । एतासां भिन्नतानां प्रशंसा सम्मानं च कार्यम् । शिक्षकैः एतानि तथ्यानि विशेषेण ध्यातव्यानि, येन सामाजिकविषयाणां संवेदनशीलतापूर्वकं पाठने सरलता भवेत् । विशेषतया तदा एतत् ध्येयम् अस्ति यदा कक्षायां विशेष-आवश्यकता-समूहस्य पीडितपरिवेशात् आगताः च बालकाः भवेयुः ।

एतत् पुस्तकं कांश्चित् अन्यान् अपि बिन्दून् अस्माकं समक्षं स्थापयति । अस्मिन् अध्याये प्रदत्ताः केचित् अध्यायाः वर्तमानस्य जीवनस्य उदाहरणेषु आधारिताः सन्ति । एतेषु अध्यायेषु सत्यघटनाभिः सह सम्बन्धिताः कथाः सन्ति, तासां घटनानां पात्राणां वा प्रतिबिम्बः अस्ति, यतः जीवनं स्वयम् एव ज्ञानसर्जनस्य शिक्षणस्य च प्रमुखं स्रोतः अस्ति । सह एव वास्तविकजीवनेन सह सम्बन्धिताः एताः घटनाः अस्मान् प्रेरयन्ति अपि । एताः घटनाः अस्माकं समक्षम् एकं विशिष्टं रोचकपूर्णं सन्दर्भम् अपि प्रस्तुतं कुर्वन्ति । एवं च अस्माकं कृते पूर्वेषु अनुभवेषु पुनः विचारं कर्तुम् अवसरम् अपि प्रददति ।

जीवनेन सह युक्ताः एताः कथाः जनानां सफलताभिः उपलब्धिभिः विचलितेन व्यवहारेण च सह सम्बद्धाः सन्ति । एतान् दृष्टान्तान् वयं तेषां जनानां जीवनानां स्वीकृतवन्तः, यान् अल्पाः एव जनाः जानन्ति । वयम् अत्र प्रसिद्धानां जनानां जीवनेन सह सम्बद्धानि उदाहरणानि न स्वीकृतवन्तः । यतः एतत् अनुभूयते यत् सामान्यजनानां जीवनं बालकेभ्यः अधिकां प्रेरणां दातुं शक्नोति, पाठकस्य विषयस्य च मध्ये दूरतां न्यूनं करिष्यति । अत्र अस्माकम् आशा अस्ति यत् एतासां घटनानां पाठांशानां वा पठनानन्तरं बालकाः तेन सह सर्जनात्मकरूपेण युक्ताः भविष्यन्ति, न तु रुचिं विना पठिष्यन्ति । वयं क्रियाकलापेन चर्चया च प्रत्येकं पाठे तादृशान् अवसरान् कल्पितवन्तः । एतत् विशेषेण ध्येयं यत् एतत् सङ्कलनं चयनं च त्वरित-आहारः इव न द्रष्टव्यम् । कश्चित् अपि लेखः सः सकारात्मकः नकारात्मकः वा, तत् अत्र विना विचार्य प्रतिस्पर्धायाः द्रष्ट्या, तिरस्कारस्य द्रष्ट्या, तत् अस्वीकर्तुं वा न लिखितः ।

एषा आशा क्रियते यत् बालकाः वयस्काः च समानरूपेण स्वकीयैः विशिष्टैः अनुभवैः, जीवनमूल्यैः, विश्लेषणस्य कौशलैः च अस्य समालोचनां करिष्यन्ति । इयं प्रक्रिया शिक्षणं, तस्य क्षमतां च समृद्धं करिष्यति, बालकेभ्यः च जीवनस्य सम्बन्धे विचारं कर्तुं नव्याः दिशाः प्रदास्यति ।

लेखकगणः न केवलं बालकानाम् एव विषये विचार्य एतत् पुस्तकं रचितवान्, अपितु शिक्षकान् अपि तस्मिन् रूपे दृष्टवान् ये ज्ञानस्य सर्जनं कुर्वन्ति, स्वकीयान् अनुभवान् च वर्धयन्ति । अतः एतत् पुस्तकं शिक्षणस्य सामग्रीरूपेण द्रष्टव्यम् । एतत् परितः शिक्षकाः पठनस्य पाठनस्य च क्रियां सङ्घठितां कुर्युः, येन बालकाः शिक्षणस्य अवसरान् प्राप्नुयुः ।

****

एस-अमालजेरी अर्थपुथराजः दशवर्षीयः
सेंट-पैट्रिक-मॉडर्न-उच्चमाध्यमिक-विद्यालयः पुदुच्चेरी

पाठ्यपुस्तकनिर्माणसमितिः

अध्यक्षा प्राथमिक-पाठ्यपुस्तक-परामर्शदातृ-समितिः

अनीतारामपालः आचार्या, शिक्षाविभागः (सी.आई.ई.) दिल्लीविश्वविद्यालयः दिल्ली

मुख्यपरामर्शदात्री

सावित्रीसिंहः प्राचार्या, आचार्यनरेन्द्रदेवविद्यालयः दिल्लीविश्वविद्यालयः दिल्ली

सहमुख्यपरामर्शदाता

फ़राहफ़ारूकी प्रवाचिका जामिया-मिल्लिया-इस्लामियाविश्वविद्यालयः देहली

सदस्याः

लतिकागुप्ता (परामर्शदात्री) सर्व-शिक्षा-अभियानम्, प्रारम्भिकशिक्षाविभागः
एन.सी.ई.आर.टी. नवदेहली
ममतापंड्या, कार्यक्रमनिदेशिका पर्यावरणशिक्षाकेन्द्रम् अहमदाबादः
पूनममोंगिया सहायिका अध्यापिका सर्वोदयकन्याविद्यालयः विकासपुरी नवदेहली
रीना-आहूजा कार्यक्रमनिदेशिका राष्ट्रिय-शिक्षा-ग्रुपफायरः गौतमनगरः नवदेहली
संगीता-अरोड़ा प्राथमिक-अध्यापिका केन्द्रीयविद्यालयः शालीमारबागः देहली
सिमंतिनीधुरू निदेशिका अवेही-अबेकसपरियोजना मुम्बई महाराष्ट्रम्
स्वातिवर्मा अध्यापिका दि-हेरीटेजविद्यालयः सेक्टर-23 रोहिणीदेहली

संस्कृत-अनुवादकः

श्रीहिमांशुजी (संस्कृतसंवर्धनप्रतिष्ठानम्, दिल्ली)

सदस्या एवं समन्वयिका

मञ्जुजैनः आचार्या प्रारम्भिक-शिक्षा-विभागः एन.सी.ई.आर.टी. नवदेहली

आभारः

राष्ट्रिय-शैक्षिक-अनुसन्धानम् एवञ्च प्रशिक्षणपरिषत् इति संस्था - लीसाहैडलोफ़ (लेखिका) आगच्छतु विद्यालयं चलेम इति पाठाय (अध्यायः 1 गोइंग टू स्कूल इन इण्डिया इति पुस्तकात्) बालकानां लेखन्या (अध्यायः 1- एकलव्यात् प्रकाशितेन चकमकेन), अनीतायाः मधुमक्षिकाः इति पाठाय गोइंग टू स्कूल, यूनीसेफ इत्यनेन सहायताप्राप्तसंस्था, (अध्यायः-5, अनीतायाः विषयाध्ययने आधारितम्) चूँ-चूँ कुर्वती आगता चटका (अध्यायः-16 गिजूभाईबधेकाकृतेन रुतु ना रंग इत्यस्मात्) इति अस्मै विमूबेनबधेका, दक्षिणामूर्तिः बालमन्दिरम्, जलं कुत्रचित् अधिकं कुत्रचित् न्यूनम् अति अस्मै पाठाय संस्था द कंसर्ड फॉर वर्किंग चिल्ड्रन, कर्नाटकम्, (अध्यायः-18, भीमासङ्घः, बालकानां ग्रामसभाविषयस्य अध्ययनेन) प्रयत्नः सफलः अभवत् (अध्यायः - 27, रूपान्तरिता कथा) इति अस्मै सुजाता पद्मनाभनः (लेखिका) मधुवन्ती अनन्तराजनः, मनीषाशेठगुटमैन (चित्रकारिणी) नाम्ग्याल इंस्टीट्यूट फॉर पीपल विद डिसेबिलिटी, लेहलद्दाख इति एतेभ्यः सर्वेभ्यः लेखकेभ्यः कविभ्यः संस्थाभ्यः च कृतज्ञतां ज्ञापयति ये अस्मिन् पुस्तके स्वरचनासामग्र्याः उपयोगाय अनुमतिं दत्तवन्तः ।

वयं पोचमपल्लीशाटिकाः इत्यस्मिन् विषये बालकानां निबन्धसङ्कलन-निमित्तम् आन्ध्रप्रदेशस्य ए.एस.ओ., एस.एस.ए., एस. विनायकाय, (अध्यायः-23) इति अस्य अनुवादाय च दिल्ली-विश्वविद्यालयस्य लेडीश्रीराममहाविद्यालयाय के.कल्याणी इत्यस्यै कृतज्ञतां ज्ञापयामः । वयम् अहमदाबादस्य पर्यावरण-शिक्षाकेन्द्राय, अवेही अबेकस मुम्बयी इत्यस्मै धन्यवादं ज्ञापयामः, याभ्यां स्वप्रकाशनात् रचनासामग्र्याः प्रयोगाय अनुमतिः प्रदत्ता, यस्याम् अस्य पुस्तकस्य केचन अध्यायाः आधारिताः सन्ति। विभिन्नानां सङ्घठनानां संस्थानां, तैः नियुक्तानां विशेषज्ञानां च योगदानम् अपि विशेषरूपेण प्रशंसनीयम् अस्ति । ते सन्ति – निदेशकः - पर्यावरण-शिक्षणकेन्द्रम् अहमदाबादः, निदेशकः अवेही अबेकस मुम्बयी, प्राचार्यः केन्द्रीयविद्यालयः, शालीमार बागदिल्ली, प्राचार्या सर्वोदयकन्याविद्यालयः विकासपुरी नवदेहली, प्रिन्सिपल द हेरीटेज स्कूल रोहिणी दिल्ली । चिकित्सिकायाः वहीदा प्रिज़्म इत्यस्याः साक्षात्कारकरणे (अध्यायः-26) निदेशकः जनरल, आर्म्ड फोर्स मेडिकल सर्विसिस, रक्षामन्त्रालयः (एम.ब्लॉक), नवदेहली इत्यस्य अपरिमितं साहाय्यं स्वीकृतम् । स्टेट निदेशकः), एस.एस.ए., उत्तरप्रदेश इत्यस्य निर्यासः (अध्यायः-11) आन्ध्रप्रदेशद्वारा च पोचमपल्लीशाटिकानां (अध्यायः-23) विषये रचनासामग्र्याः प्रदानाय तथा च (20 अध्याये) बीहू इति उत्सवस्य रचनासामग्री-प्रदानाय, 170 पृष्ठस्य चित्रस्य उपलब्धीकरणाय च केन्द्रिय-विद्यालयस्य, असमराज्यस्य अध्यापिकायै बुलबुल (धूलियाजन) इत्यस्यै वी.डी. शर्मा (नामरूप) इत्यस्यै च धन्यवादं ज्ञापयामः ।

वयम् एन.सी.ई.आर.टी. इति संस्थायाः प्रारम्भिक-शिक्षाविभागस्य प्राध्यापकाय विभागाध्यक्षाय च कृष्णकान्तवशिष्ठाय विशेषरूपेण कृतज्ञतां ज्ञापयामः । अयम् अस्य पुस्तकस्य विकासाय प्रत्येकं क्षेत्रे बहु योगदानं दत्तवान् । एन.सी.ई.आर.टी. इति संस्थायाः मुख्यसम्पादिकायै श्वेता-उप्पल इत्यस्यै अपि कृतज्ञतां ज्ञापयामः । इयं पुस्तकस्य सम्पादनकाले महत्त्वपूर्णान् परामर्शान् दत्तवती । प्रारम्भिकशिक्षाविभागस्य प्राध्यापकाय किरणदेवेन्द्राय, एन.सी.ई.आर.टी. इति संस्थायाः महिला-अध्ययनविभागस्य सुषमाजयरथः इत्यस्यै अपि धन्यवादं ज्ञापयामः । इयं लिङ्गभेदस्य विषये परामर्शान् दत्तवती। प्रारम्भिक-शिक्षाविभागस्य सङ्गणककक्षस्य प्रमुखः शाकम्भरदत्तः, डी.टी.पी. ऑपरेटर (सञ्चालकः) विजयकौशलः, प्रतिलेखसम्पादिका (कॉपी एडीटर) श्रेष्ठा वत्सः, परिष्कर्त्री शशिदेवी, प्रारम्भिकशिक्षाविभागस्य योगदानम् अपि प्रशंसनीयम् अस्ति । अस्य पुस्तकस्य प्रकाशनाय एन.सी.ई.आर.टी. इति संस्थायाः प्रकाशनविभागस्य उद्यमशीलः प्रयासः प्रशंसनीयः अस्ति।

****

विषयसूची

आमुखम्

शिक्षकाणाम् अभिभावकानां च कृते शब्दद्वयम् -

1. आगच्छन्तु, विद्यालयं चलेम 1
2. कर्णाः कर्णेषु 11
3. 'नन्दू' हस्तिः 21
4. अमृतायाः कथा 31
5. अनीतायाः मधुमक्षिकाः 38
6. ओमनायाः यात्रा 47
7. गवाक्षात् 53
8. मातामह्याः गृहं यावत् 60
9. परिवर्तमानाः कुटुम्बाः 66
10. हु तू तू, हु तू तू 77
11. पुष्पवाटी 84
12. कथं कथं परिवर्तितानि गृहाणि 96
13. पर्वतेभ्यः समुद्रं यावत् 106
14. वासुदेवस्य क्षेत्रम् 113
15. हट्टात् गृहं यावत् 119
16. चूं चूं कुर्वती आगता चटका 127



17. नन्दिता मुम्बय्याम् 137

18. जलं कुत्रचित् अधिकं कुत्रचित् अल्पम् 146

19. मूलानां जालम् 158

20. परस्परं मिलित्वा खादेम 166

21. भोजनम्, भोजयनं च 174

22. संसारः मम गृहे 179

23. पोचमपल्ली 186

24. दूरदेशस्य वार्ता 191

25. कौतूहलप्रहेलिकाः 199

26. सेनाचरी वहीदा 204

27. प्रयत्नः सफलः अभवत् 210



प्रथमः पाठः
आगच्छन्तु विद्यालयं चलेम

आगच्छन्तु, कैश्चित् बालकैः सह मिलामः पश्यामः च यत् एते बालकाः कथं विद्यालयं गच्छन्ति ।

वंशेन निर्मितः सेतुः

अस्माकं क्षेत्रे अत्यधिकी वृष्टिः भवति । कदाचित् तु परितः जानुपर्यन्तं जलं व्याप्तं भवति । तथापि वयं विद्यालयगमनात् न विरमामः । एकहस्तेन पुस्तकानि स्वीकुर्मः अपरहस्तेन च वंशकाष्ठं स्वीकुर्मः । वयं शीघ्रं शीघ्रं वंशरज्जुना निर्मितं सेतुं पारयामः ।

आगच्छन्तु कृत्वा पश्यामः

काश्चित् इष्टिकाः स्वीकुर्वन्तु । एताः इष्टिकाः कस्मिंश्चित् मुक्तस्थाने सरलपङ्क्तौ स्थापयन्तु, यथा चित्रे दर्शितम् अस्ति । अधुना इष्टिकानाम् उपरि चलनस्य प्रयासं कर्वन्तु । किम् एतत् सरलम् अनुभूतम् ?

स्वशिक्षकस्य सहायतया चतुर्णां पञ्चानां वा वंशकाष्ठानां बन्धनं कृत्वा लघुसेतुनिर्माणं कुर्वन्तु । तस्य उपरि चलन्तु । भवन्तः कथं अनुभूतवन्तः? पतितवन्तः वा ? वारं वारं चलिष्यन्ति चेत् सरलं भविष्यति ।

पादुके उपानहौ वा धृत्वा सेतौ चलनम् अधिकं सरलं भवति, नग्नपादाभ्यां वा ?

किमर्थम् ?

ट्रॉलीयानेन

विद्यालयगमनाय वयं प्रतिदिनं विशालां गभीरां च नदीं पारयामः। नद्याः पारं गच्छन्ती काचित् लौहस्य दृढा रज्जुः भवति । इयं रज्जुः उभयतः भारयुक्तपाषाणैः वृक्षैः वा सह दृढरूपेण बद्धा भवति । ट्रॉली (काष्ठेन निर्मितः हिन्दोलः) चक्रस्य सहाय्येन अस्यां रज्जौ सर्पणं करोति । वयं चत्वारः पञ्च वा बालकाः तस्मिन् ट्रॉलीयाने युगपत् तिष्ठामः नद्याः अपरं तटं च गच्छामः ।

कृत्वा पश्यतु -

प्रथमं द्वितीयं च चित्रं पश्यन्तु । बालकाः कूपात् जलपूर्णां द्रोणीं कर्षन्ति । उभयोः चित्रयोः कः भेदः ? वक्तुं शक्नुवन्ति किम् ? उभयोः केन उपायेन जलकर्षणं सरलम् अस्ति-चक्र्या, चक्रीं विना वा ?

1

अवलोकनं कुर्वन्तु । भवन्तः कुत्र-कुत्र चक्र्याः उपयोगं कुर्वन्ति ? सूचिनिर्माणं कुर्वन्तु ।

भवन्तः अपि काष्ठस्य अन्यस्य वस्तुनः वा चक्रीनिर्माणं कृत्वा तया इष्टिकादिकानां कर्षणस्य प्रयासं कुर्वन्तु ।



पाषाणचूर्णस्य सेतुः

वयम् अपि बहुवारं बहुषु स्थानेषु जलं पारयामः । तदा वयम् अपि सेतुमाध्यमेन गच्छामः । एते सेतवः वज्रचूर्णेन, इष्टिकाभिः, लोहखण्डैः च निर्मिताः सन्ति । पश्यतु सेतौ आरोहणाय अवरोहणाय च सोपानानि अपि सन्ति ।



- इमे सेतवः, वंशेन निर्मितसेतुभ्यः कथं भिन्नाः ?

  _____

- विचारं करोतु, अनेन सेतुना एकस्मिन् समये कति जनाः पारं गन्तुं शक्नुवन्ति ?

  _____

- भवान् अपश्यत् वा, कथं बालकाः पृथक्-पृथक् सेतुभिःविषममार्गान् नदीः च पारं कृत्वा विद्यालयं गच्छन्ति ।

  _____

- यदि भवते अवसरं मिलेत्, तदा भवान् केन सेतुना गमिष्यति ? किमर्थम् ?

  _____

- किं भवान् अपि विद्यालयं गन्तुं कम् अपि सेतुं पारयति ? सः सेतुः कीदृशः अस्ति ?

  _____

- स्वपितामहं पितामहीं च पृच्छतु यत् तयोः बाल्यकाले सेतवः कीदृशाः भवन्ति स्म इति ?

  _____

स्वस्य समीपस्थे क्षेत्रे कञ्चित् सेतुं लघुसेतुं वा पश्यतु, तस्य विषये कासाञ्चित् वार्तानां ज्ञानं करोतु-

- सः कुत्र स्थितः अस्ति-जले, राजमार्गे, पर्वतानां मध्ये कुत्रचित् अन्यस्मिन् स्थाने वा ?

  _____

- सेतुं के-के पारयन्ति ? केवलं मानवाः एव, पशवः यानानि अपि वा ।

  _____

- सः सेतुः प्राचीनः इव प्रतीतः भवति नवीनः वा ?

  _____

- ज्ञानं कुर्वन्तु, सः सेतुः कैः कैः पदार्थैः निर्मितः अस्ति ? तेषां पदार्थानां सूचिनिर्माणं करोतु ।

  _____

- उत्तरपुस्तिकायां तस्य सेतोः चित्रनिर्माणं करोतु । तस्य सेतोः उपरि गम्यमानानि यानानि, पशून्, मनुष्यान् च दर्शयतु ।

- विचारयतु, यदि सः सेतुः न भवेत् तदा काः-काः बाधाः भवेयुः ।
  कांश्चित् अन्यान् उपायान् पश्यतु, यैः बालकाः विद्यालयं गच्छन्ति ।

वल्लमः

केरलप्रदेशस्य केषुचित् भागेषु बालकाः नदीं पारयितुं वल्लमे (काष्ठेन निर्मिता काचित् लघु नौका) स्थित्वा विद्यालयं गच्छन्ति ।

- किं भवन्तः अन्यप्रकारस्य अपि नौकां दृष्टवन्तः ?
- जलं पारं कर्तुम् अन्ये के उपायाः भवितुं शक्नुवन्ति ?



वयं सिकताप्रदेशे निवसामः । अत्र दूरं यावत् सिकता एव सिकता दृश्यते । दिने तु सिकता तप्ता भवति । वयम् उष्ट्रयाने उपविश्य विद्यालयं गच्छामः ।

- किं भवन्तः अपि कदाचित् उष्ट्रशकटे अश्वशकटे वा उपविष्टवन्तः ? कुत्र? स्वयम् उपविष्टवन्तः केनचित् अन्येन वा ?

_____

_____

_____

- भवन्तः तस्मिन् शकटे उपविश्य कथम् अनुभूतवन्तः ? स्वस्य अनुभवं कक्षायां वदन्तु ।

वयं वृषभशकटे उपविश्य हरितक्षेत्रं गच्छन्तः विद्यालयं प्राप्नुमः । तीव्रातपे वृष्टौ वा वयं छत्रस्य उपयोगं कुर्मः ।

समतलप्रदेशस्य कश्चित् ग्रामः

अध्यापकाय-याने लग्नाः पशवः कथम् अनुभवन्ति ? पशून् प्रति संवेदनशीलतायाः विषये चर्चां करोतु ।

- किं भवतः नगरे ग्रामे वा अपि वृषभशकटानि भवन्ति ?

_____

- किं तस्मिन् शकटे छदिः भवति ?

_____

- तस्य चक्राणि कीदृशानि भवन्ति ?

_____

- उत्तरपुस्तिकायां वृषभशकटस्य चित्रनिर्माणं करोतु ।

_____

द्विचक्रिकायाम् आरोहणम्

वयं दीर्घमार्गेषु द्विचक्रिकया विद्यालयं गच्छामः । विद्यालयानां गृहात् दूरे स्थित्वात् पुरा तु बह्व्यः बालिकाः विद्यालयं न गच्छन्ति स्म, किन्तु अधुना सप्तानाम् अष्टानां वा बालिकानां समूहः दुर्गममार्गान् अपि पारयति ।

- भवतः विद्यालये कति बालकाः द्विचक्रिकया आगच्छन्ति ?

_____

- किं भवन्तः द्विचक्रिकाचालनं जानन्ति ? यदि जानन्ति, तदा कस्मात् ज्ञातवन्तः ?

_____

अयम् अस्ति जुगाडः !

अस्माकं यानस्य नाम जुगाडः अस्ति । अयं फट् फट् शब्दं कुर्वन् चलति । अयं रुचिकरः अस्ति । पुरतः अयं द्विचक्रिकावत् अस्ति, परन्तु पृष्ठतः काष्ठखण्डैः निर्मितः अस्ति ।

- किं भवतां क्षेत्रे अपि एतादृशानि यानानि सन्ति ?

  _____

- भवतां क्षेत्रे एतत् यानं किं कथयन्ति ?

  _____

- किं भवद्भ्यः एतादृशे याने उपवेशनं रोचते ? किमर्थम् ?

  _____

- किं भवन्तः वक्तुं शक्नुवन्ति यत् किमर्थम् एतं 'जुगाड़' इति वदन्ति?

  _____

- 'जुगाड़' पुरातनानाम् अवशिष्टवस्तूनां प्रयोगेण निर्मितः भवति । भवन्तः अपि अवशिष्टानां वस्तूनां प्रयोगेण कस्यचित् नवीनवस्तुनः निर्माणं कुर्वन्तु ।

  विचारयतु, किम् एतादृशम् अपि स्थानम् अस्ति यत्र उपर्युक्तेषु किमपि यानं गन्तुं न शक्नोति । आम्, एतादृशानि अपि स्थानानि सन्ति ।

वनमार्गात् गच्छन्तः बालकाः -

विद्यालयं प्रातुं वयं वनमार्गेण गच्छामः । कुत्रचित् वनम् एतावत् सान्द्रं भवति यत् दिने अपि रात्रिवत् प्रतीतं भवति इति । तस्यां नीरवतायाम् अनेकेषां पक्षिणां पशूनां च शब्दाः श्रूयन्ते ।

- किं भवन्तः कदाचित् एतादृशेन सान्द्रवनेन गतवन्तः ? कुत्र ?
- स्वकीयान् अनुभवान् उत्तरपुस्तिकायां लिखन्तु ।
- किं भवन्तः ध्वनिं श्रुत्वा पक्षिणः परिचेतुं शक्ताः सन्ति ? भवन्तः कतीनां पक्षिणां ध्वनीनाम् अनुकरणे शक्ताः सन्ति ? ध्वनिं कुर्वन्तु । ध्वनेः अनुकरणं कुर्वन्तु ।

हिमे चलन्तः बालकाः -

पश्यन्तु वयं कथं विद्यालयं गच्छामः- क्रोशं यावत् विस्तृते हिमे चलित्वा । वयं परस्परं हस्तं गृहीत्वा हिमे स्वपादौ दृढीकृत्य अवधानेन चलामः । नव्ये हिमे पादौ निविष्टौ भवतः । यदि हिमः दृढः अस्ति तदा स्खलनस्य सम्भावना भवति ।

- किं भवन्तः इयत् अधिकं हिमं दृष्टवन्तः ? कुत्र ? चलचित्रेषु कुत्रचित् अन्यत् वा ?

किम् एतादृशेषु स्थानेषु सर्वदा एव हिमः भवति ? किमर्थम् ?

नतोन्नताः पाषाणैः सङ्कुलाः मार्गाः-

वयं पर्वतीयक्षेत्रेषु निवसामः । अत्र दूरं यावत् नतोन्नताः पाषाणैः सङ्कुलाः च मार्गाः सन्ति । स्थलस्य नगरस्य वा बालकानां कृते एते मार्गाः दुर्गमाः सन्ति किन्तु वयं तु सुकरतया पर्वतमार्गान् पारयामः ।



सान्द्राणि वनानि स्युः, क्षेत्राणि स्युः, पर्वताः स्युः, अथवा दूरं यावत् विस्तीर्णं हिमं भवेत् - वयं बालकाः विद्यालयं गच्छामः एव ।

- किं भवन्तः विद्यालयगमने बाधाम् अनुभवन्ति ?

  _____

- भवद्भ्यः कस्मिन् मासे विद्यालयगमनं सर्वाधिकं रोचते ?

  _____

तदा मम चालं पश्यतु !

- सर्वे बालकाः *समभूमौ कस्मिंश्चित् मुक्तस्थले विद्यालये वा एकत्रिताः भवन्तु ।

  निम्नलिखितासु स्थितिषु भवन्तः कथं चलिष्यन्ति, कृत्वा दर्शयन्तु -

  - यदि पाटलापुष्पदल इव भूमिः भवेत् ।
  - यदि भूमिः कण्टकपूर्णे स्थले परिवर्तिता स्यात् परितः च दीर्घानि तृणानि स्युः ।
  - यदि भूमिः हिमेन परिवृता स्यात्।

किं प्रत्येकं वारं भवतां चालः परिवर्तितः ? चर्चां करोतु ।

बालकानां लेखन्या -

परीक्षणे अनुत्तीर्णः चेत् त्रिंशत्वारं दण्डेन ताडनम् । परीक्षणस्य समये खेलादिकं कृतं चेत् पञ्चदशवारं दण्डेन ताडनम् । गृहकार्यं न कृतं चेत् अष्टौ वारं दण्डेन ताडनम् ।

नखाः दन्ताः परिधानं च न शुद्धं चेत् त्रिंशत्वारम् उत्थानम्-उपवेशनम् ।

शिक्षकस्य अनुपस्थितौ कक्षायां खेलादिकं कृतं चेत् तदा द्वे होरे यावत् एकपादेन स्थिते दण्डः ।

मध्याह्नस्य अवकाशानन्तरं कक्षायां यथासमयं न उपस्थितः चेत् तदा एकां होरां यावत् हस्तौ उपरि कृत्वा लम्बासने(बेंच) स्थितेः दण्डः ।

- सागरः मिश्रः, कक्षा-5
चकमक, अगस्त 2006
देवासः, मध्यप्रदेश

वदतु -

- किं भवतां विद्यालये अपि दण्डः मिलति ? कस्य प्रकारस्य दण्डः मिलति ?
- भवन्तः किं चिन्तयन्ति विद्यालये दण्डविधानं भवेत् ?
- किं दण्डविधानम् एव दोषयुक्तस्य कार्यस्य शुद्धेः उपायः ? विद्यालयाय तेषां नियमानां निर्माणं कुर्वन्तु यैः दण्डं विना एव दोषाणां निवारणं भवेत् ।

- उत्तरपुस्तिकायां स्वकीयस्य 'स्वप्नानां विद्यालयस्य' चित्रनिर्माणं कुर्वन्तु, कक्षायां च तस्य विषये सहपाठिभिः सह चर्चां कुर्वन्तु ।

अध्यापकाय - पाठे अस्य प्रकारस्य सन्दर्भस्य उद्देश्यं, विद्यालयेषु दण्डप्रदानस्य प्रवृत्तेः निवारणं भवेत् इति अस्ति । कक्षायाम् अस्मिन् विषये संवेदनशीलतापूर्वकं वार्तालापं कुर्यात् । बालकान् आत्मानुशासनाय प्रोत्साहनं कुर्यात् ।

प्रथमपाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	हिन्दी
इष्टिका	-	ईंटें
मुक्तस्थानम्	-	खुली जगह
वंशकाष्ठानाम्	-	बाँस की लकडियों को
सेतुः	-	पुल
पादुके	-	चप्पल
उपानहौ	-	जूते



द्वितीयः पाठः

कर्णाः कर्णेषु

मम कर्णौ कस्य पार्श्वे स्तः?

किम् एतानि चित्राणि विचित्राणि प्रतिभान्ति ? चित्रकारः एकस्य पशोः कर्णौ अपरस्य पशोः कर्णस्थाने नियोजितवान् । कर्णौ उचितस्थाने योजयन्तु । चित्रानुसारं लिखन्तु यत् कस्य पशोः शिरसि कस्य पशोः कर्णौ स्तः ।

पशुः	**कर्णौ**	**पशुः**	**कर्णौ**
हस्ती	मूषकः	कुक्कुरः	----------
शशकः	----------	महिषी	----------
मूषकः	----------	हरिणः	----------
चित्रोष्ट्रः	----------		

सर्वेषां पशूनां कर्णाः पृथक् आकारस्य भवन्ति । निम्नलिखितेषु पशुषु कस्य पशोः कर्णौ भवन्तः बहिः द्रष्टुं शक्नुवन्ति, कस्य पशोः च न द्रष्टुं शक्नुवन्ति। तालिकायां लिखन्तु-

हरिणः	मण्डूकः	मत्स्यः	पिपीलिका	काकः
व्याघ्रः	चटका	महिषी	सर्पः	गृहगोधिका
शूकरः	वर्तकः	चित्रोष्ट्रः	हस्ती	बिडालः

ते पशवः येषां कर्णौ बहिः भवतः ते पशवः येषां कर्णौ बहिः न भवतः

भवतां कः विचारः - येषां पशूनां कर्णाः बहिः न दृश्यन्ते, तेषां कर्णाः भवन्ति अपि न वा ?

आगच्छन्तु ज्ञानं कुर्मः ।

प्रथमम् एतत् चित्रं पश्यतु, विचारं च कृत्वा लिखन्तु यत् एते के जन्तवः सन्ति । किं भवन्तः एतेषां जन्तूनां कर्णान् पश्यन्ति ?

वस्तुतः एतेषां सर्वेषां कर्णाः भवन्ति परन्तु तेषां कर्णाः बहिर्भागात् न दृश्यन्ते ।

- केषाञ्चित् अन्येषाम् अपि पशूनां विषये जानन्तु येषां कर्णाः बहिः न दृश्यन्ते ।

पठन्तु तत्पश्चात् च लिखन्तु -

तेषां पशूनां नामानि लिखन्तु येषां कर्णौ भवेताम् -

व्यजनम् इव _____

पत्रम् इव _____

शिरसः उपरि _____

शिरः उभयत्र _____



भवन्तः जानन्ति यत् कर्णौ श्रवणे सहायकौ भवतः । केषाञ्चित् जन्तूनां कर्णाः बहिः दृश्यन्ते अपरेषां च न दृश्यन्ते । पक्षिणां कर्णौ बहिः न दृश्यन्ते, किन्तु तेषां शिरः उभयत्र लघू छिद्रौ भवतः । इमौ कर्णौ पक्षाभ्यां परिवृतौ भवतः । एताभ्याम् एव कर्णाभ्यां पशवः शृण्वन्ति ।

अवधानेन पश्यन्ति चेत्-गृहगोधिकायाः अपि लघू छिद्रौ इव कर्णौ भवतः ।

मकरस्य अपि लघू छिद्रौ इव कर्णौ भवतः, किन्तु सरलतया न दृश्यन्ते ।

कस्य त्वचा-

इतः पूर्वं भवन्तः कर्णाभ्यां काञ्चित् पशून् ज्ञातवन्तः । अधुना त्वचामाध्यमेन पशूनां ज्ञानस्य प्रयत्नं कुर्वन्तु ।

अस्मिन् चित्रे केचित् पशवः तेषां त्वक् च पृथक् कृत्वा दर्शितः अस्ति । प्रत्येकं पशोः तस्य स्वकीयया त्वचया सह मेलनं कुर्वन्तु। पशूनां चित्रेषु तेषां शरीरस्य त्वचायाः सज्जायाः अपि निर्माणं कुर्वन्तु ।



पशूनां त्वचायाः सज्जा तेषां शरीरे केशानां कारणात् भवति ।

किं भवन्तः एतादृशान् पशून् दृष्टवन्तः येषां त्वचायाः केशाः न सन्ति, केनचित् कर्तितानि वा ? विचारं करोतु, तेषां त्वचायाः केशाः नष्टाः, केनचित् कर्तिताः वा चेत् भवेयुः तदा ते कीदृशाः दृश्यन्ते । न भविष्यति वर्णः न वा सज्जा ।

नीचैः केषाञ्चित् पशूनां नामानि लिखितानि सन्ति। एतेषु बहवः पशवः प्रायः भवन्तः अपि दृष्टवन्तः।

लोमशा	हस्ती	चटका	कपोतः
मण्डूकः	काकः	मयूरः	शूकरः
मूषकः	विडालः	महिषः	वर्तकः
कुक्कुटी	उष्ट्रः	गृहगोधिका	गौः

अस्यां सूच्याम्, उचितस्य पशोः नाम चित्वा लिखन्तु, येषाम्-

कर्णौ बहिः दृश्येते।	त्वचायाः उपरि केशाः भवन्ति।	कर्णौ बहिः न दृश्येते।	त्वचायाः उपरि पक्षौ भवतः।

भवन्तः गावं महिषीं च कस्यां सूच्यां लिखितवन्तः । किं दूरात् दर्शनेन एतयोः त्वचायां केशाः दृश्यन्ते? शक्यं चेत्, समीपं गत्वा पश्यन्तु । किं केशाः दृष्टाः?

यदि भवन्तः गजं द्रक्ष्यन्ति तदा किं भवन्तः तस्य त्वचायां मृदुतया हस्तप्रसारणस्य साहसं करिष्यन्ति । किं भवन्तः जानन्ति यत् गजस्य त्वचायाः उपरि अपि केशाः भवन्ति ।

येषां पशूनां जन्तूनां वा नामानि भवन्तः उपरि तालिकायां लिखितवन्तः, तेषां विषये अन्यत् ज्ञानं कुर्मः ।

अध्यापकाय- पाठे वर्णितानां पशूनां विषये वार्तालापं कुर्यात् । तेषां पशूनां भोजनं किम् अस्ति, ते कुत्र निवसन्ति इत्यादिकम् । पशून् प्रति संवेदनशीलतां विकसितुम् अवसरान् जनयेत् ।

ज्ञानं कुर्वन्तु, यत् एतेषु के जन्तवः अण्डं जनयन्ति । ये अण्डं न जनयन्ति, तेषां नामानि हरितपेटिकायां लिखन्तु ।

ये शावकान् जनयन्ति, तेषां नामानि रक्तपेटिकायां लिखन्तु ।

अधुना हरितपेटिकायां येषां जन्तूनां नामानि लिखितानि, तानि पूर्वस्यां तालिकायाम् अन्विष्य, तेषां नीचैः रेखां कुर्वन्तु। तस्याम् एव तालिकायां रक्तपेटिकायाः पशूनां नामसु चिह्नाङ्कनं कुर्वन्तु । भवन्तः किं दृष्टवन्तः? येषां पशूनां कर्णाः बहिः दृश्यन्ते, तेषां शरीरे केशाः भवन्ति, ते शावकान् च जनयन्ति। येषां कर्णाः बहिः न दृश्यन्ते, तेषां शरीरे केशाः न भवन्ति ते च अण्डं जनयन्ति ।

- किं भवन्तः स्वगृहे परिवेशे वा तं पशुं दृष्टवन्तः, येन शावकः उत्पादितः?

  तस्य नाम उत्तरपुस्तिकायां लिखन्तु ।
- किं भवतां गृहे परिवेशे वा कस्यचित् पार्श्वे पशुः अस्ति?
- कस्यचित् एकस्य पालनीयस्य पशोः विषये किञ्चित् ज्ञानं कुर्वन्तु -
  - सः कः पशुः अस्ति?

    _____
  - किं तस्य किमपि नाम अस्ति? तस्य नाम लिखन्तु ।

    _____
  - तस्य पशोः नाम कः कृतवान् ?

    _____
  - तस्य पशोः कस्मिन् भोजने रुचिः अस्ति ?

    _____
  - तस्मै एकस्मिन् दिने कति वारं भोजनं दीयते ?

    _____
  - तस्य शयनस्य कः समयः अस्ति ? सः कियत् कालं यावत् शयनं करोति?

    _____
  - किं तस्य विशेषरूपेण पालनं भवति? कथम्?

    _____

    _____
  - किं सः क्रोधितः अपि भवति? कदा? भवन्तः कथं जानन्ति यत् सः क्रोधितः अस्ति?

    _____

    _____

- तस्य शरीरे केशाः सन्ति पक्षौ वा?

  _____

- तस्य कर्णौ दृश्येते न वा?

  _____

- सः पशुः, शिशुः अस्ति ज्येष्ठः वा?

  _____

- सः अण्डं जनयति सन्ततिं वा?

  _____

- किं तस्य सन्ततिः अपि अस्ति?

  _____

- तस्य पशोः चित्रनिर्माणं कुर्वन्तु, तस्मिन् च वर्णं पूरयन्तु। तस्य सुन्दरं नामकरणं कुर्वन्तु।

- अस्य चित्रस्य येषु भागेषु समसङ्ख्याः (2,4,6,8....) लिखिताः सन्ति, तेषु वर्णं पूरयन्तु । रङ्गभरणस्य अनन्तरं किं दृष्टवन्तः? परिचयं कृत्वा तस्य पशोः नाम लिखन्तु ।



बहुभ्यः वर्षेभ्यः प्राक् पृथिव्यां भीमसरटाः आसन्, किन्तु अधुना न सन्ति । अधुना इमे केवलं चलचित्रेषु चित्रेषु पुस्तकेषु च एव दृश्यन्ते । भीमसरटस्य विषये अन्यत् अपि ज्ञानं कुर्वन्तु । स्वमित्राणि च वदन्तु ।

किं भवन्तः अनेन समं कञ्चित् अन्यम् अपि पशुं
कुत्रचित् दृष्टवन्तः ? तस्य नाम जानन्तु लिखन्तु च ।

स्वज्येष्ठैः सह तस्य विषये अन्यत् अपि ज्ञानं कुर्वन्तु ।



अध्यापकाय - भीमसरटः इव अन्येषाम् अपि पशूनां नामानि बालकानां बुद्धेः अनुसारं पृथक् पृथक् भवितुम् अर्हन्ति । एवं विधं प्रत्येकम् अपि उत्तरं समीचीनम् इत्येव मन्यताम् ।

- इमं पशुं पश्यन्तु । अस्य नाम लिखन्तु । किं भवन्तः जानन्ति यत् एषः अस्माकं राष्ट्रियः पशुः अस्ति ।
- अयं कुत्र निवसति ?

संसारे अस्य पशोः सङ्ख्या प्रतिदिनं न्यूना भवति । चर्चां कुर्वन्तु, किमर्थम्?

पक्षिनिर्माणं कुर्वन्तु



अध्यापकाय – कागदस्य पक्षिनिर्माणार्थं, यदि कागदः उभयतः पृथक् पृथक् वर्णस्य भवेत्, तदा पक्षी सुन्दरः निर्मितः भवेत् ।

द्वितीयपाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	**-**	**हिन्दी**
विचित्रम्	-	अजीब
शिरः	-	सिर
हस्ती	-	हाथी
शशकः	-	खरगोश
मूषकः	-	चूहा
चित्रोष्ट्रः	-	जिराफ
कुक्कुरः	-	कुत्ता
महिषी	-	भैंस
हरिणः	-	हिरन
व्याघ्रः	-	चीता
शूकरः	-	सूअर
मण्डूकः	-	मेंढक
चटका	-	चिडिया
वर्तकः	-	बत्तख
मत्स्यः	-	मछली
सर्पः	-	साँप
काकः	-	कौआ
बिडालः	-	बिल्ली
व्यजनम्	-	पँखा
पक्षाभ्यां	-	पँखों से

परिवृतम्	-	ढंकना
मकरः	-	मगरमच्छ
त्वक्	-	खाल
इतः पूर्वं	-	इससे पहले
लोमशा	-	लोमडी
कुक्कुटी	-	मुर्गी
उष्ट्रः	-	ऊँट
कपोतः	-	कबूतर
मयूरः	-	मोर
महिषः	-	भैंसा
गौः	-	गाय
सूच्याम्	-	सूची
समीपम्	-	पास
केशाः	-	बाल
तदा	-	तब
मृदुतया	-	आराम से
हस्तप्रसारणस्य	-	हाथ फेरनें की
साहसम्	-	हिम्मत
अण्डम्	-	अण्डा
पेटिका	-	बॉक्स
सन्ततिः	-	बच्चे/सन्तान
भीमसरटः	-	डायनासोर

तृतीयः पाठः
'नन्दू'हस्ती

अयमस्ति नन्दू !

नन्दू निद्रातः जागरयन् स्वनेत्रे च उन्मीलितवान्। कञ्चित् कालं यावत् तु सः न अनुभूतवान् यत् सः कुत्र अस्ति । सः अनुभूतवान् यत् सः पिङ्गलवर्णानां वृक्षाणां विशाले वने अस्ति । सः स्वकीये नेत्रे भ्रामितवान्, एतत् सर्वं तस्य परिचितः इव प्रतीतः अभवत्। अहो! इयं तु मम माता अस्ति । यत् तस्य पिङ्गलवर्णानां वनं प्रतीतम् अभवत् तत् तस्य कुटुम्बस्य सदस्यानां पादाः शुण्डिकाः च आसन् ।



सूर्यः आकाशे भाति । तस्य उष्णता इदानीं वर्धते । तस्य मातामही उच्चस्वरेण बृंहितवती । सा अस्मिन् समूहे सर्वतः अधिका वृद्धा अस्ति । सा गच्छति स्म, एतत् दृष्ट्वा अन्याः हस्तिन्यः ताम् अनुसृतवत्यः नन्दू अपि च अनुसृतवान् ।

अध्यापकाय - मातामही, मातुः माता भवति । बालकान् पृच्छेत् यत् ते स्वकीयां मातुः मातरं किं कथयन्ति ।

वनं प्राप्य सः समूहः विकीर्णः अभवत्। ते सर्वे अपि स्वरुचिकराणां पत्राणां गुल्मानां च भक्षणाय पृथक् पृथक् अभवन् । कञ्चित् कालं यावत् भक्षणानन्तरं सर्वे नद्याः पार्श्वे गतवन्तः, सर्वे शावकाः जले क्रीडाम् आरब्धवन्तः, काश्चित् ज्येष्ठाः हस्तिन्यः च नद्याः तटे मृत्तिकायां विश्रान्तिं कृतवत्यः।

किं भवन्तः जानन्ति यत् प्रत्येकं दीर्घः हस्तिः प्रत्येकं दिवसे शतं (100) किलोग्राम इत्यस्मात् अपि अधिकं पत्राणि गुल्मान् च खादति ? हस्तिः अत्यन्तम् अल्पं विश्रामं करोति । अयं प्रतिदिनं त्रिचतुर्होरां यावत् शयनं करोति । जलेन पङ्केन च क्रीडा गजाय बहु रोचते । अनेन सः शीतलतां प्राप्नोति । एवं तस्य कर्णौ अपि व्यजनम् इव भवतः । उष्णतायाः अनुभवे सति सः स्वकर्णौ चालयित्वा शीतलतां प्राप्नोति ।

जानन्तु -

❖ नन्दोः आयुः केवलं मासत्रयम् एव अस्ति, तथापि तस्य भारः द्विशतं (200) किलोग्रामः अस्ति । भवतः भारः कियान् अस्ति?

_____

❖ भवतः आयुषः कतीनां बालकानां भारं मेलयित्वा नन्दोः भारस्य समं भविष्यति ।

_____



क्रीडायाम्-

नन्दूः दृष्टवान् यत् तस्य मित्राणि परस्परं पुच्छान् कर्षयन्तः आसन् । सः विचारितवान् यत् अहं लघुः अस्मि । कदाचित् एते मम उपरि न पतेयुः । सः तेषां पार्श्वे न गतवान् अपितु मौनेन स्वमातुः पार्श्वे गत्वा अतिष्ठत् । माता नन्दूं जले प्रणोदितवती, एवं प्रतीयते स्म यथा सा तं जलक्रीडायै कथयन्ती स्यात् । नन्दूः मौनेन जलं प्रति गतवान् । तस्मै तु जलेन क्रीडा रोचते एव । तस्य मित्राणि अपि जले एव आसन् । जलस्य समीपे प्राप्तेः अनुक्षणम् एव जलस्य एका धारा तस्य शिरसि पतिता । नन्दू पूर्णतया आर्द्रः अभवत् । सः दृष्टवान् यत् सा तस्य मित्राणां चेष्टा आसीत् । सः स्मित्वा जलक्रीडाम् आरब्धवान् ।

सूर्यास्तात् पूर्वम् एव हस्तिनां समूहः पुनः वनं प्रति आगतवान् । अनया यात्रया नन्दूः बहुः श्रान्तः अभवत् । सः दुग्धं पिबन् स्वमातुः पादानां मध्ये एव शयितवान् ।

भवन्तः पठितवन्तः यत् नन्दूः हस्ती स्वसमूहेन सह निवसति । हस्तिनां समूहे केवलं हस्तिन्याः शावकाः एव निवसन्ति । समूहस्य सर्वतः ज्येष्ठा हस्तिनी एव समूहस्य नेत्री भवति । एकस्मिन् समूहे दश द्वादश वा हस्तिन्यः शावकाः च भवन्ति । हस्तिनः चतुर्दश पञ्चदश वा वर्षपर्यन्तं एव अस्मिन् समूहे वसन्ति, तत्पश्चात् ते समूहं त्यजन्ति, एकाकिनः च वसन्ति । नन्दूः अपि यदा चतुर्दश पञ्चदश वा वर्षस्य भविष्यति, तदा सः स्वसमूहं त्यक्ष्यति ।

हस्तिवत् अन्ये अपि केचित् पशवः स्वसमूहे निवसन्ति । पशूनां इमं समूहं झुण्ड इति वदन्ति । समूहे वसन्तः पशवः परस्परं मिलित्वा सर्वाणि कार्याणि कुर्वन्ति । यथा-भोजनस्य अन्वेषणम्, भ्रमणम्, क्रीडनम्, स्नानं च ।

- यदि भवान् नन्दूः अस्ति, समूहे च निवसति तदा किं करिष्यति ?

_____

_____

_____

- हस्तिनां समूहे सर्वान् निर्णयान् सर्वतः अधिका वृद्धा हस्तिनी करोति । भवतः कुटुम्बे सर्वान् निर्णयान् कः करोति ?

_____

_____

_____

- हस्तिनां समूहस्य कोष्ठकनिर्माणं करोतु । तदर्थम् अधिकाधिकं हस्तिनां चित्राणि एकत्रितानि कुर्वन्तु । तानि च कर्तयित्वा उत्तरपुस्तिकायां संश्लेषयन्तु ।

- नन्दूः तत्सर्वं करोति स्म, यत् तस्मै रोचते स्म । यदि भवान् स्वमित्रैः सह भ्रमणाय पूर्णम् एकं दिनं प्राप्नुयात्, तदा भवान् तस्मिन् दिने किं किं करिष्यति ?

_____

_____

_____

_____

_____

- ज्ञानं कुर्वन्तु लिखन्तु च यत् के के पशवः समूहे निवसन्ति ?

_____

_____

- किं भवान् अपि समूहे निवसति ? समूहे निवासेन भवान् कथम् अनुभवति ? भवतः अनुसारं समूहे निवासस्य के लाभाः काः च हानयः भवितुम् अर्हन्ति?

लाभाः	हानयः

- हस्ती रज्जुना बद्धे सति कथम् अनुभवेत् ? भवान् स्वभावनाः वदतु चर्चां च करोतु ।

_____

_____

किं भवान् कदापि हस्तिनः उपरि अतिष्ठत् ? कथम् अनुभूतवान् ?

भवान् केषां केषां पशूनाम् उपरि अतिष्ठत् ? तेषां नामानि लिखतु ।

भवता स्वपरिवेशे चलचित्रेषु पुस्तकेषु वा बहवः पशवः दृष्टाः स्युः । एकाकिनः सामूहिकस्य वा पशोः मध्ये कस्यचित् एकस्य विषये लिखतु ।

विचारं करोतु लिखतु च -

बकः महिष्याः उपरि किमर्थं तिष्ठेत् ?

_____

_____

- किं भवान् पशोः उपरि तिष्ठन्तम् अन्यं पशुं जन्तुं वा दृष्टवान् ? तस्य नाम लिखतु ।

  - ❑ आरूढः पशुः

    _____

  - ❑ वाहनं पशुः

    _____

- अन्येषाम् अपि तादृशानां पशूनां नामानि लिखतु, येषां वयं वाहनरूपेण प्रयोगं कुर्मः।

  _____

- तेषां पशूनां नामानि लिखतु, येषां वयं वस्तूनां वहनाय प्रयोगं कुर्मः।

  _____

  _____

स्वस्य हस्तिनः चित्रनिर्माणं करोतु -

- अग्रिमे पृष्ठे प्रदत्तं हस्तिनः चित्रं, दीर्घं कृत्वा स्थूले कागदे लिखन्तु । तत् च बहिः रेखाभ्यः कर्तयन्तु ।
  - ❑ अधुना चित्रे यत्र 'कर्तयन्तु' इति लिखितम् अस्ति, तत्र किञ्चित् कर्तयन्तु । अवधानं भवेत् कर्तयित्वा पृथक् न कार्यम् ।
  - ❑ यत्र 'आवर्तयन्तु' इति लिखितम् अस्ति, ततः बिन्दुरेखायाः (.....) आवर्तयन्तु ।
  - ❑ (//////////) – एतत् चिह्नयुक्तं भागम् अन्तः आवर्तयन्तु ।

- अधुना पुच्छं निर्माय संश्लेषयतु ।

निर्मितः हस्ती ।

- इमं हस्तिनं रोचकैः वर्णैः बहुप्रकारेण सज्जां करोतु ।
- इमं हस्तिनं स्वकक्षायाम् अवलम्बयतु । सहपाठिनां हस्तिनः अपि पश्यतु ।



पशूनां सभा -

एतानि चित्राणि पश्यतु पठतु च - इमे पशवः परस्परं किं किं वदन्ति । संवेदनशीलतापूर्वकं चर्चां करोतु ।

चर्चां करोतु-

भवन्तः एतेषां पशूनां वार्ताः पठितवन्तः। भवन्तः किम् अनुभवन्ति - एतेषु केचित् उदासीनाः किमर्थं सन्ति ?

भवान् वृक्षेषु मोदमानेषु वानरेषु, सौभिकस्य वानरे च कं भेदं दृष्टवान्?

अस्य हस्तिनः कति पादाः सन्ति -



किं भवन्तः जानन्ति - हस्तिनः दुःखे समागते परस्परं सहायतां कुर्वन्ति । एवं स्वशावकानां पालनाय सुरक्षायै च अपि परस्परं सहायतां कुर्वन्ति ।

तृतीयपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दी	-	संस्कृतम्
आखें	-	नेत्रम्
भूरा रंग	-	पिङ्गलवर्णः
परिवार	-	कुटुम्बः
पैर	-	पादः
सूँड	-	शुण्डिका
गर्मी	-	उष्णता
नानी	-	मातामही
ऊँची आवाज से	-	उच्चस्वरेण
चिंघाडना	-	बृंहणम्
विखरना	-	विकीर्णः
पत्ता	-	पत्रम्
झाडी	-	गुल्मः
मिट्टी	-	मृत्तिका
ठंडा	-	शीतल
पूँछ	-	पुच्छः
छोटा	-	लघुः
रस्सी	-	रज्जुः
बगुला	-	बकः
भैंस	-	महिषी
पिटारी	-	पिटकम्
खुरों की नाल	-	खुरत्रम्
भूखा	-	बुभुक्षितः
बेबस	-	विवशः
उदास	-	उदासीनः
सहलाना	-	अङ्गमर्दनम्



चतुर्थः पाठः

अमृतायाः कथा

इयं कथा अतिप्राचीना अस्ति, सामान्यतः त्रिशतात् वर्षेभ्यः प्राचीना । इयं सत्यकथा अस्ति । अमृता राजस्थाने जोधपुरस्य पार्श्वे खेजड़ली ग्रामे निवसति स्म । जानाति किं - तस्य ग्रामस्य नाम खेजड़ली किमर्थम् आसीत् ? तस्य ग्रामे खेजड़ी इत्यस्य अनेके वृक्षाः आसन् । ग्रामस्य सर्वे जनाः वृक्षाणां वनस्पतीनां पशूनां च कृते बहु प्रेम कुर्वन्ति स्म । ग्रामे अजाः हरिणाः शशकाः मयूराः अन्ये अपि च पशवः निर्भीकाः भ्रमन्ति स्म । ग्रामीणानां मनसि अधुना अपि वृद्धानां वाक्यानि स्थितानि आसन् । वृद्धाः वदन्ति स्म यत्-"यावत् वृक्षाः सन्ति, तावत् वयं स्मः । वृक्षाः पशवः च अस्मान् विना जीवितुं शक्नुवन्ति, परन्तु वयं तान् विना जीवितुं न शक्नुमः ।"

अध्यापकाय - अध्यापकः भारतस्य मानचित्रे राजस्थानस्य अन्वेषणाय बालकान् प्रेरयेत् ।



अमृतायाः मित्राणि -

अमृता प्रातः काले उत्थाय स्वकीयैः सर्वैः मित्रवृक्षैः प्रसन्नतापूर्वकं मिलति स्म । अमृता प्रतिदिनं तेषु वृक्षेषु कञ्चित् वृक्षं विशिष्टं मत्वा तस्य आलिङ्गनं कृत्वा तस्य कर्णे मन्दं वदति स्म -"मित्र ! त्वं सुन्दरः बलवान् च असि। त्वम् एव असि, यः अस्माकं सर्वेषां कृते अवधानं ददासि । अतः तुभ्यं धन्यवादः । अहं त्वं स्निह्यामि । त्वं स्वशक्तिं मह्यम् अपि देहि ।"

अमृता इव ग्रामस्य अन्येषाम् अपि बालकानां वृक्षैः सह मित्रता आसीत् । ते बहुकालं यावत् वृक्षाणां छायासु क्रीडन्ति स्म ।

- किं भवतः गृहस्य समीपे कस्मिंश्चित् क्षेत्रे विद्यालयस्य मार्गे वा किमपि ईदृशं स्थानम् अस्ति यत्र वृक्षाः आरोपिताः सन्ति ?
- ते वृक्षाः तत्र किमर्थम् आरोपिताः सन्ति ?

- किं भवान् तेषां कञ्चित् वृक्षाणां पालकं दृष्टवान्? कम् ?

_____

- किं तेषु कस्मिंश्चित् वृक्षे फलानि अपि सन्ति ? तानि कः खादति ?

_____

_____

- ललिता मन्यते यत् तस्य विद्यालयस्य भित्तौ उत्पन्नाः लघुपादपाः केनचित् न आरोपिताः। किं भवन्तः अपि तत् स्थानं जानन्ति यत्र लघुपादपाः शस्याः च स्वयमेव उत्पन्नाः।

_____

- भवान् किमर्थम् अनुभवति यत् इमे लघुपादपाः स्वयमेव उत्पन्नाः भवन्ति ?

_____

_____

वृक्षाणां कर्त्तनसम्बन्धिभयम् -

समये व्यतीते सति अमृता अपि युवती अभवत् । कस्मिंश्चित् दिने सा वृक्षाणां पार्श्वे आसीत् । सा दृष्टवती यत् केचित् अपरिचिताः जनाः तत्र कुठारं गृहीत्वा स्थिताः सन्ति। पृष्टे सति सा ज्ञातवती यत् ते राज्ञः पुरुषाः सन्ति । राज्ञः आज्ञानुसारं ते काष्ठप्राप्त्यै वृक्षान् कर्तयितुं समागताः आसन् । काष्ठस्य आवश्यकता राज्ञः भवनस्य निर्माणाय आसीत् ।



एतत् ज्ञात्वा एव चित्तं शून्यम् इव अभवत् । ते राजपुरुषाः यं वृक्षं कर्तयितुं चितवन्तः, अमृता तेन वृक्षेण आलिङ्गिता अभवत् । तेषां राजपुरुषाणां भीतिप्रदेभ्यः वचनेभ्यः अपि न भीता । राजपुरुषाः राज्ञः आज्ञां न मन्येरन् चेत्, तदा तेषां प्राणसङ्कटं भवेत् । अतः ते कुठारेण प्रहारं कृतवन्तः । तेषां कुठारस्य एकेनैव प्रहारेण अमृतायाः पादाभ्यां रक्तस्रावः अभवत् । सा पतितवती, किन्तु वृक्षं न त्यक्तवती । अमृतां दृष्ट्वा तस्याः पुत्र्यः ग्रामस्य त्रिशतात् अधिकाः जनाः च वृक्षाणाम् आलिङ्गनं कृत्वा स्वप्राणान् त्यक्तवन्तः ।

यदा राजा एतत् वृत्तान्तं ज्ञातवान्, तदा सः न अवगतवान् यत् कथं वृक्षाणां निमित्तं जनाः स्वप्राणान् अपि दातुं शक्नुवन्ति । सः स्वयं तत्र आगतवान् वृक्षान् प्रति जनानां प्रेम च दृष्टवान् ।

- भवान् स्मरति वा ग्रामस्य तेषां वृद्धानां वचनानि ?
- यदि वृक्षाः पशवः च न भवेयुः तदा किं वयं जीविताः भविष्यामः? अस्मिन् विषये कक्षायां चर्चां करोतु ।

सुरक्षितः ग्रामः -

अनया घटनया राजा बहुप्रभावितः अभवत् । सः आदिष्टवान् यत् अस्मिन् क्षेत्रे कश्चित् अपि कदापि वृक्षाणां कर्न्तनं न करिष्यति । कश्चित् अपि आखेटं च न करिष्यति । अधुना त्रिशतस्य वर्षाणां पश्चात् अपि अत्रत्याः जनाः बिश्नोई इति संज्ञकाः वृक्षाणां पशुपक्षिणां च रक्षां कुर्वन्ति । सिकतास्थले (रेगिस्ताने)



सति अपि इदं क्षेत्रम् अधुना अपि वृक्षैः हारित्यपूर्णम् अस्ति । अत्र पशवः निर्भीकाः इतस्ततः भ्रमन्ति ।

- भवान् तृतीयकक्षायां येन वृक्षेण मित्रतां कृतवान्, अधुना सः कथम् अस्ति ?

  - ❑ अस्मिन् वर्षे अन्येन अपि वृक्षेण सह मित्रतां करोतु । किं भवान् एकस्मिन् वर्षे स्वमित्रवृक्षेषु ऋतोः अनुसारं परिवर्तनं दृष्टवान् ?

कस्यचित् एकस्य वृक्षस्य विषये लिखतु ।

- ❑ किं तस्मिन् पुष्पाणि उत्पद्यन्ते ?

  _____

- ❑ किं सम्पूर्णे एव वर्षे सः वृक्षः पुष्पयुक्तः भवति ?

  _____

- ❑ तस्य पत्राणि कस्मिन् मासे पतन्ति ?

  _____

- ❑ किं तस्मिन् वृक्षे फलानि जायन्ते ?

  _____

- ❑ फलानि कस्मिन् कस्मिन् मासे जायन्ते ?

  _____

- ❑ किं भवान् तानि फलानि खादितवान् ?

  _____

केभ्यश्चित् दिनेभ्यः पूर्वं भवता दूरदर्शने समाचारपत्रे वा दृष्टं पठितं वा स्यात् यत् आखेटविषये अभिनेतॄणां विरुद्धं न्यायसम्बन्धिकार्यवाही जातः ।

चर्चां करोतु -

- जनाः आखेटं किमर्थं कुर्वन्ति ?
- किं भवान् जानाति यत् आखेटे कृते सति दण्डविधानम् अस्ति ? आखेटकरणे दण्डविधानं किमर्थम् अस्ति ?

  _____

स्वपितामहीं पितामहं च पृष्ट्वा लिखतु यत् –

- तयोः बाल्यकाले यावन्तः विविधाः पक्षिणः दृश्यन्ते स्म, किम् अद्य अपि तावन्तः विविधाः पक्षिणः दृश्यन्ते ?

  _____

  _____

- के के पक्षिणः अद्य न दृश्यन्ते ?

  _____

- ईदृशाः के के जन्तवः पक्षिणः च सन्ति ये अधुना तेषां परिवेशे न दृश्यन्ते ?

  _____

❑ शान्तेः पितामहः उक्तवान् यत् – "यदा सः बालकः आसीत् तदा बह्व्यः चटकाः, सारिकाः इत्यादयः दृश्यन्ते स्म"। विचारं करोतु यत् एतेषां पक्षिणां सङ्ख्या किमर्थं न्यूना अभवत् ? केचित् द्वे कारणे लिखतु ।

_____

_____

_____

अमृतायाः ग्रामे बहवः खेजड़ीवृक्षाः आसन् । भवतः ग्रामे कस्य वृक्षाः आधिक्येन सन्ति ? द्वयोः वृक्षयोः नाम लिखतु ।

- स्वज्येष्ठेभ्यः पृच्छतु यत् किम् एतयोः वृक्षयोः काचित् विशेषता अस्ति ?

_____

_____

_____

खेजड़ी - अयं वृक्षः रेगिस्तानीक्षेत्रेषु अधिकतया प्राप्यते । अस्मै वृक्षाय अधिकस्य जलस्य आवश्यकता न भवति । अस्य वृक्षस्य त्वचया औषधिनिर्माणम् अपि भवति । अस्य काष्ठे कीटः अपि न लगति । अस्य वृक्षस्य फलैः शाकनिर्माणम् अपि भवति । तत्रत्याः पशवः अस्य पत्राणि खादन्ति । अस्य छायायां भवादृशाः बहवः बालकाः क्रीडन्ति च ।

अध्यापकाय - ज्येष्ठेभ्यः पशूनां कीटानां पतङ्गानां च ज्ञानप्राप्तये बालकान् प्रेरयेत् । पर्यावरणस्य परिवर्तनेन पक्षिणां सङ्ख्यायाः न्यूनताविषये चर्चां कारयेत् ।



चतुर्थपाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतशब्दाः		हिन्दीशब्दाः
अजाः	-	बकरियाँ
शशकाः	-	खरगोश
कुठारः	-	कुल्हाड़ी
राजपुरुषाः	-	राजा के आदमी
ऋतु	-	मौसम
सिकतास्थलम्	-	मरुस्थलम्

पञ्चमः पाठः

अनीतायाः मधुमक्षिकाः

मम नाम अनीता खुशवाहा अस्ति । अहं मुजफ्फरपुर इति जनपदस्य बोचाहा इति ग्रामे निवसामि, यः बिहारराज्ये अस्ति । मम गृहे माता, पिता, द्वौ लघू भ्रातरौ च स्तः । अहं महाविद्यालये पठामि, विद्यालयस्य बालकान् च पाठयामि । अहं मधुमक्षिकाणां पालनस्य कार्यम् अपि करोमि ।

एतत् सर्वं मम कृते सरलं न आसीत् । यदा अहं बालिका आसम्, तदा सम्पूर्णे दिने अजाः चारयामि स्म । मह्यम् अपि विद्यालयः रोचते स्म, किन्तु पितृभ्यां बालिकानां विद्यालयगमनं न रोचते स्म ।

- इयं काचित् सत्यकथा अस्ति । अनीता खुशवाहा काचित् प्रकाशिता तारिका अस्ति । प्रकाशिताः तारिकाः इति तासां सामान्यानां बालिकानां विशिष्टाः कथाः सन्ति, याः विद्यालयं गत्वा स्वजीवनं परिवर्तितवत्यः । बालकान् पुस्तकस्य अन्तिमे पृष्ठे यत् भारतस्य मानचित्रम् अस्ति, तत्र बिहारराज्यम् अन्वेष्टुं शिक्षकः वदेत् ।

विद्यालयगमनम्-एकं स्वप्नम्

कस्मिंश्चित् दिने अहं विद्यालयस्य अन्तः दृष्टवती एव। बालकान् दृष्ट्वा अहम् आत्मानं रोद्धुं शक्ता न अभवम् । बालकानां पङ्क्तौ पृष्ठे गत्वा च उपाविशम्। तत् मह्यं बहु चितम्। गृहं गत्वा अहं साहसं कृत्वा पितरौ विद्यालयस्य विषये सर्वम् उक्तवती । तौ मह्यं विद्यालयगमनाय आज्ञां न दत्तवन्तौ । तस्मिन् दिने अहं बहु रोदितवती।

मम ग्रामस्य शिक्षिका पितरौ अवगमितवती यत् पठनं कियत् आवश्यकम्। सा उक्तवती यत् - अष्टमकक्षां यावत् शिक्षा निश्शुल्का अस्ति । शिक्षा तु सर्वेषां बालकानाम् अधिकारः अस्ति । अहं न ज्ञातवती कथं, परन्तु मम पितरौ अङ्गीकृतवन्तौ । अहं विद्यालयं गन्तुम् आरब्धवती । विद्यालये अहम् अधिकान् अङ्कान् तु न प्राप्तवती, परन्तु अहं जिज्ञासुः आसम्।

- एकस्मिन् वर्षे विद्यालयसम्बन्धिवस्तुभ्यः भवतः कियत् व्ययः भवति, विचार्य लिखतु -

वस्तूनि	व्ययः
1. विद्यालये गमनागमने	
2. उत्तरपुस्तिकाः	
3. लेखन्यः	
4. परिधानम्	
5. स्यूतः	
6. भोजनपेटिका	
7. उपानहौ	
8. अन्यत् (1)	
(2)	
सम्पूर्णः व्ययः	

- भवान् अस्मिन् वर्षे कतिरूप्यकाणां विद्यालयस्य उत्तरपुस्तिकाः क्रीतवान्?

  _____

- भवान् स्वविद्यालयस्य कीदृशीं वेशभूषाम् इच्छति ? उत्तरपुस्तिकायां तस्य चित्रं निर्माय वर्णं पूरयतु ।
- बालकानां द्वयोः समूहयोः विभागं करोतु। विद्यालये वेशभूषा भवेत् - अस्मिन् विषये वादविवादं करोतु ।

विद्यालये -

शीघ्रम् एव पञ्च वर्षाणि व्यतीतानि । अहं पञ्चमकक्षाम् उत्तीर्णवती। अहं ज्ञातवती यत् षष्ठकक्षायै अधिकस्य धनस्य आवश्यकता अस्ति । पितरौ उक्तवन्तौ यत् पठनं त्यजतु, किन्तु मम इच्छा अग्रे अपि पठनस्य आसीत् । अहं समाधानस्य अन्वेषणं कृतवती । अहं लघूनां बालकानां पाठनेन यत् धनं प्राप्तवती, तस्मात् धनात् अहम् अग्रे अपि शिक्षां प्राप्तवती ।

एकं स्मरणम्

मम स्मरणम् अस्ति यत् ग्रामस्य केचित् अन्ये अपि ज्येष्ठाः बालकाः लघून् बालकान् पाठयन्ति स्म । तेभ्यः मम बालकानां पाठनं न रोचते स्म । ते मम पार्श्वे पठनाय आगतेषु बालकेषु भयम् उत्पादितवन्तः, तान् तर्जितवन्तः च । द्वौ बालकौ विहाय अन्ये सर्वे बालकाः पलायिताः अभवन् । केषाञ्चित् दिनानाम् अनन्तरं ते सर्वे पुनः आगतवन्तः, यतः अहं तान् प्रेम्णा पाठयामि स्म ।

वदतु

- किं भवान् तान् बालकान् जानाति, ये पठितुम् उत्सुकाः आसन् किन्तु निर्धनताकारणात् पठितुं न शक्तवन्तः । तेषां विषये कक्षायां वदतु ।

अध्यापकाय - बालकेभ्यः वादविवादस्य अर्थं ज्ञापयेत् । वादविवादेन बालकाः कस्मिंश्चित् विषये विभिन्नदृष्टिकोणैः विचारयितुम् अवसरं प्राप्स्यन्ति । बालकान् कक्षायां स्वपरामर्शं दातुं प्रोत्साहनं कुर्यात् ।

- प्रत्येकं बालकस्य अयम् अधिकारः अस्ति, यत् सः अष्टमकक्षां यावत् निश्शुल्कां शिक्षां प्राप्नुयात् । किं सर्वे बालकाः इमम् अधिकारं प्राप्तवन्तः ? चर्चां करोतु ।

शनैः शनैः अहं ग्रामीणान् प्रेरितवती यत् सर्वाः बालिकाः विद्यालये पाठयन्तु । गृहे पितरौ मम सहायतां कृतवन्तौ । गृहस्य सर्वं कार्यं मम माता एव करोति स्म । अतः अहं पठनाय बहुसमयं प्राप्तवती ।

किञ्चित् रहस्यम्

अहं कञ्चित् अनुक्त्वा एव द्विचक्रिकायानस्य चालनं शिक्षितवती । बहुवारं पतित्वा अनेकवारं व्रणः अपि जातः, किन्तु आनन्दं प्राप्तवती ।

विद्यालयात् मधुमक्षिकाणां पालनं यावत्

अस्माकं क्षेत्रे लीचिकायाः बहवः वृक्षाः सन्ति । लीचिकायाः वृक्षाः मधुमक्षिकान् लोभयन्ति । अतः अत्र जनाः मधुमक्षिकान् पालयित्वा मधुनिर्माणस्य कार्यं कुर्वन्ति । अहं विचारितवती यत् अहम् अपि एतत् कार्यं कुर्याम् । तदा अहं ग्रामे मधुमक्षिकाणां पालनस्य एकस्मिन् सर्वकारीये प्रशिक्षणे भागं गृहीतवती । तत्र अहम् एका एव महिला आसम्, अन्ये सर्वे पुरुषाः आसन् । प्रशिक्षणे अहं ज्ञातवती यत् अक्तूबरमासात् आरभ्य दिसम्बरमासं यावत् मधुमक्षिकाणां प्रसवस्य समयः भवति । मधुमक्षिकाणां पालनम् आरब्धुम्, अयं समयः सर्वाधिकः उचितः भवति ।

- किं भवान् पुष्पेषु भ्रमितान् कीटान् अपश्यत् ? तेषां नामानि ज्ञात्वा लिखतु ।

_____

- उत्तरपुस्तिकायां तेषां चित्राणि निर्माय वर्णं पूरयतु ।
- ते कीटाः पुष्पेषु किमर्थं भ्रमन्ति ? ज्ञानं करोतु।

_____

_____

- यदा मधुमक्षिका उड्डीयते, तदा कथं ध्वनिं करोति ? तथा ध्वनिं करोतु ।

मधुमक्षिकापालिका-अनीता

अहं मधुमक्षिकापालनस्य प्रशिक्षणं प्राप्तवती । किन्तु कार्यम् आरम्भं कर्तुं मम पार्श्वे धनं न आसीत् । अहं किञ्चित् कालं यावत् प्रतीक्षां कृतवती, छात्राणां च पाठनेन पञ्चसहस्रं (5000) रूप्यकाणि एकत्रीकृतवती । अहम् अनेन धनेन मधुमक्षिकापालनाय द्वे पेटिके क्रीतवती । एकस्याः पेटिकायाः मूल्यं द्विसहस्रम् आसीत् । अहम् अवशिष्टैः धनैः मधुरपेयं निर्मातुं शर्करां, मक्षिकाणां छत्रं शोद्धुं भिषक् च क्रीतवती ।

अयं सितम्बरमासः आसीत् । दिसम्बरमासं यावत् मम मधुमक्षिकाणां सङ्ख्या इयती वर्धिता, यत् द्वे पेटिके अपि लघू अभवताम् । अहम् अन्ये द्वे पेटिके क्रीतवती । मम मधुमक्षिकाणां विषये अधिकः अनुभवः न आसीत् । बहुवारं मक्षिकाः मां दंशितवत्यः। अनेन मम मुखं हस्तौ च शोथिताः अपि जाताः । पीडा अपि भवति स्म, किन्तु कं वदेयम् ? एतत् कार्यं तु अहं स्वेच्छया एव आरब्धवती ।

ज्ञानं करोतु -

- भवतः ग्रामे मधुमक्षिकया दंष्टे सति कः उपचारः क्रियते ?
- उत्तरपुस्तिकायां मधुमक्षिकायाः चित्रं निर्माय तस्मिन् वर्णं पूरयतु तस्य सुन्दरं नामकरणं च करोतु ।

लीचिकायाः पुष्पाणि फरवरीमासे विकसन्ति । अहं चतस्रः पेटिकाः लीचिकायाः उद्याने स्थापितवती। अहं प्रत्येकं पेटिकया द्वादश (12) किलोयावत् मधु प्राप्तवती, तत् अहम् आपणे विक्रीतवती । अहं स्वकीयं प्रथमम् अर्जितधनं प्राप्तवती । अधुना मम पार्श्वे विंशतिः (20) पेटिकाः सन्ति ।

- अनीतायाः विंशतिपेटिकानाम् आहत्य मूल्यं किम् अस्ति ?

अहं प्रतिदिनं द्विचक्रिकया महाविद्यालयं गच्छामि । महाविद्यालयः ग्रामात् पञ्च किलोमीटरदूरं नगरे अस्ति । मम महाविद्यालये गमनानन्तरं माता मधुमक्षिकाणां कृते शर्करामिश्रितं जलं ददाति। पिता अपि मधुमक्षिकाणां पालनं करोति पेटिकया च मधुग्रहणं करोति । अधुना तु भवान् अपि अनीतायाः विषये सर्वम् अवगतवती एव ।

क्षेत्रस्य सर्वे जनाः तया परिचिताः सन्ति । सा ग्रामस्य सर्वासु सभासु गच्छति, जनान् शिक्षामहत्त्वं च वदति । केचित् जनाः तु तस्य उपहासम् अपि कुर्वन्ति, किन्तु अनीतायाः कृते तु तस्य कर्त्तव्यं प्रधानं, तत् एव सा करोति । मधुमक्षिकापालकाः मधुनः उचितमूल्यं प्राप्नुयुः, अतः अनीता रोकविक्रेत्री भवितुम् इच्छति ।

ज्ञानं करोतु -

- अनीतायाः ग्रामे मधु पञ्चत्रिंशता (35) रूप्यकैः एककिलोपरिमितं प्राप्यते, भवतः ग्रामे एककिलोपरिमितं मधु कतिभिः रूप्यकैः प्राप्यते ?

  _____

- भवान् कस्य कस्य वर्णस्य मधु दृष्टवान् ?

  _____

- किं भवतः गृहे मधुनः प्रयोगः भवति ? कस्मै कार्याय भवति ?

  _____

प्रत्येकं छत्रे काचित् राज्ञी मक्षिका भवति, सा अण्डं जनयति । छत्रे केचित् नराः मक्षिकाः अपि भवन्ति । छत्रे बहवः कर्मकर्त्र्यः मक्षिकाः अपि भवन्ति । इमाः समग्रे अपि दिने कार्यं कुर्वन्ति । मधुप्राप्त्यर्थं पुष्पाणां रसं गृह्णन्ति । यदा काचित् अपि मक्षिका रसं प्राप्नोति तदा सा विचित्ररूपेण नृत्यति, तेन अन्याः मक्षिकाः जानन्ति यत् मधु कुत्र अस्ति ।

अध्यापकाय - शिक्षकः बालकान् रोकविक्रेतुः कार्यम् अवगमयेत् ।

ताः रसेन मधुनिर्माणं कुर्वन्ति । छत्रनिर्माणस्य कार्यं स्वशिशुपालनकार्यं सरलम् एव भवति । यदि इमाः न स्युः तदा न तु छत्रनिर्माणं भवेत्, न च मधु एकत्रितं भवेत् । मधु विना छत्रस्य सर्वाः मक्षिकाः बुभुक्षिताः एव भवन्ति। नराः मक्षिकाः छत्रस्य कृते किमपि विशिष्टं कार्यं न कुर्वन्ति ।



- मधुमक्षिकाः अतिरिच्य अन्ये के कीटाः सन्ति ये समूहे वसन्ति ?

_____

मधुमक्षिकाणाम् इव पिपीलिकाः अपि मिलित्वा वसन्ति। सर्वासां पिपीलिकानां कार्यस्य विभागः भवति। राज्ञ्यः पिपीलिकाः अण्डानि जनयन्ति। सैनिकपिपीलिकाः विलस्य रक्षां कुर्वन्ति। कर्मचारिण्यः पिपीलिकाः च भोजनम् अन्विष्य आनयन्ति । उपदेहिकाः वरटाः च अपि एवम् एव समूहे निवसन्ति ।

- भवान् पिपीलिकानां विलं कुत्र कुत्र दृष्टवान् ?

_____

- भवान् किम् अनुभवति - कीदृशेषु वस्तुषु पिपीलिकाः अधिकतया आयान्ति ? तेषां वस्तूनां सूचीनिर्माणं करोतु।

_____

_____

- पिपीलिकानां पङ्क्तिं पश्यतु, तेषां वर्णः कीदृशः अस्ति, वदतु ?

_____

- किं भवन्तं का अपि पिपीलिका कदापि दंष्टवती ? सा कीदृशी आसीत्-कृष्णा पिङ्गला वा ? स्थूला सूक्ष्मा वा ? अथवा अन्यप्रकारस्य ?

_____

- किं पिपीलिकाः भवतः पार्श्वे आयान्ति ? कदा?

_____

- काश्चित् सूक्ष्माः स्थूलाः च पिपीलिकाः सावधानं पश्यतु । पिपीलिकानां कति पादाः भवन्ति ?
- स्थूलानां पिपीलिकानां पादाः _____
- सूक्ष्माणां पिपीलिकानां पादाः _____
- उत्तरपुस्तिकायां पिपीलिकायाः चित्रं निर्माय वर्णं पूरयतु ।
- भवान् प्रायः भूमिफलीः खादित्वा तासाम् आवरणानि क्षिपति, तैः एव आवरणैः विविधवर्णयुक्तानां कीटानां निर्माणस्य प्रयासं करोतु । तेषु वर्णमपि पूरयतु ।



पञ्चमे पाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतशब्दाः	-	हिन्दीशब्दाः
मधुमक्षिकाः	-	मधुमक्खियाँ
जनपदः	-	जिला
भ्राता	-	भाई
महाविद्यालयः	-	कॉलेज
सरलम्	-	आसान
अजा	-	बकरी
सत्यकथा	-	सच्ची कहानी
मानचित्रम्	-	नक्शा
स्वप्नः	-	सपना
अन्तः	-	अन्दर
पङ्क्तिः	-	लाइन
आज्ञा	-	अनुमति
अधिकारः	-	हक
व्ययः	-	खर्चा
परिधानम्	-	वेशभूषा
स्यूतः	-	थैला, बस्ता
परामर्शः	-	सलाह
शनैः शनैः	-	धीरे धीरे
द्विचक्रिकायानम्	-	मोटरसाइकिल
व्रणः	-	चोट/घाव
लीचिका	-	लीची
ध्वनिः	-	आवाज
सहस्रम्	-	हजार

मधुरपेयम्	-	शरबत
शर्करा	-	चीनी
छत्रम्	-	छत्ता
भिषक्	-	दवाई
मासः	-	महीना
सूक्ष्मः	-	छोटा
शोथः	-	सूजना
मधु	-	शहद
उपहासः	-	मजाक
कीटः	-	कीडा
विलम्	-	बिल
भूमिफलीः	-	मूँगफली

षष्ठः पाठः

ओमनायाः यात्रा

ओमना तस्याः घनिष्ठा सखी राधा च बहुप्रसन्ने आस्ताम् । यतः ते रेलयानेन केरलं गच्छन्त्यौ स्तः । ओमना स्वमातामह्याः गृहं गतवती, राधा च स्वकुटुम्बेन सह अवकाशे भ्रमणार्थं गतवती । ओमनायाः पिता एव द्वयोः कुटुम्बयोः कृते चिटिकानाम् आरक्षणाय गतवान् । यात्रायाः दिनद्वयात् पूर्वम् एव राधा द्विचक्रिकायाः अपतत्, तस्मात्, तस्याः दक्षिणस्य पादस्य अस्थि क्षतम् अभवत् । चिकित्सकाः तस्याः दक्षिणपादे पट्टिकां कृतवन्तः षट्सप्ताहं यावत् चलनस्य च निषेधम् अपि कृतवन्तः । राधायाः कुटुम्बः स्वचिटिकाः निरस्तीकृतवान् । राधा ओमना च द्वे अपि उदासीने अभवताम् । यतः ते मिलित्वा यात्रायाः बहुसज्जां कृतवत्यौ। राधायाः माता एकम् उपायं दत्तवती । सा ओमनां कथितवती - यदा भवती यात्रां करिष्यति तदा स्वयात्राविषये सर्वं वृत्तान्तं स्वदैनन्दिन्यां लिखतु । यदा भवती पुनः अत्र आगमिष्यति तदा राधा भवत्याः दैनन्दिनीं पठिष्यति। अनेन यात्रायां भवत्याः समयः अपि सम्यक् व्यतीतः भविष्यति, सर्वासां वार्तानां स्मरणम् अपि च भविष्यति । उभाभ्यां सखीभ्याम् अयम् उपायः अरोचत । ओमना यात्रायै दैनन्दिनीं गृहीतवती, मार्गस्य सर्वाः वार्ताः च तत्र लिखितवती । ओमनायाः दैनन्दिन्याः काश्चित् पृष्ठान् भवान् अपि पठतु ।

ओमनायाः दैनन्दिनी -

16 मई

अयं मध्याह्नस्य समयः आसीत् । रेलस्थानकं गत्वा सर्वप्रथमं वयं स्वनामानि आरक्षणसूच्यां दृष्टवन्तः । शीघ्रम् एव रेलयानम् आगतम् । वयं दृष्टवन्तः यत् रेलयानं तु पूर्वम् एव आसीत् । अद्य प्रभाते एव एतत् रेलयानम् गान्धीधाम्नः कच्छात् चलितवत् । रेलयाने आगते सति कोलाहलः इव एकेन एव कपाटमार्गेण केचित् जनाः अवतरितवन्तः, तेन एव च मार्गेण आरोहणार्थं सङ्घर्षं कुर्वन्ति स्म ।

वयम् अपि यथा तथा आरूढवन्तः, स्वकीयाम् आसन्दिकां च अन्विष्य, स्वसामग्रीः तस्याः अधः स्थापिता । रेलयानस्य चलनात् पूर्वम् एव वयं सर्वे स्वकीयेषु आसन्देषु स्थितवन्तः । किञ्चित् समयानन्तरं चिटिकानिरीक्षकः आगतवान् । सः सर्वेषां चिटिकाः च निरीक्षितवान्। सः पश्यन् आसीत् यत् सर्वे निर्धारितासु आसन्दिकासु तिष्ठन्ति न वा । माता पिता च नीचैः आसन्दिके प्राप्तवन्तौ, उन्नी, अहं च मध्ये आसन्दिके प्राप्तवन्तौ ।

उपरि भागे ये आसन्दिके स्तः, तयोः द्वौ छात्रौ तिष्ठतः। पार्श्वे स्थितस्य कुटुम्बस्य उभौ अपि बालकौ मम समानवयसः एव स्तः । अहम् अवश्यं ताभ्यां सह वार्तां करिष्यामि, किन्तु किञ्चित् समयानन्तरम् ।

अहम् अधुना गवाक्षस्य पार्श्वे स्थिता सती एतत् सर्वं लिखामि । माता भोजनपेटिकाम् उद्घाटितवती । माता अवलेहः, निम्बुरससंयुक्तं तण्डुलं, मिष्ठान्नम्, अन्याः अपि भोजनसामग्रीः आनीतवती । अहं तु भोजनाय उत्सुका जाता । शेषाः वार्ताः अनन्तरं लेखिष्यामि ।

- रेलयानस्य कोष्ठकस्य कपाटमार्गे किमर्थं परस्परं सङ्घर्षः जातः?

  _____

  _____

- किं भवान् अपि कदाचित् रेलयाने यात्रां कृतवान्? कदा?

  _____

  _____

- यदि भवान् यात्रायां गमिष्यति, तदा काः काः भोजनसामग्रीः गृहीत्वा गन्तुम् इच्छति? किमर्थम् ?

  _____

  _____

- चिटिकानिरीक्षकस्य कानि कानि कार्याणि भवन्ति?

  _____

  _____

- भवान् चिटिकानिरीक्षकं कथं ज्ञास्यति?

  _____

  _____

१६ मईमासः

मध्याह्नस्य भोजनं कृत्वा केचित् जनाः सुप्ताः, परन्तु अहं निद्रां न प्राप्तवती । अहं गवाक्षात् बहिः पश्यन्ती आसम् । अत्र बहिः शुष्कानि पिङ्गलवर्णस्य स्थलानि आसन् । कुत्रचित् लघवः ग्रामाः अपि दृष्टाः । प्रतीतः भवति यत् एते सर्वे अपि धावन्ति । जानाति किम्, यदा रेलयानं तीव्रगत्या धावति, तदा बहिः स्थितानि सर्वाणि वस्तूनि विपरीतदिशायां धावन्ति इव दृश्यन्ते ।

किञ्चित् समयात् पूर्वम् उष्णता आसीत् । अधुना सायङ्कालः अस्ति, मन्दं मन्दं वायुः वहति । सूर्यः अस्तं गच्छति, अतः आकाशः केशरवर्णस्य सञ्जातः । अहमदाबादे कदाचित् अस्तं गच्छति सूर्ये मया अवधानम् एव न दत्तम् आसीत् ।

वयम् अचिरात् एव वलसाड़ इति स्थानकात् निर्गताः । तत्र रेलयानं द्विनिमेषं यावत् एव स्थितवत् आसीत् । रेलस्थानके खाद्यपेयवस्तूनां विक्रेतृणां बहु कोलाहलः आसीत् - "चायम्,

उष्णचायम् !"

अपरस्मात् स्थलात् ध्वनिः आगच्छति - "बटाटा बड़ा! बटाटा बड़ा!, शष्कुली-शाकम्!"," दुग्धम्! शीतलदुग्धम्! " तत्र केचित् जनाः खाद्यपदार्थान् विक्रीणन्ति स्म, केचित् जनाः च क्रीणन्ति स्म । वयं तु गवाक्षमार्गेण एव कदलीफलं चीकुफलं च क्रीतवन्तः ।

- ओमना गवाक्षात् बहिः किं दृष्टवती ?

_____

_____

- रेलस्थानके कानि कानि वस्तूनि विक्रीयन्ते ?

_____

_____

_____

_____

अहं समीपे तिष्ठद्भ्यां बालकाभ्यां सह मित्रतां कृतवः



ती । तौ स्तः- सुनीलः रामः च । तौ स्वपितामह्याः गृहं कोजाकोड इति स्थानं गच्छन्तौ आस्ताम् । सुनीलः मह्यं कथानां कानिचित् पुस्तकानि पठनाय दत्तवान् ।

अहं किञ्चित् समयात् पूर्वं हस्तौ पादौ च प्रक्षालनाय प्रसाधनकक्षे गतवती, किन्तु तत्र जलं समाप्तम् आसीत् । कश्चित् कथितवान् - जलं तु अग्रे स्थानके एव भरिष्यते ।

- रेलयानस्य प्रसाधनगृहे जलं किमर्थं समाप्तम् आसीत् ? चर्चां करोतु ।
- कल्पनां करोतु यत् भवान् रेलयाने सुदूरयात्रायै गमिष्यति । भवान् स्वमनोरञ्जनाय कानि कानि वस्तूनि गृहीत्वा यात्रां करिष्यति ?

अध्यापकाय-शिक्षकः गान्धीधाम, अहमदाबादः वलसाडः च गुजराते सन्ति । कोजीकोडः केरले अस्ति । बालकान् भारतस्य मानचित्रे गुजरातं केरलं च दर्शयेत्, तेन ते सरलतया अवगमिष्यन्ति यः मार्गः बहुदीर्घः अस्ति ।

- चित्राणि दृष्ट्वा लिखतु यत् रेलस्थानके एते जनाः किं कार्यं कुर्वन्ति ? चर्चां करोतु ।



षष्ठपाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	हिन्दी
चिटिका	-	टिकट
द्विचक्रिका	-	साइकिल
दक्षिणः	-	दाँया
अस्थि	-	हड्डी
उपायः	-	तरीका
प्रभातः	-	सुबह
कोलाहलः	-	शोर
चिटिकानिरीक्षकः	-	टिकट देखने वाला
अवलेहः	-	चटनी
शष्कुली	-	पूरी
शीतलदुग्धम्	-	ठंडा दूध
कदलीफलम्	-	केला
चीकुफलम्	-	चीकू
मार्गः	-	रास्ता
बहुदीर्घः	-	बहुत लम्बा



सप्तमः पाठः
गवाक्षात्

17 मई

अयं प्रातःकालः अस्ति । अहं ह्यः रात्रौ अचिरात् एव सुप्तवती । बहिः अन्धकारः आसीत्, अतः किमपि न दृश्यते स्म। अद्य प्रातःकाले यदा रेलयानं स्थगितं तदा मम निद्रा नष्टा अभवत्। बहिः सूचनापट्टे लिखितम् आसीत्-मडगांव । पिता उक्तवान् - अधुना वयं गोवाराज्ये स्मः ।

वयं स्थानके उत्तीर्य चायं पीतवन्तः, स्वकीयासु जलकूपीषु जलं च भरितवन्तः ।

रेलयानं पुनः चलितवत् । बहिः मनोरमं दृश्यम् आसीत् । परितः हारित्यम् आसीत् । स्थलस्य रक्तमृत्तिकायाम् उत्पन्नाः क्षुद्रपादपाः, वृक्षैः आवृताः लघुपर्वताः च बहुसुन्दराः आसन् । कुत्रचित् लघुतडागाः

अपि दृश्यन्ते । बहु दूरं पर्वतानां मध्ये जलं दृश्यते । अहं न जानामि तत्र नदी अस्ति समुद्रः वा । अत्र वायुः शीतलः अस्ति, अहमदाबादस्य वायुः इव उष्णः न अस्ति ।



रेलयानम् अचिरात् एव रेलमार्गद्वारात् निर्गतम् । रेलमार्गद्वारम् उभयतः बसयानेषु कारयानेषु ट्रकयानेषु द्विचक्रिकासु स्कूटरयानेषु रिक्शायानेषु वृषभशकटेषु अश्वशकटेषु च स्थिताः जनाः रेलयानस्य निर्गमनस्य प्रतीक्षारताः दृष्टाः। केचित् जनाः तु स्वयानानां यन्त्रम् (इंजन) अपि न पिदधति स्म । रेलमार्गद्वारे अत्यधिकः धूमः कोलाहलः च आसीत् । अहं दृष्टवती यत् केचित् जनाः पिहितं रेलमार्गद्वारम् अधः भूत्वा अपि पारं कुर्वन्ति । अहो, एतत् कियत् भयानकम् अस्ति ।

कदाचित् अस्माकं रेलयानम् अपरस्य रेलयानस्य अत्यन्तं पार्श्वात् अतिक्राम्यति । अहम् उन्नी च बहुवारं तस्य कोष्ठकानां गणनायाः प्रयासं कृतवत्यौ, परम् उभयोः रेलयानयोः तीव्रगतिकारणेन आवां कदापि शुद्धगणनां कर्तुं न शक्तवत्यौ ।

ओमना प्रथमदिने यत् दृश्यं दृष्टवती अपरस्मिन् दिने च यत् दृश्यं दृष्टवती, तयोः कः भेदः अस्ति?

_____

_____

_____

ओमना रेलमार्गद्वारम् उभयतः ईदृशानि कानि कानि वाहनानि दृष्टवती, यानि प्रस्तरतैलेन डीजलतैलेन वा चलन्ति ?

_____

_____

एतेभ्यः वाहनेभ्यः कोलाहलः धूम्रः च किमर्थम् उत्पन्नः भवति ?

_____

_____

वाहनानां कोलाहलस्य निवारणाय प्रस्तरतैलस्य डीजलतैलस्य च रक्षणाय वयं किं कर्तुं शक्नुमः ? चर्चां करोतु ।

_____

_____

चर्चां करोतु -

केचित् जनाः पिहितम् अपि रेलमार्गद्वारं पारं कुर्वन्ति । भवान् अस्मिन् विषये किं विचारयति ?

17 मई



अहं गवाक्षस्य पार्श्वे नेत्रयोः निमीलनं कृत्वा तिष्ठामि स्म । अकस्मात् रेलयानस्य चलनस्य ध्वनिः परिवर्तिता- खड़- खड़- खड़.....। अहं नेत्रयोः उन्मीलनं कृतवती । ऊहां करोतु, अहं किं दृष्टवती ? अस्माकं रेलयानं नद्याः उपरि निर्मिते सेतौ गच्छति स्म । अहो, सः दीर्घः सेतुः आसीत् । सेतौ धावतां रेलयानस्य चक्राणां ध्वनिः पृथक् एव भवति ।

यदा अहं गवाक्षात् नीच्चैः दृष्टवती, तदा अहं भयम् अनुभूतवती । रेलपट्टिकायाः नीच्चैः भूमिः न आसीत्, केवलं जलम् आसीत् ।

नद्यां काश्चित् नौकाः तटे च केचित् धीवराः दृश्यन्ते स्म । अहं तेभ्यः हस्तं चालयित्वा सङ्केतम् अपि कृतवती, न जानामि ते मां दृष्टवन्तः न वा । रेलयानस्य सेतुना सह एव एकः अपरः अपि अन्येषां वाहनानां कृते सेतुः निर्मितः आसीत् । सः सेतुः पृथक् प्रकारेण निर्मितः आसीत् । अहम् अनुभूतवती यत् रेलयानस्य सेतोः उपरि गमने अधिकः आनन्दः अस्ति ।

किं भवान् सेतुं दृष्टवान् ? कुत्र ?

_____

किं भवान् कदापि केनचित् सेतुना गतवान् ?

_____

सः सेतुः कस्य उपरि निर्मितः आसीत् ?

_____

भवान् सेतोः नीच्चैः किं दृष्टवान् ?

_____

अन्वेषणं करोतु, सेतूनां निर्माणं किमर्थं भवति ?

_____

_____

17 मई



व्यतीताः केचित् होराः बहुरोचकाः आसन्। स्वल्पाहारं कृत्वा अहम् उपरि गत्वा स्वस्य आसन्दिकायां स्थित्वा कॉमिक इत्यस्य पठने लग्ना अभवम् । बहिः तीव्रः आतपः आसीत् । अकस्मात् प्रगाढः अन्धकारः सञ्जातः । किञ्चित् शैत्यम् अपि अनुभूतम् । अहं भीता अभवम् । किञ्चित् क्षणानन्तरं रेलयानस्य अन्तःस्थिताः विद्युद्दीपकाः प्रकाशिताः अभवन् । किन्तु बहिः घोरः अन्धकारः आसीत् । कश्चित् बोधितवान् यत् वयं सुरङ्गमार्गेण गच्छामः । अयं पर्वतं कर्तयित्वा निर्मितः सुरङ्गः आसीत् ।



वयम् अनुभूतवन्तः यत् अस्य सुरङ्गस्य समाप्तिः न भविष्यति । यथा अकस्मात् अन्धकारः सञ्जातः आसीत् तथा एव पुनः प्रकाशः अभवत् । गवाक्षात् बहिः आतपः, प्रकाशः, हारित्यं च आसीत् । रेलयानं सुरङ्गात् बहिः आगतम् आसीत् । पिता कथितवान् यत् वयं पर्वतस्य अपरं भागं प्राप्तवन्तः । अधुना पर्यन्तं वयं चतुरः अन्यान् अपि सुरङ्गान् पारं कृतवन्तः । अधुना अहं सुरङ्गस्य विषये ज्ञातवती, अतः अहं न बिभेमि, अपितु आनन्दिता अस्मि ।

किं भवान् कदापि कस्माच्चित् सुरङ्गात् निर्गतवान् ? भवान् कथम् अनुभूतवान् ?

_____

गोवातः केरलं यावत् रेलयानस्य मार्गे द्विनवतिः सुरुङ्गाः, द्विसहस्रं सेतवः च सन्ति। भवान् किं विचारयति - एते सुरुङ्गाः सेतवः च केन कारणेन सन्ति?

_____

_____

- ओमना सेतोः नीच्चैः यानि दृश्यानि दृष्टवती, तेषां चित्रं स्वकीयायाम् उत्तरपुस्तिकायां लिखतु ।
- कल्पनां करोतु यदि इमे सुरुङ्गाः सेतवः च न स्युः, तदा ओमनायाः रेलयानं कथं पर्वतान् नदीः च पारं अकरिष्यत् ?

अयं मध्याह्नकालः अस्ति । वयम् उदिपीस्थानकात् यत् इडली-बडा इति खाद्यं क्रीतवन्तः, तत् खादित्वा वयं कदलीफलानि अपि क्रीतवन्तः । यद्यपि कदलीफलानि लघूनि आसन् तथापि स्वादिष्टानि आसन् । बहिः दृश्यं पुनः परिवर्तितम् अस्ति । अधुना वयं हरितानि क्षेत्राणि नारिकेलस्य बहून् वृक्षान् च पश्यामः । माता उक्तवती यत् अत्र धान्यस्य कृषिः भवति । बहिः सर्वं पृथक् दृष्टम् आसीत् - अत्रत्याः ग्रामाः, अत्र निर्मितानि गृहाणि च । जानाति किम् ? अत्रत्यानां जनानां वेशभूषा अपि अहमदाबादस्य जनानां वेशभूषातः पृथक् अस्ति । अधिकतराः जनाः श्वेतवर्णस्य धौतवस्त्रं, शाटिकाः वा धारयन्ति। अहमदाबादस्य अस्माकं बहवः सहयात्रिणः मध्ये प्राप्तेषु स्थानकेषु अवतीर्णवन्तः । केचित् जनाः आगताः अपि सन्ति ।

17 मई

वयं सायङ्काले षड्वादने कोजीकोड इति स्थानं प्राप्स्यामः । सुनीलस्य कुटुम्बः तत्र अवतरिष्यति । वयं परस्परं परिचयं कृतवन्तः, अहमदाबादे पुनः मेलनस्य योजनां च निर्मितवन्तः । भवान् अपि सुनीलेन रामेण च मिलित्वा प्रसन्नः भविष्यति ।

भवान् गृहे कां भाषां वदति?

गुजरातात् केरलं यावत् रेलयानं कस्मात् कस्मात् राज्यात् निर्गतम् ?



_____

ज्ञात्वा, स्वकीयायाम् उत्तरपुस्तिकायां तेषां सूचिनिर्माणं करोतु ।

_____

किं भवान् नारिकेलस्य जलं पीतवान् ? कथम् आसीत् ? चर्चां करोतु ।

_____

नारिकेलस्य वृक्षस्य चित्रनिर्माणं कृत्वा, तस्य विषये चर्चां करोतु ।

_____

ज्ञानं कुर्वन्तु, यत् इमाः भाषाः कुत्र भाष्यन्ते -

भाषा	**यत्र भाष्यते (राज्यम्)**
मलयालमः	_____
कोङ्कणी	_____
मराठी	_____
गुजराती	_____
कन्नड	_____

17 मई

अधुना रात्रिः सञ्जाता अस्ति । वयं स्वसामग्र्याः सज्जां कृतवन्तः । त्रिहोरानन्तरम् अस्माकं प्राप्तव्यं स्थानकं कोट्टायम इति आगमिष्यति । वयं तत्र अवतरिष्यामः । अद्य रात्रौ वयं मातृस्वसुः गृहं गमिष्यामः । ततः प्रातःकाले बसयानेन मातामह्याः गृहं गमिष्यामः । वयं सर्वे बहु श्रान्ताः स्म । अद्य रेलयाने अस्माकं द्वितीयं दिनं समाप्तिं प्रति अग्रेसरम् अस्ति । अहो ! वयं दीर्घां यात्रां समापितवन्तः । परम् आनन्दम् अपि प्राप्तवन्तः । अधुना अहं लेखनात् विरमामि । मातामह्याः गृहं प्राप्य एव पुनः दैनन्दिन्यां लेखिष्यामि ।

भवान् एतान् कथम् आह्वयति -

मातुः भगिनीम् _____

मातुः मातरम् _____

पितुः भगिनीम् _____

पितुः मातरम् _____

अध्यापकाय - विभिन्नराज्यानां भाषाविषये वेशभूषाविषये भोजनविषये भूभागविषये च ज्ञातुं बालकानां सहायतां कुर्यात् । मलयालमभाषायां वलियम्मा इत्युक्ते मातुः ज्येष्ठा भगिनी भवति । अम्मूमा च मातामही भवति ।

सप्तमपाठे प्रयुक्ताः शब्दाः

संस्कृतम्	-	हिन्दी
अन्धकारः	-	अन्धेरा
दृश्यते स्म	-	दिख रहा था
स्थगितं	-	रुका
उक्तवान्	-	कहा
उत्तीर्य	-	तरकर
जलकूपी	-	पानी की बोतल
पुनः	-	फिर
मनोरमम्	-	सुन्दर
परितः	-	चारो तरफ
हारित्यम्	-	हरियाली
स्थलस्य	-	मैदान की
रक्तमृत्तिकायां	-	लाल मिट्टी में
क्षुद्रपादपाः	-	छोटे पौधे
वृक्षैः	-	पेडों से
आवृताः	-	ढँकी
लघुपर्वताः	-	पहाडियाँ
लघुतडागाः	-	छोटे तालाब
बहुदूरं	-	बहुत दूर
मध्ये	-	बीच में
शीतलः	-	ठंडा
वायुः	-	हवा
रेलमार्गद्वारात्	-	रेलवे फाटक
निर्गतम्	-	निकला
उभयतः	-	दोनों ओर से बैलगाडी

अश्वशकटम्	-	घोडातांगा
अतिगमनस्य	-	निकलनें की
पिहितम्	-	बन्द किया
अधः भूत्वा	-	नीचे होकर
भयानकम्	-	खतरनाक
अतिक्राम्यति	-	गुजरती है
गणना	-	गिनने का

अष्टमः पाठः

मातामह्याः गृहं यावत्

18 मईमासः



रेलयानेन दीर्घयात्रानन्तरं वयं विलम्बेन रात्रौ कोट्टायमं प्राप्तवन्तः । मातृस्वसुः गृहं रेलस्थानकात् बहु दूरं न अस्ति । रेलस्थानकात् वयं द्वाभ्यां त्रिचक्रिकायानाभ्यां मातृस्वसुः गृहं प्राप्तवन्तः । अहम् अत्यन्तं निद्रातुरा आसम्, अतः स्नानं कृत्वा, भोजनम् अकृत्वा एव शयितवती । किन्तु किञ्चित् समयानन्तरं माता मां जागरितवती । ततः वयं सज्जिताः भूत्वा, स्वसामग्रीः गृहीत्वा बसयानस्य स्थानकाय निर्गतवन्तः । अधुना मातृस्वसुः कुटुम्बः अपि अस्माभिः सह एव आसीत् । वयं दश जनाः आस्म, बहुसामग्री च आसीत् ।

पिता सर्वेभ्यः चिटिकाः क्रीतवान्, वयं बसयाने च आरूढवन्तः । वयं तु उपवेशनाय आसन्दिकां प्राप्तवन्तः, किन्तु तदनन्तरं बसयानं पूर्णरूपेण जनैः पूर्णम् । द्वयोः जनयोः आसन्दिकासु चत्वारः चत्वारः जनाः उपविष्टाः आसन् । वयम् अपि काञ्चित् जनान् स्वकीयासु आसन्दिकासु उपावेशितवन्तः । इयं दीर्घा यात्रा आसीत् । यदा बसयानम् अन्तिमं स्थलं प्राप्तवत्, तदा मम पादयोः आतानः जातः । अहं स्थातुम् अपि न शक्ता आसम् । अहं प्रसन्ना आसम्, यत् वयं मातामह्याः ग्रामं प्राप्तवन्तः । किन्तु न, यात्रा अधुना अपि अवशिष्टा आसीत् । वयं बसयानात् यत्र अवतीर्णवन्तः, तत्र जलम् एव आसीत् । माता जलस्य दूरे पारे सङ्केतं कृतवती, यत्र मातामह्याः गृहम् आसीत्, कथितवती च - "तत्र पश्यतु! अस्माभिः तत्र प्राप्तव्यम् अस्ति। "अहं विचारितवती - "किन्तु वयं तत्र कथं गमिष्यामः।" तदा एव एका दीर्घा नौका तटे आगता। माता उक्तवती- "नौका (फैरी) आगता अस्ति । "नौकातः विद्यालयस्य बालकाः, महिलाः, पुरुषाः सर्वे अपि स्वकीयानि वस्तूनि गृहीत्वा अवतीर्णवन्तः। माता उक्तवती यत् तत्र जलस्य पारे गमनाय केवलं नौकायाः (फैरी) एव प्रयोगः भवति । यथा एव नौका (फैरी) रिक्ता अभवत्, तस्याम् आरोहणाय बहवः जनाशीघ्रम् एव नौका यात्रिभिः पूर्णा जाता, जले च तरीतुम् आरब्धवती । अहं तु स्तम्भकरस्य पार्श्वे स्थित्वा वातावरणं दृष्टवती । नौका (फैरी) तीव्रगत्या जले तरति स्म, तेन उभयतः जलम् उत्प्लवति स्म । तटे नारिकेलस्य वृक्षाः पङ्क्तौ स्थिताः आसन् । तत्र एव तटे, कुत्रचित् जनाः स्नानं कुर्वन्ति स्म, कुत्रचित् मत्स्यानां ग्रहणं कुर्वन्ति स्म । केचित् जनाः वस्त्राणां प्रक्षालनम् अपि कुर्वन्ति स्म ।

सूर्यास्तात् पूर्वम् एव नौका(फैरी) अपरं तटं प्राप्तवती, वयम् अपि च दीर्घया किन्तु आनन्दप्रदया यात्रया मातामह्याः गृहं प्राप्तवन्तः ।

- ओमना रेलयानात् अवतरणानन्तरं बहुषु वाहनेषु अतिष्ठत् । किं भवान् तेषां नामानि स्मरति ?

_____

_____

- भवान् केषु केषु वाहनेषु अतिष्ठत् ?

_____

_____

- भवान् सर्वाधिकम् आनन्दं केन वाहनेन यात्राकरणे प्राप्तवान् ? किमर्थम् ?

_____

- ओमना अहमदाबादात् 16 मई दिनाङ्के प्रस्थानं कृतवती, मातामह्याः गृहं यावत् कति होराः व्यतीताः?

_____

- कदाचित् भवान् दीर्घयात्रायां गतवान् ? कुत्र ?

_____

  - ❑ तस्यां यात्रायां भवान् कस्मिन् कस्मिन् वाहने अतिष्ठत् ? तेषां नामानि लिखतु ।

_____

_____

_____

अध्यापकाय - केरलस्य बहुषु भागेषु एकस्मात् स्थानात् अपरं स्थानं गन्तुं फैरी इत्यस्य अन्यप्रकारायाः च नौकायाः प्रयोगः भवति । चर्चां करोतु, इयं किमर्थं प्रयुज्यते? भवान् बालकान् तस्याः नौकायाः यात्राविषये अपि प्रष्टुं शक्नोति, यया नौकया बालकाः यात्रां कृतवन्तः ।

भवतः यात्रा कस्मिन् समये सम्पूर्णा अभवत् ?

_____

ओमनायाः पिता रेलयाने बसयाने नौकायां च यात्रायै चिटिकां क्रीतवान् । वदतु, अन्येषु केषु केषु वाहनेषु यात्राकरणाय चिटिकायाः आवश्यकता भवति ?

_____

_____

केषुचित् स्थानेषु प्रवेशाय चिटिकायाः आवश्यकता भवति । किं भवान् ईदृशं किमपि स्थानं जानाति ? तेषां नामानि लिखतु ।

_____

रेलयानस्य चिटिकां पश्यतु । निम्नलिखितबिन्दून् चिटिकायाम् अन्विष्य, तत्र पृथक् पृथक् चिह्नं करोतु, चर्चां च करोतु ।

रेलयानस्य अङ्काः _____

यात्रायाः आरम्भतिथिः _____

आसन्दिकायाः कोष्ठकस्य च क्रमाङ्कः _____

शुल्कः _____

दूरता (कि.मी.) _____

भवान् चिटिकां दृष्ट्वा अन्यत् किं किं ज्ञातुं शक्नोति ? लिखतु ।

- ❑ _____
- ❑ _____
- ❑ _____

रेलयानस्य समयसारण्या बहु ज्ञानं भवति, यथा रेलयानं कस्मिन् समये कतरद् रेलस्थानकं त्यक्ष्यति, कस्मिन् समये च कतरद् स्थानकं प्राप्स्यति ? कियत् दूरं गमिष्यति, इत्यादयः । वयं कस्मिंश्चित् अपि रेलस्थानके रेलयान-समयसारणीं क्रेतुं शक्नुमः ।

ओमना येन रेलयानेन यात्रां कृतवती, तस्याः समयसारण्याः कञ्चित् अंशं पश्यतु, अवगच्छतु, निम्नलिखितानां प्रश्नानां च उत्तरं ददातु ।

6335 नगरकोलएक्सप्रेस

क्रमाङ्कः	रेलस्थानकस्य नाम	प्राप्तिसमयः	रेलस्थानकात् प्रस्थानस्य समयः	दूरता	दिनम्
1	गांधीधाम	-	5.15	0	1
2	अहमदाबादः	11.30	11.50	301	1
3	वड़ोदरा	14.03	14.10	401	1
4	सूरतः	16.15	16.20	530	1
5	वलसाड़	17.23	17.25	598	1
6	भिवंडी रोड	21.10	21.12	772	1
7	मडगॉव	07.35	07.45	1509	2
8	उदिपी	12.06	12.18	1858	2
9	कोज़ीकोड	17.45	17.50	2165	2
10	त्रिचूर	21.05	21.10	2280	2
11	एरनाकुलम टाउन	22.35	22.40	2356	2
12	कोट्टायम	23.50	23.55	2418	2
13	त्रिवेन्द्रम सेण्ट्रल	03.05	03.10	2578	3
14	नगरकोइल	04.45	00.00	2649	3

- तालिकायां तेषां सर्वेषां स्थानकानां नामसु चिह्नं करोतु, येषां नामानि ओमनायाः दैनन्दिन्याम् आगतानि ।
- रेलयानं कस्मात् स्थानकात् प्रस्थानं कृतवती ?

_____

- रेलयानम् अहमदाबादस्थानके कियन्तं कालं यावत् स्थितवती ?

_____

- ओमना रेलयात्रायाः कस्मिन् दिने मडगॉवं प्राप्तवती ?

_____

- सुनीलः रामः च कोज़ीकोडस्थानके अवतीर्णवन्तौ, ओमना च कोट्टायमस्थानके । कोज़ीकोडस्थानकात् कतिभ्यः होराभ्यः पश्चात् कोट्टायमस्थानकं प्राप्यते?

_____

- रेलयानम् आरम्भतः अन्तपर्यन्तं कति किलोमीटरमितं यावत् यात्रां कृतवत् ?

_____

- ओमना रेलयानेन कतिकिलोमीटरमितं यावत् यात्रां कृतवती ?

_____

- किं भवते अपि दैनन्दिनी रोचते ? एकां दैनन्दिनीम् उत्तरपुस्तिकां वा स्वीकरोतु । तत्र प्रतिदिनं कस्यचित् सप्ताहस्य विशेषघटनाः, तासां विषये स्वविचारान् च लिखतु । स्वकीयां स्वमित्राणां च दैनन्दिनीं मिलित्वा पठतु ।

अध्यापकाय - शक्यं चेत्, शिक्षकः रेलमार्गस्य समयसारणीः छात्रेभ्यः दर्शयेत् । तस्याः पठने च तेषां सहायतां कुर्यात् । रेलमार्गस्य समयसारण्या गणितस्य भूगोलस्य च अपि बहव्यः क्रियाः कर्तुं शक्यन्ते ।

अष्टमपाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	**हिन्दी**
मातामही	-	नानी
मातृष्वसा	-	मौसी
त्रिचक्रिकायानम्	-	तीन पहियों वाला टेम्पू
सामग्री	-	सामान
स्थानकाय	-	अड्डा या स्टेशन के लिए
चिटिकाप्रदाता	-	कंडेक्टर
चिटिकाः	-	टिकट
यत्र	-	जहाँ
सङ्केतः	-	इशारा
नौका	-	नाव
स्तम्भकरः	-	रेलिंग
नारिकेलम्	-	नारियल
वृक्षः	-	पेड़
मत्स्यः	-	मछली
सप्ताहः	-	हफ़्ता

नवमः पाठः

परिवर्तमानाः कुटुम्बाः

अत्र सीतायाः श्यामस्य रमायाः च कुटुम्बस्य कानिचन चित्राणि सन्ति । चित्राणि दृष्ट्वा चर्चां करोतु ।

लघुः अतिथिः

सीतायाः कुटुम्बः प्रसन्नः अस्ति । तस्याः कुटुम्बे तस्याः लघुभगिन्याः जन्म अभवत् ।

चित्राणि दृष्ट्वा लिखतु

- सीतायाः कुटुम्बे तस्याः लघुभगिन्याः जन्मनः पूर्वं के के आसन् ?

  _____

- अधुना तस्याः कुटुम्बे आहत्य कति जनाः सन्ति ?

_____

वदतु -

- लघुभगिन्याः जन्मकारणात् सीतायाः कुटुम्बजनानां जीवने कानि कानि परिवर्तनानि भविष्यन्ति ? यथा -
  - ❑ अधुना सीता दिनस्य यापनं कथं करिष्यति ?
  - ❑ माता अधुना कानि कानि नव्यानि कार्याणि करिष्यति ?
  - ❑ सीतायाः लघुभगिन्याः जन्मकारणात् पितुः, पितामह्याः पितृव्यस्य च जीवने कानि परिवर्तनानि भविष्यन्ति ? किं भवान् वक्तुं शक्नोति, कथम् ?

अध्यापकाय - कक्षायां प्रत्येकं बालकाय स्वकीयान् अनुभवान् वक्तुम् अवसरः दातव्यः ।

- किं भवतः गृहे कस्यचित् प्रतिवेशिनः वा गृहे शिशोः जन्म अभवत् ?
- गृहे लघुशिशोः आगमनेन कथम् अनुभूयते ?
- एतेन गृहे कानि कानि परिवर्तनानि आगच्छन्ति ?
- भवतः गृहे कस्यचित् सम्बन्धिनः च गृहे यः सर्वेभ्यः लघुः बालकः अस्ति तस्य विषये किञ्चित् ज्ञानं करोतु, लिखतु च ।
  - ❑ तस्य जन्म कदा अभवत् ?

    _____
  - ❑ सः बालकः अस्ति बालिका वा ?

    _____
  - ❑ भवतः तेन सह कः सम्बन्धः अस्ति ?

    _____
  - ❑ तस्य जन्म कुत्र अभवत् ?

    _____
  - ❑ तस्य मुखं कुटुम्बे केन सदृशम् अस्ति ?

    _____
  - ❑ तस्य केशानां कः वर्णः अस्ति ?

    _____
  - ❑ तस्य नेत्रयोः कः वर्णः अस्ति ?

    _____
  - ❑ किं तस्य दन्ताः सन्ति ? तस्मै भोजनार्थं किं दीयते ?

    _____
  - ❑ अधुना तस्य लम्बता कियती अस्ति ?

    _____

- ❑ शिशुः दिने कतिवारं शयनं करोति ?

  _____

- ❑ सः कथं ध्वनिं करोति ?

  _____

- ❑ सः अधिकतरं कस्य पार्श्वे भवति ?

  _____

- ❑ स्वकीयायाम् उत्तरपुस्तिकायां शिशोः चित्रं संश्लेषयतु, अथवा स्वयं चित्रनिर्माणं करोतु ।

स्थानान्तरणं जातम् ।

श्यामस्य पिता स्वकार्यालयात् पत्रं प्राप्तवान्। तस्मिन् लिखितम् अस्ति यत् सः उच्चपदं प्राप्तवान्, अतः अधुना सः अन्यत् नगरं गमिष्यति ।



विचारं करोतु, यदा गीतायाः पिता कुटुम्बस्य जनान् पत्रम् अदर्शयत्, तदा सर्वे पृथक् पृथक् रूपेण कथम् अनुभूतवन्तः?

- पितुः स्थानान्तरणस्य कारणात् श्यामस्य कुटुम्बे किं किं परिवर्तनं भविष्यति ? यथा -
  - ❑ श्यामस्य कुटुम्बस्य के के जनाः तस्य पितुः नव्ये गृहे निवासं करिष्यन्ति ?
  - ❑ श्यामः अधुना कस्मिन् विद्यालये गमिष्यति ?
  - ❑ किं श्यामस्य मित्राणि परिवर्तितानि भविष्यन्ति ?
  - ❑ किं भवतः कुटुम्बे अपि कश्चित् वृत्तिकारणात् अन्यत् नगरं गतवान् ?
  - ❑ भवान् अनेन परिवर्तनेन किम् अनुभूतवान् ? चर्चां करोतु ।
- किं भवतः कक्षायां विद्यालये वा अपि अन्यस्मात् नगरात् बालकाः आगतवन्तः? यदि आगतवन्तः, तदा तैः सह वार्तालापं करोतु ।
  - ❑ ते कुतः आगतवन्तः ?
  - ❑ पूर्वस्य स्थानस्य विद्यालयः कथम् आसीत् ?
  - ❑ ते अत्र कां कां नवीनताम् अनुभूतवन्तः ?
  - ❑ किं तेभ्यः एतत् परिवर्तनं रोचितम् ?

विवाहः अस्ति ।

अद्य रमायाः गृहे सर्वे प्रसन्नाः सन्ति । तस्याः ज्येष्ठस्य पितृव्यपुत्रस्य विवाहः अस्ति ।





वदतु -

किम् अनेन विवाहेन रमायाः गृहे कानिचन परिवर्तनानि भविष्यन्ति ? कानि कानि परिवर्तनानि भविष्यन्ति ?

- ❑ यस्मात् गृहात् रमायाः नव्या भ्रातृजाया आगतवती, किं तस्मिन् कुटुम्बे अपि कानिचन परिवर्तनानि जातानि ? कानि कानि ?
- ❑ भवान् अपि स्वमातरं पितृव्यां मातुलानीं वा पृच्छतु यत् ताः विवाहात् पूर्वं कुत्र वसन्ति स्म ?
- ❑ तदा तासां कुटुम्बे के के आसन् ?
- ❑ किं भवतः कुटुम्बे अपि कस्यचित् सम्प्रति एव विवाहः अभवत् ? कस्य ?

- कक्षायाः मित्रैः सह वार्तां करोतु, पृच्छतु च तेषां कुटुम्बे विवाहः कथं भवति ?
  - ❑ किं विवाहे विशिष्टस्य भोजनस्य निर्माणं भवति ? किं किं विशिष्टं भवति ?

    _____

  - ❑ वरः कन्या च कीदृशानि वस्त्राणि धारयतः?

    _____

  - ❑ विवाहस्य नृत्यानि गानानि च कस्य प्रकारस्य भवन्ति ?

    _____

यदा भवान् कस्मिंश्चित् विवाहे गतवान्, तत्र भवान् किं किं दृष्टवान् ? स्वकीयायाम् उत्तरपुस्तिकायां तस्य चित्रनिर्माणं करोतु । कक्षायाः अन्येषाम् अपि बालकानां चित्राणि पश्यतु ।

वयं दृष्टवन्तः यत् सीतायाः श्यामस्य रमायाः च कुटुम्बेषु भिन्नैः कारणैः परिवर्तनानि अभवन् ।

परिवर्तनस्य कारणं लिखतु

- सीतायाः कुटुम्बे

  _____

  _____

- श्यामस्य कुटुम्बे

  _____

  _____

- रमायाः कुटुम्बे

  _____

  _____

- किं कुटुम्बेषु परिवर्तनानि अन्यैः अपि कारणैः भवितुं शक्यन्ते ? जानातु, कैः कैः कारणैः?

_____

_____

_____

- त्रिभिः ज्येष्ठैः जनैः वार्तां करोतु - प्रथमं भवतः कुटुम्बेन सह, द्वितीयं भवतः मित्रस्य कुटुम्बेन सह, तृतीयं भवतः प्रतिवेशिनः कुटुम्बेन सह । तान् निम्नलिखितान् प्रश्नान् पृच्छतु, तालिकायां च लिखतु ।

प्रश्नः	भवतः कुटुम्बः	मित्रस्य कुटुम्बः	प्रतिवेशिनः कुटुम्बः
भवतः कुटुम्बः कतिभ्यः वर्षेभ्यः अत्र निवसति ?			
अत्र आगमनात् पूर्वं भवतः कुटुम्बः कुत्र निवसति स्म ?			
अधुना भवतः कुटुम्बे कति जनाः सन्ति ?			
भवतः कुटुम्बे दशवर्षात् पूर्वं कति जनाः आसन् ?			
भवतः कुटुम्बे दशसु वर्षेषु यानि परिवर्तनानि अभवन्, तेषां कानि कारणानि सन्ति ?			
एतैः परिवर्तनैः भवान् कथम् अनुभवति ?			

अध्यापकाय - परिवर्तनं जीवनस्य भागः अस्ति । एतेषां परिवर्तनानां बालकेषु महान् प्रभावः भवितुम् अर्हति । अतः आवश्यकम् अस्ति यत् इयं चर्चा संवेदनशीलतापूर्वकं कर्तव्या ।

मम कुटुम्बः - ह्यः, अद्य, श्वः....

सर्वेषां कुटुम्बाः कैश्चित् कारणैः परिवर्तिताः भवन्ति । पश्यामः, भवतः कुटुम्बः अपि परिवर्तितः न वा ?

यदा भवतः पितामही पितामहः, मातामही मातामहः भवतः इव लघवः आसन्, किं तदा अपि भवतः कुटुम्बः तथा एव आसीत्, यथा अधुना अस्ति ?

स्मरति वा ? भवान् तृतीयकक्षायां सीतम्मायाः कुटुम्बस्य वृक्षस्य चित्रम् अपश्यत् ।

- भवान् स्वकुटुम्बस्य वृक्षस्य चित्रम् अपि निर्मितवान् । चलतु, पुनः कुटुम्बस्य वृक्षस्य चित्रनिर्माणं कुर्मः ।
- स्वपितामह्या पितामहीम् अथवा मातामहीं मातामहं पृच्छतु यत् यदा ते बालकाः आसन्, तदा तेषां कुटुम्बे के के आसन् ? स्वकीयायाम् उत्तरपुस्तिकायां तेषु कस्यचित् एकस्य बाल्यकालस्य कुटुम्बवृक्षस्य चित्रनिर्माणं करोतु ।
- किम् अस्मिन् कुटुम्बवृक्षे भवान् अथवा भवतः भ्राता, भगिनी, माता, पिता, कुत्रचित् दृश्यन्ते ?
- अधुना भवान् स्वस्य वर्तमानस्य कुटुम्बवृक्षस्य चित्रनिर्माणं स्वकीयायाम् उत्तरपुस्तिकायां करोतु ।
- अस्मिन् कुटुम्बवृक्षे भवान् कुत्र अस्ति ? अधुना भवतः कुटुम्बे के के सन्ति ? भवतः पितामही, पितामहः च अथवा मातामही, मातामहः च कुत्र सन्ति ?

वदतु -

भवतः वर्तमानस्य कुटुम्बवृक्षः भवतः पितामह्याः पितामहस्य, मातामह्याः मातामहस्य वा बाल्यकालस्य कुटुम्बवृक्षात् कथं भिन्नः अस्ति ?

विद्यालये पुनः आगमनम्

- भवान् कति कक्षां यावत् पठितुम् इच्छति ?

  _____

- भवतः माता पिता च कति कक्षां यावत् पठितवन्तौ ?

  _____

- भवतः पितामही मातामही वा कति कक्षां यावत् पठनस्य अवसरं प्राप्तवत्यौ ?

  _____

- भवतः पितामह्याः मातामह्याः च विवाहः कियति आयुषि अभवत् ?

  _____

- युवकानां युवतीनां च विवाहस्य न्यूनतमम् आयुः किं भवेत् ? अस्मिन् विषये या न्यायव्यवस्था अस्ति, किं भवान् तस्य विषये श्रुतवान् ?

  _____

  _____

बह्व्यः तथा अपि बालिकाः सन्ति यासां विवाहः अष्टादशवर्षस्य आयुषः पूर्वम् एव भवति । एतासु बह्व्यः तु विद्यालयस्य त्यागाय अपि विवशाः भवन्ति । रङ्गारेड्डी इति जनपदस्य सुशीला इव बह्वीनां बालिकानां सत्यकथाः सन्ति, याः पुनः विद्यालयगमनम् आरम्भं कृतवत्यः । ग्रामसभा अपि अग्रे पठनाय सुशीलायाः सहायतां कृतवती । ग्रामसभायाः वचनम् आसीत् यत् बालकानां कृते पठनं खेलनं च बहु आवश्यकम् अस्ति । तेषां बाल्यकाले एव विवाहः न करणीयः । आन्ध्रप्रदेशे जनानां कश्चित् समूहः विशेषं शिविरम् आयोजयति । अनेन शिविरेण विवाहितानां बालिकानां पुनः विद्यालयं गन्तुं सहायता क्रियते । जङ्गम्मा चिट्टी च कथयतः यत् ते आत्माश्रितं भवितुम् इच्छतः ।

जानातु लिखतु च -

किं भवान् अपि तान् बालकान् जानाति, येषां कैश्चित् कारणैः विद्यालयगमनम् अवरुद्धम् ? तैः सह वार्तां कृत्वा जानातु यत् किं ते पुनः पठितुम् इच्छन्ति।

_____

_____

ते बालकाः अधुना किं कुर्वन्ति ?

_____

किं गतेषु केषुचित् दिनेषु भवतः गृहे कस्यचित् अपि विवाहः अभवत् ? कस्य ?

_____

जानातु, वरस्य कन्यायाः च किम् आयुः आसीत् ?

_____

तौ कीदृशानि वस्त्राणि धारितवन्तौ ?
कन्या-

_____

वरः-

_____

तदा किं किं भोजनं निर्मितम् आसीत् ?

_____

_____

अध्यापकाय - मध्ये एव बालकानां शिक्षायाः अवरोधनस्य विषये, बालविवाहस्य विषये (बालिकानां विवाहः अष्टादशवर्षस्य आयुषः पूर्वं, बालकानां च एकविंशतिवर्षस्य आयुषः पूर्वं न भवेत्) अधिनियमः अस्ति, तस्य विषये यदि आवश्यकं भवेत् तदा चर्चा कारयितुं शक्यते ।

नवमे पाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	**हिन्दी**
पितृव्यः	-	चाचा
अवसरः	-	मौका
प्रतिवेशी	-	पड़ोसी
शिशुः	-	बच्चा
कदा	-	कब
कुत्र	-	कहाँ
दन्तः	-	दाँत
ध्वनिः	-	आवाज
पत्रम्	-	चिट्ठी
यदा	-	जब
तदा	-	तब
नव्यम्	-	नया
वृत्तिः	-	नौकरी
वार्तालापः	-	बातचीत
पितृव्यपुत्रः	-	चाचा का लड़का
विवाहः	-	शादी
भ्रातृजाया	-	भाभी
पितृव्या	-	चाची
मातुलानी	-	मामी
ज्येष्ठः	-	बड़ा
श्वः	-	आने वाला कल
भ्राता	-	भाई
भगिनी	-	बहन
भिन्नः	-	अलग
न्यायव्यवस्था	-	कानून व्यवस्था
सत्यकथाः	-	सच्ची कहानियाँ

अवरोधनम् - रुकावट



दशमः पाठः

हु तू तू हु तू तू

हु-तू-तू, हु-तू-तू, हु-तू-तू, हु-तू-तू हु-तू-तू
आउट, आउट, (प्रधानस्थानस्य एकतः स्थिताः सर्वाः बालिकाः उच्चैः अवदन्)
हु-तू-तू, हु-तू-तू, हु-तू-तू,.....(इतः ग्रहणं कुर्वन्तु)
हु-तू-तू, हु-तू-तू, हु-तू-तू,....(पादस्य ग्रहणं कुर्वन्तु, पादस्य, पादस्य, अस्याः पादस्य ग्रहणं कुर्वन्तु)
हु-तू-तू , हु-तू-तू,... (वसुधा अत्र आगच्छतु इतः ग्रहणं करोतु)
अरे, श्यामलायाः हस्तेन रेखा न स्पृष्टा भवेत्, तस्याः हस्तं गृह्णातु ।
हु-तू-तू , हु-तू-तू,..। स्पृष्टा, स्पृष्टा । अहो।
आउट, आऽऽऽऽ,उउउउउ टटटट । सर्वे बहिजाताः । हो हो हो भवत्याः तु सर्वः समूहः बहिः अभवत् ।

एताः बालिकाः किं कुर्वन्ति ? बहिः बहिः इति ध्वनिः आगच्छति, इत्युक्ते स्पष्टम् अस्ति यत् काचित् क्रीडा प्रचलति ।

भवान् एतां क्रीडां केन नाम्ना जानाति ? चेडुगुडु हु-तू-तू, हा डू-डू, छू किट-किट, कबड्डी - केनचित् अन्येन नाम्ना वा ?

यदा श्यामलां षट् बालिकाः आवृत्य गृहीतवत्यः, तदा सर्वे अनुभूतवन्तः यत् सा तु बहिः अभवत् । काचित् तस्याः पादौ गृहीतवती, काचित् हस्तौ, काचित् कटिम् । परन्तु श्यामला कुत्र त्यजेत्, सा सङ्घर्षं कृत्वा मध्यरेखां स्पृष्टवती एव । श्यामला यदा मध्यभागस्य रेखां स्पृष्टवती, तदा अपरस्य पक्षस्य सर्वाभिः बालिकाभिः सा गृहीता आसीत्, अतः ताः सर्वाः एव बहिः अभवन् । परन्तु रोज़ी विवादं कृतवती । तस्याः कथनम् आसीत् यत् श्यामलायाः तु श्वासः मध्ये एव त्यक्तः जातः, अतः तस्याः समूहः बहिः न आसीत् । किन्तु श्यामला स्वकथने दृढा अभवत् यत् सा श्वासं न त्यक्तवती ।

अध्यापकाय - अध्यापकः अनया क्रीडया बालकान् प्रेरयेत् यत् क्रीडावत् जीवने अपि नियमाः आवश्यकाः सन्ति । नियमेन एव सर्वाणि कार्याणि सरलतया भवन्ति । अस्माकं मध्ये परस्परं विवादाः मतभेदाः च भवन्ति एव, किन्तु तेषां समाधानम् अपि भवति ।

सा पृष्टवती यत् यदि अहं मध्ये श्वासं त्यक्तवती तदा किमर्थं भवत्यः माम् एतावन्तं कालं यावत् गृहीतवत्यः। बहु विवादः सञ्जातः, परम् अन्ते श्यामलायाः एव जयः अभवत् ।

- ❑ भवतः ग्रामे कबड्डी इति क्रीडायाः एकस्मिन् पक्षे कति क्रीडकाः भवन्ति ?

  _____

- ❑ श्यामला यदा मध्यभागस्य रेखां स्पृष्टवती, तदा कति बालिकाः बहिः अभवन् ?

  _____

- ❑ किं भवान् क्रीडायाः विवादानां शमनस्य उपायान् जानाति ?

  _____

  _____

कबड्डी इति क्रीडा

एवम् एव अस्ति, कबड्डी क्रीडा । कर्षणम्-विकर्षणम्, शक्तिपूर्वकम् आकस्मिकं ग्रहणं, बलप्रयोगः, उच्चैः ध्वनिकरणम्, मृत्तिकायां कर्षणम् । यद्यपि इयं कोलाहलस्य क्रीडा अस्ति, किन्तु अत्र बहवः नियमाः अपि सन्ति ।

अस्यां क्रीडायां बहु आनन्दः अपि प्राप्यते । व्यायामः अपि भवति । श्वासस्य रोधनं कृत्वा कबड्डी कबड्डी इति उच्चारणं करोतु , एवं च खेलतु धावतु । सह एव अपरस्य पक्षस्य क्रीडकानां स्पर्शस्य प्रयासम् अपि करोतु । यावत् कालपर्यन्तं श्वासस्य अवरोधने सक्षमः भविष्यति, तावत् एव अपरं पक्षं गत्वा चमत्कारं करिष्यति ।

कबड्डीक्रीडायां शरीरस्य बुद्धेः च उभयोः एव प्रयोगः भवति । कर्षणे रोधने वा बलप्रयोगं करोतु, सह एव विचारयतु यत् अपरस्य पक्षस्य समूहे केन मार्गेण प्रविशेत् । ईदृशः कः अस्ति यं स्पृष्ट्वा शीघ्रतया स्वपक्षे आगमनं सरलम् अस्ति । यदि गृहीतः अभविष्यत् तदा मध्यभागस्य रेखां यावत् कथम् अगमिष्यत् ।

अध्यापकाय - अनेकवारं बालकाः क्रीडायाम् अपि लिङ्गाधारेण जातेः आधारेण वर्गस्य आधारेण वा भेदभावं पश्यन्ति । अस्मिन् विषये चर्चां कर्तुं शक्यते ।

- श्वासं निरुध्य कबड्डी कबड्डी इति उच्चारणं कृत्वा पश्यतु । कति वारम् उच्चारणं कर्तुं शक्तः अभवत् ?
- किं कबड्डीक्रीडायाः समये अपि एतावत् एव उच्चारणं कर्तुं शक्तः अस्ति ? कश्चित् भेदः अस्ति वा ?

पुनः यदि कदापि कबड्डीं क्रीडिष्यति, तदा ध्यातव्यं भवेत् यत् नेत्रयोः हस्तयोः पादयोः सामञ्जस्यम् आवश्यकम् अस्ति ।

- श्यामला अपरं पक्षं युगपत् एव बहिः कृतवती । उत्तरपुस्तिकायाम् एतत् चित्रनिर्माणं करोतु ।
- बहिः इति किं भवति ? कबड्डीक्रीडायां कदा कदा बहिः भवति ?

_____

_____

- बह्वीषु क्रीडासु क्रीडकस्य स्पर्शः बहु आवश्यकः भवति, यथा- खो-खो इति क्रीडायां स्पर्शनात् बहिः भवति, स्पर्शात् एवं च पर्यायः प्राप्यते । अन्यासाम् अपि क्रीडानां नामानि वदतु, यासु क्रीडकानां स्पर्शः आवश्यकः भवति ।

_____

- कबड्डी क्रीडायां श्यामला मध्यरेखां स्पृष्टवती, तेन सर्वे बहिः अभवन् । अन्याः काः क्रीडाः सन्ति यासां मध्यरेखायाः महत्त्वं भवति ।

_____

- अन्यासाम् अपि क्रीडानां नामानि वदतु, यासु क्रीडकम् अतिरिच्य वर्णानां वस्तूनां वा स्पर्शः क्रियते ?

_____

अध्यापकाय - कोष्ठके प्रदत्तं क्रियाकलापं कस्यचित् ज्येष्ठस्य शिक्षकस्य वा सन्निधौ एव कर्त्तव्यः ।

किं भवान् कबड्डीं क्रीडति ? किं भवतः विद्यालये बालिकानां कबड्डीसमूहः अस्ति ? एकां वार्तां वदतु । किं भवतः पितामही मातामही वा कबड्डीं क्रीडति स्म ? अद्य गृहं गत्त्वा पृच्छतु ।

किं भवतः नगरे बालिकाः कबड्डीक्रीडां, काचित् अन्यां वा क्रीडां या, बहिः क्रीड्यते, तां क्रीडन्ति ? किं काश्चित् बालिकाः न क्रीडन्ति ? ताः किमर्थं न क्रीडन्ति ? चर्चां करोतु ।

कर्णनममल्लेश्वरी

किं भवान् समाचारपत्रे एतस्याः विषये पठितवान् ? कर्णनममल्लेश्वरी भारोत्तोलिका अस्ति । इयम् आन्ध्रप्रदेशस्य निवासिनी अस्ति । अस्याः पिता आरक्षकः अस्ति । यदा इयं द्वादशवर्षीया आसीत्, ततः एव भारोत्तोलनस्य अभ्यासम् आरब्धवती । अधुना इयं 130 किलोग्रामं यावत् भारोत्तोलने समर्था अस्ति ।

इयं भारतात् बहिः 29 पदकान् जितवती । तस्याः चतस्रः भगिन्यः अपि प्रतिदिनं भारोत्तोलनस्य अभ्यासं कुर्वन्ति ।

तिसृणां भगिनीनां कथा

एतत् चित्रं पश्यतु । एताः पितामही मातामही इव प्रतिभान्ति । परम् एताः विशेषाः सन्ति । एतानि चित्राणि सन्ति तिसृणां भगिनीनाम् एतासां नामानि सन्ति- ज्वाला, लीला हीरा च । एताः मुम्बय्यां निवसन्ति । एताः तिस्रः कबड्डीं क्रीडन्ति स्म, अन्यान् अपि च शिक्षयन्ति स्म । ज्वाला वदति - यदा वयं बालिकाः आस्म, तदा बालिकानां कृते अस्याः क्रीडायाः आज्ञा न दीयते स्म । जनानां विचारः आसीत् यत् यदि बालिकाः इमां क्रीडां क्रीडिष्यन्ति, तदा

कश्चित् अपि ताभिः सह विवाहं न करिष्यति । अस्यां क्रीडायां पुरुषाणां वस्त्राणि धार्यन्ते, अनेन कारणेन अपि बालिकानां कृते अस्याः क्रीडायाः निषेधः आसीत् ।

यदा तिस्रः एव भगिन्यः लघ्व्यः आसन्, तदा एव तासां पितुः मृत्युः अभवत् । तासां माता मातुलौ च तासां पालनं कृतवन्तौ । उभौ एव मातुलौ खो-खो, कबड्डीं च क्रीडतः स्म । ताभ्यां मातुलाभ्याम् एव अस्याः क्रीडायाः रुचिः, एतासु भगिनीषु आगता ।

ज्वाला लीला च कथयतः- पञ्चाशत् (50) वर्षात् पूर्वं, यदा वयं कबड्डीं क्रीडितुं आरब्धवत्यः, तदा बालिकानां पार्श्वे कबड्डीक्रीडनस्य अवसराः न आसन् । माता पिता अपि सहायतां न कुरुतः स्म, किन्तु वयं विचारयामः स्म यत् बालिकाः अपि इमां क्रीडाम् अवश्यं क्रीडेयुः । माता मातुलौ च अस्मान् कदापि न अवरुद्धवन्तौ । वयम् कबड्डीं शिक्षितवत्यः, स्वप्रतिवेशिनः काश्चित् बालिकाः अपि तस्यां क्रीडायां भागं दत्तवत्यः । वयं कबड्डीक्रीडायाः एकस्याः समितेः निर्माणं कृतवत्यः, सा समितिः अधुना अपि कार्यं करोति ।

स्मृताः ते दिवसाः !

लीला हीरा च स्वक्रीडास्पर्धायाः विषये वदतः । ते बह्व्यः क्रीडास्पर्धाः तु बहुकठिनतया जितवत्यौ, यतः ते मनसि निश्चयं कृतवत्यौ यत् कदापि पराजयं न अङ्गीकरिष्यावः । स्पर्धायाः दिनेषु बहुवारं मनोरञ्जिकाः घटनाः अपि घटिताः । एकदा ते अपरं नगरं कस्यैचित् महत्यै क्रीडास्पर्धायै गतवत्यौ । "स्पर्धा सायङ्काले 6.30 वादने आसीत्, आवां मध्याह्ने 3 वादनतः 6 वादनं यावत् चलचित्रं द्रष्टुं गतवत्यौ । आवां विचारितवत्यौ यत् स्पर्धायाः आरम्भात् पूर्वम् एव प्रत्यागमिष्यामः । चलचित्रस्य आरम्भस्य किञ्चित् क्षणानन्तरम् एव तत्र कोलाहलः जातः । वयं ज्ञातवन्तः यत् मातुलः अस्माकम् अन्वेषणं कुर्वन् तत्र आगतवान् ।

अध्यापकाय - एतैः उदाहरणैः बालकानाम् अवधानं तस्मिन् विषये आकर्षयेत् यत् बहुवारं बालिकाः बालकानाम् इव अवसरं न प्राप्नुवन्ति । अस्मिन् विषये चर्चा कारयितुं शक्यते । मातुः भ्राता मातुलः कथ्यते । बालकान् पृच्छेत् यत् ते स्वमातुः भ्रातरं किं कथयन्ति ।

तस्य हस्ते विद्युज्झिङ्गिनी (टॉर्च) आसीत् । सः प्रत्येकं जनस्य मुखं टॉर्चमाध्यमेन दर्शनस्य प्रयासं करोति स्म। मातुलः तत्र एव सर्वेषां सम्मुखे एव अस्मान् तर्जितवान्। तासां तिसृणां भगिनीनां जीवने कबड्डीक्रीडायाः विषये बह्व्यः बाधाः आगताः, किन्तु क्रीडायाः आनन्दः कदापि न्यूनः न जातः। लघुभगिनी हीरा तु कबड्डी-प्रशिक्षिका अपि अभवत् । एताः भगिन्यः इच्छन्ति यत् भवन्तः विद्यालयस्य छात्राः रुचेः अनुसारं क्रीडां क्रीडन्तु, कबड्डीं तु विशेषेण क्रीडन्तु ।

- किं भवन्तः केन अपि प्रशिक्षकेण काञ्चित् अपि क्रीडां प्रशिक्षितवन्तः?
  कां क्रीडाम् ?

  _____

- किं भवान् कञ्चित् जानाति, यः केनापि प्रशिक्षकेण काञ्चित् अपि क्रीडां प्रशिक्षितवान् ?

  _____

चर्चां करोतु

- प्रशिक्षकः कथं प्रशिक्षयति ? सः कथम् अभ्यासं कारयति ? क्रीडकाः कियन्तं परिश्रमं कुर्वन्ति ?
- किं भवान् कदापि स्वरोचितायाः क्रीडायाः समितेः निर्माणस्य विषये चिन्तितवान् ?
- विचारं करोतु, पञ्चदशानां बालकानां समूहः द्वयोः समूहयोः विभज्य खो-खो क्रीडां क्रीडितुम् इच्छति । उभयोः समूहयोः सप्त सप्त क्रीडकाः भविष्यन्ति । एकः क्रीडकः अवशिष्टः भविष्यति, अन्यथा उभयोः पक्षयोः समाः सदस्याः न भविष्यन्ति । अस्यां स्थितौ भवान् किं करोति ? किं भवान् क्रीडायां कदाचित् मध्यस्थः वृश्चिकः अभवत् ? तस्य विषये वदतु ?
- प्रत्येकं क्रीडायां केचित् नियमाः भवन्ति । सा क्रीडा तैः एव नियमैः सञ्चालिता भवति । यदि तेषु नियमेषु किञ्चित् परिवर्तनं भवेत् तदा क्रीडायां किं परिवर्तनं भविष्यति ? यथा - क्रिकेटक्रीडायां विकेट इत्यस्य उपरि याः गुल्लिकाः, तासां पतनेन बल्लेबाजः बहिः भवति - एषः नियमः अस्ति । विचारयतु यदि नियमः भवेत् यत् त्रयाणां विकेटानां पतिते सति सर्वः समूहः (टीम) बहिः भविष्यति । किं क्रीडायाम् आनन्दः भविष्यति ?
- अनेन नियमेन क्रीडायाः अनुभवं करोतु । कासाञ्चित् क्रीडानां पृथक् पृथक् नियमान् निर्माय भवान् अपि क्रीडतु ।

दशमपाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	हिन्दी
बालिका	-	लड़की
क्रीडा	-	खेल
कटिः	-	कमर
यदा	-	जब
विवादः	-	बहस
श्वासः	-	साँस
परस्परम्	-	आपस में
समाधानम्	-	हल
क्रीडकः	-	खिलाड़ी
कर्षणम्	-	खींचना
आकस्मिकम्	-	अचानक
मृत्तिका	-	मिट्टी
व्यायामः	-	कसरत
स्पर्शः	-	छूना
शीघ्रम्	-	जल्दी से
सामञ्जस्यम्	-	तारतम्य
युगपत्	-	एक साथ
पर्यायः	-	पारी
भारोत्तोलिका	-	वजन उठाने वाली
फिल्म	-	चलचित्रम्
मातुलः	-	मामा
विद्युज्झिङ्गिनी	-	टॉर्च
रुचिः	-	पसन्द
प्रशिक्षकः	-	सिखाने वाला
समः	-	बराबर
वृश्चिकः	-	बिच्छू

एकादशः पाठः

पुष्पवाटी

उत्तराखण्डे पर्वतानां मध्ये एकं तादृशम् अपि स्थानम् अस्ति यत्र पुष्पाणि एव उत्पन्नानि भवन्ति । इयं पुष्पाणाम् उपत्यका इति कथ्यते । कुत्रचित् गुल्मानां मध्ये रक्तपुष्पाणि दृश्यन्ते, कुत्रचित् पाषाणानां मध्ये श्वेतपुष्पाणि दृश्यन्ते । पीतपुष्पाणां कट इव अपि कुत्रचित् दीर्घे क्षेत्रे प्रसृता अस्ति । कुत्रचित् शस्यानां मध्ये लघूनि लघूनि तारकाणि इव नीलपुष्पाणि अपि सन्ति । एतत् सर्वं स्वप्नम् इव प्रतिभाति वा ? आम्, अस्याम् अपि घाट्याम् एतानि बहूनि पुष्पाणि कञ्चित् सप्ताहं यावत् एव विकसन्ति । नेत्रे निमील्य कल्पनां करोतु यत् भवान् अपि एतादृशे एव स्थाने अस्ति । कथम् अनुभूतवान् ? किं गीतं गातुम् इच्छति ? गायतु ।

- किं भवान् कुत्रचित् अनेकेषां वर्णानां विकसितानि पुष्पाणि दृष्टवान् ? कुत्र ?

  _____

- भवान् कियतां वर्णानां पुष्पाणि दृष्टवान् ? तेषां वर्णानां नामानि लिखतु ।

  _____

  _____

- भवान् कस्य कस्य वर्णस्य पुष्पाणि दृष्टवान् ? गणनायाम् एव लग्नाः किम् ?

किं भवतः गृहे कानिचन तादृशानि वस्तूनि सन्ति, येषु पुष्पाणाम् आकृतिः निर्मिता अस्ति, यथा - वस्त्राणि, शय्यावस्त्रम्, पुष्पपात्रम् इत्यादयः ।

- निम्नलिखिते कोष्ठके एका सुन्दराकृतिः अस्ति ।

अत्र दर्शिता आकृतिः मधुबनी इति कथ्यते। इयं प्राचीना चित्रकला अस्ति । जानाति किम्, अस्याः नाम मधुबनी किमर्थं कृतम् ? बिहारे राज्ये मधुबनी इति नामकः कश्चित् जनपदः अस्ति । उत्सवेषु प्रसन्नतायाः अवसरेषु च तत्र गृहस्य भित्तिषु प्राङ्गणे च एवं चित्ररचना क्रियते । पिष्टे धान्यचूर्णे वर्णानां मिश्रणं कृत्वा, तैः एतानि चित्राणि निर्मितानि क्रियन्ते । एते वर्णाः अपि विशेषप्रकारस्य भवन्ति । एतेषां निर्माणं कर्तुम् अपि नीलं, हरिद्रा, पुष्पाणां वृक्षाणां च वर्णानां प्रयोगः क्रियते । चित्रेषु मनुष्याः पशवः वृक्षाः पुष्पाणि पक्षिणः मत्स्याः एवम् अन्ये अपि जीवाः जन्तवः च सह एव निर्मिताः भवन्ति ।

स्वयम् एव काञ्चित् आकृतिं निर्माय तस्यां वर्णान् पूरयतु ।

- स्वमित्रस्य निर्मिताः आकृतीः अपि पश्यतु ।

अध्यापकाय - बालकान् मानचित्रे उत्तराखण्डम् अन्वेषणाय प्रेरयेत् ।

पुष्पाणां संसारः

निम्नलिखितेषु पुष्पेषु यत् पुष्पं भवान् जानाति तस्य समक्षे (✓) चिह्नं करोतु। यदि जानाति तदा तेषां नामानि अपि चित्रस्य नीचैः लिखतु।



- उपरि प्रदर्शितेषु पुष्पेषु, यानि पुष्पाणि भवान् जानाति, तेषु द्वयोः नामानि वदतु -
- ये वृक्षेषु विकसन्ति _____ _____
- गुल्मेषु विकसन्ति _____ _____

- लतासु विकसन्ति _____ _____
- जलस्य वनस्पतिषु विकसन्ति _____ _____
- केवलं रात्रौ विकसन्ति _____ _____
- केवलं दिने विकसन्ति _____ _____
- यानि भवान् नेत्रे निमील्य सुगन्धेन अपि ज्ञातुं शक्नोति _____ _____
- यानि कस्मिंश्चित् विशेषे मासे एव विकसन्ति _____ _____
- यानि प्रत्येकं वर्षे एकवारम् एव विकसन्ति _____ _____

किं तादृशाः अपि वृक्षाः सन्ति, कदाचित् अपि पुष्पाणि न विकसन्ति । ज्ञात्वा लिखतु ।

_____

एतत् किमर्थम् ?

- किं भवान् एतादृशं सूचनापट्टं कुत्रचित् लग्नं दृष्टवान् ?
- किं सूचनापट्टे सति अपि जनाः पुष्पाणां ग्रहणं कुर्वन्ति ?
- भवान् किम् अनुभवति, ते किमर्थम् एतत् कुर्वन्ति ?
- किम् एतत् उचितम् अस्ति ?
- यदि सर्वे जनाः एवं कुर्युः तदा किं भविष्यति ?

गच्छतु समीपं गत्वा पश्यामः -

ये बालकाः पुष्पाणि आनेतुं शक्ताः सन्ति, ते कक्षायां द्वित्राणि पुष्पाणि आनयेयुः । ध्यातव्यं भवेत् यत् वृक्षात् पतितानि पुष्पाणि एव एकत्रितानि कर्तव्यानि, न तु त्रोटव्यानि । त्रयाणां चतुर्णां वा बालकानां समूहनिर्माणं करोतु, किञ्चन पुष्पं ध्यानेन पश्यतु, लिखतु च -

- पुष्पस्य वर्णः कः अस्ति ?

  _____

- अस्य सुगन्धिः कथम् अस्ति ?

  _____

- अस्य आकारः कीदृशः अस्ति ? घण्टिका इव, कटोरिका इव, दन्तमार्जनी इव, केनचित् अन्येन तुल्यं वा ?

  _____

- किम् एतानि पुष्पाणि गुच्छे सन्ति ?

  _____

- अस्य पुष्पस्य कियन्ति दलानि सन्ति ?

  _____

- दलानि परस्परं युक्तानि सन्ति पृथक् पृथक् वा ?

  _____

- दलानां बहिः किमपि हरितपत्रम् इव अपि अस्ति वा ? एतानि कति सन्ति ?

  _____

- दलानाम् अन्तः, मध्यभागं पश्यति किम् ? एतस्य कः वर्णः अस्ति ?

  _____

- किं तस्य स्पर्शेन हस्ते किञ्चित् चूर्णम् इव अपि अनुभूयते ?

_____

विकसत्यः कलिकाः ।

भवता कलिकाः अपि दृष्टा स्युः । यदि विद्यालये गृहस्य पार्श्वे वा कुत्रचित् पुष्पाणां वाटिका भवेत् तदा तेषां कलिकाः अपि पश्यतु ।

- कलिकायां पुष्पे च के के भेदाः सन्ति ?

_____

_____

- उत्तरपुस्तिकायां कस्यचित् पुष्पस्य, तस्य कलिकायाः च चित्रनिर्माणं करोतु ।
- किं भवान् वक्तुं शक्तः अस्ति यत् कलिका कति दिनेषु पुष्परूपे परिवर्तिता भवति ? ज्ञानस्य प्रयासं करोतु ।
  - ❑ कस्मिंश्चित् पादपे लग्नां कलिकां प्रतिदिनं पश्यतु । तस्य पादपस्य नाम अपि लिखतु ।

    _____

  - ❑ यदा भवान् कलिकाम् अपश्यत् तदा दिनाङ्कः .....आसीत् । यदा सा कलिका पुष्परूपे परिवर्तिता तदा दिनाङ्कः आसीत्.....। कलिका कतिषु दिनेषु पुष्परूपे परिवर्तिता ?

    _____

  - ❑ स्वमित्राणि पृच्छतु यत् ते कानि पुष्पाणि दृष्टवन्तः ? तेषां पुष्पाणां कलिकाः कतिषु दिनेषु पुष्परूपे परिवर्तिताः?
  - ❑ भवान् एतत् अपि द्रष्टुं शक्नोति यत् तत् पुष्पं कतिषु दिनेषु म्लानम् अभवत्?

एतावन्तः प्रयोगाः ।

भोजने प्रयोगः ।

भवान् पुष्पाणां कुत्र कुत्र प्रयोगं दृष्टवान् ? किं भवान् जानाति यत् पुष्पाणां भोजने अपि प्रयोगः भवति ? केषाञ्चित् पुष्पाणां शाकनिर्माणम् अपि भवति ।

उत्तरप्रदेशे निवासिन्यै फिरोजायै नीलिमायै च कोविदारस्य पुष्पाणां शाकः बहु रोचते ।

केरलप्रदेशस्य यामिनी स्वमातरं कदलीपुष्पाणां शाकं निर्मातुं निवेदनं करोति ।

महाराष्ट्रस्य ममतायै ओमरायै च तीक्ष्णगन्धस्य पुष्पाणां पक्वपौडः बहु रोचते ।

- किं भवतः गृहे अपि कस्यचित् पुष्पस्य शाकं लेह्यं वा निर्मीयते ? केषां केषां पुष्पाणाम् ?

औषधिषु अपि ।

बहुषु औषधिषु अपि पुष्पाणां प्रयोगः भवति ।

- कयोश्चित् द्वयोः पुष्पयोः नाम वदतु, ये औषधिषु प्रयुक्ते भवतः?

_____

- भवान् पाटलाजलस्य प्रयोगं कुत्र कुत्र करोति ? औषधिषु, मिष्ठान्नेषु, दुग्धजले कुत्रचित् अन्यत्र वा ? जानातु, कक्षायां परस्परं च वदतु ।

सुगन्धिः वर्णाः च

गुलदावरी, जीनिया इत्यादिभिः बहुभिः पुष्पैः रङ्गनिर्माणम् अपि भवति । तैः पुष्पैः वस्त्राणि अपि रञ्जितानि क्रियन्ते ।

- भवान् तेषां पुष्पाणां विषये ज्ञानं करोतु, यैः रङ्गनिर्माणं भवति ।

_____

_____

- किं भवान् तस्य वर्णस्य विषये विचारयितुं शक्नोति, यस्य वर्णस्य किञ्चित् अपि पुष्पं न भवेत् ?

_____

_____

- तादृशानां केषाञ्चित् पुष्पाणां नामानि लिखतु, यैः भवतः अनुसारम् निर्यासस्य निर्माणं भवति ।

_____

_____

_____

भवान् पितामह्याः तादृशानां कल्पानां विषये तु श्रुतवान् एव, येषु पुष्पाणां प्रयोगः भवति । अत्र एकः कल्पः प्रस्तुतः अस्ति, यस्मिन् पाटलाजलस्य प्रयोगः भवति ।

पितामह्याः कल्पः

पाटलाजलं ग्लिसरीनं च समं गृहीत्वा कूप्यां भरतु, अस्मिन् निम्बूकरसस्य अपि काञ्चित् बिन्दून् मिश्रयन्तु । अस्य प्रयोगेण शीतकाले त्वचा विदीर्णा न भवति ।

किं भवान् निर्यासस्य सुगन्धस्य आनन्दम् अनुभूतवान् ? किं भवान् जानाति यत् अल्पः निर्यासः अपि बहुभिः पुष्पैः निर्मितः भवति ।

उत्तरप्रदेशस्य कन्नौज इति जनपदः निर्यासाय एव प्रसिद्धः अस्ति । अत्र समीपवर्तीक्षेत्रेभ्यः ट्रकयानेषु भरित्वा पुष्पाणि आनीयन्ते । तदा तेभ्यः निर्यासः पाटलाजलं कविका (केवडा) इति एषां निर्माणं भवति । कन्नौजे अस्मिन् कार्ये सहस्रशः जनाः लग्नाः सन्ति ।

अध्यापकाय - बालकान् मानचित्रे उत्तरप्रदेशस्य केरलस्य महाराष्ट्रस्य च अन्वेषणाय वदेत् । बालकानानाम् अवगमनं कारयेत् यत् निर्यासः पुष्पाणां शुद्धः रसः भवति ।

अन्यत्र कुत्र कुत्र प्रयोगः

- किं भवान् कदापि पुष्पाणां सम्बन्धे किमपि गीतं पठितवान् श्रुतवान् वा? एतत् गीतं गायतु ।

'शोभने मालिनी मम वरस्य निर्मातु मुकुटम्
उद्यानानां स्वर्गं गता मालिनी मम पुष्पाणां कृते
पुष्पाणि न स्युः चेत् कलिकानां निर्मातु मुकुटम् ।'

वदतु -

- किं भवान् वक्तुं शक्तः यत् उपरि प्रदत्तं गीतं कदा गीयते ?
- किं भवान् भवतः गृहे वा कश्चित् एतेषां गीतानां विषये जानाति ?
- पुष्पाणां विषये गीतानि कविताः वा एकत्रितं करोतु, ताः कर्गदे लिखित्वा कक्षायां संश्लेषयतु ।
- किं भवतः गृहस्य ज्येष्ठाः केषुचित् उत्सवेषु अवसरेषु वा विशेषप्रकारस्य पुष्पाणां प्रयोगं कुर्वन्ति ? ज्ञात्वा तालिकायां लिखन्तु ।

उत्सवः / अवसरः	विशेषपुष्पस्य नाम

अध्यापकाय - बन्ना-वरः । बालकान् पृच्छतु यत् तेषां क्षेत्रे बन्ना इत्यस्मै किं कथ्यते ?

भोः भ्रातः । यदि एतावन्तः प्रयोगाः भवन्ति, तदा बहूनां पुष्पाणाम् अपि आवश्यकता भवति एव । बहुषु स्थानेषु पुष्पाणां कृषिः अपि भवति । क्रोशं यावत् विस्तीर्णानि पुष्पाणां क्षेत्राणि भवन्ति । विचारं करोतु । कियत् सुन्दरं दृश्यम् अस्ति ।

किञ्चित् अन्यत् अपि जानीयात् -

किं भवान् कुत्रचित् कञ्चित् पुष्पाणां विक्रेतारं दृष्टवान् ? यदि भवतः समीपे कुत्रचित् केचित् जनाः पुष्पाणि विक्रीणन्ति, तदा तेभ्यः एतान् प्रश्नान् पृच्छतु, लिखतु च -

- ते कानि कानि पुष्पाणि विक्रीणन्ति ? तेषु त्रयाणां पुष्पाणां नामानि पृष्ट्वा लिखतु ।

  _____

- ते पुष्पाणि कुतः आनयन्ति ?

  _____

- जनाः कस्मै कस्मै कार्याय पुष्पाणि क्रीणन्ति ?

  _____

  _____

- ते पुष्पाणि कथं कथं विक्रीणन्ति ? नीचैः तत्र चिह्नं करोतु ।

अन्येन केन प्रकारेण

_____

केषाञ्चित् पुष्पाणां पृथक् रूपेण प्रयोगः भवति । यथा - गन्धपुष्पाणां पाटलापुष्पाणां च, मालारूपेण मुक्तरूपेण वा द्वाभ्याम् एव प्रकाराभ्यां प्रयोगः भवति ।

- पृथक् पृथक् रूपेषु पुष्पाणां मूल्यं ज्ञात्वा लिखतु ।
- एका माला _____
- एकः पुष्पस्तबकः _____
- एकं पुष्पम् _____
- किम् एते पुष्पविक्रेतारः पुष्पस्तबकनिर्माणं पुष्पशय्यानिर्माणं वा केनचित् शिक्षिताः? केन ?

  _____

  _____
- किं ते इच्छन्ति यत् तेषां कुटुम्बस्य अन्ये अपि जनाः एतत् कार्यं कुर्युः? कथम् ?

चलतु एतत् कुर्मः -

भवान् पञ्चानां षण्णां वा समूहे भूत्वा एतत् कर्तुं शक्नोति ।

वृक्षात् पतितानि पुष्पाणि एकत्रीकरोतु, कक्षायां च आनयतु ।

एतानि पुष्पाणि समाचारपत्रस्य कागदानां मध्ये सम्यक्तया विस्तीर्य स्थापयतु ।

प्रत्येकं कागदे पुष्पाणि तथा स्थापयेत् यथा तानि परस्परं संश्लिष्टानि न भवेयुः ।

अधुना एतस्य समाचारपत्रस्य उपरि किमपि भारयुक्तं वस्तु धृत्वा दशभ्यः पञ्चदशभ्यः वा दिनेभ्यः एकस्मिन् एव स्थाने स्थापयेत् ।

इतः अनन्तरं सावधानतया पुष्पाणि निष्कास्य कस्याञ्चित् प्राचीनायाम् उत्तरपुस्तिकायां कस्मिंश्चित् प्राचीने समाचारपत्रे वा संश्लेषयेत् । एतानि पुष्पाणि पृथक् पृथक् रूपेण संश्लेषयितुं शक्यन्ते ।

भवान् एतैः शुष्कैः पुष्पैः किञ्चित् सुन्दरं पत्रम् अपि सज्जीकर्तुं शक्नोति ।

स्वप्रियस्य कस्यचित् पुष्पस्य चित्रनिर्माणं करोतु, नीचैः तस्य पुष्पस्य नाम च लिखतु ।

अध्यापकाय - बालकान् समीपं गत्वा पुष्पदर्शनाय प्रेरयेत् । पुष्पाणां पृथक् पृथक् गुणानाम् आधारेण, यथा - वर्णः, पत्राणि, पुष्पगुच्छानि इत्यादीनाम् आधारेण समूहीकरणे सहायतां कुर्यात् ।

एकादशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	हिन्दी
पुष्पवाटी	-	फुलवारी
कट	-	कालीन,चटाई
शस्यम्	-	घास
दन्तमार्जनी	-	ब्रुश
दलानि	-	पंखुडियां
म्लानम्	-	मुरझाना
शाकम्	-	सब्जी
सूचनापट्टः	-	बोर्ड
मुकुटम्	-	सेहरा
वर्णः	-	रंग
शय्यावस्त्रम्	-	चादर
पुष्पपात्रम्	-	गुलदस्ता
भित्तिः	-	दीवार
प्राङ्गणम्	-	आँगन
पिष्टः	-	पिसा हुआ
धान्यचूर्णम्	-	चावल का चूर्ण
नीलम्	-	नील
हरिद्रा	-	हल्दी
घण्टिका	-	घण्टी
कटोरिका	-	कटोरी
दन्तमार्जनी	-	ब्रुश
दलानि	-	पंखुडी
परस्परम्	-	आपस में

बहिः	-	बाहर
मध्यभागः	-	बीच का हिस्सा
वाटिका	-	बगीचा
म्लानम्	-	मुरझाना
पक्वपौडः	-	पकौड़ा
पाटलाजलम्	-	गुलाबजल
ग्लिसरीनम्	-	ग्लिसरीन
निर्यासः	-	इत्र
चिह्नम्	-	निशान
गन्धपुष्पम्	-	गेन्दा का फूल
पुष्पस्तबकः	-	गुलदस्ता

द्वादशः पाठः
कथं कथं परिवर्तितानि गृहाणि

अहं चेतनदासः अस्मि । अहं बहूभ्यः वर्षेभ्यः पूर्वं भवताम् इव लघून् लघून् बालकान् पाठयामि स्म । अधुना स्वस्य व्यतीतस्य समयस्य विषये लिखामि । अधुना अहं भवद्भ्यः स्वस्य विषये वदामि ।

एकं महत् परिवर्तनम्



षष्टिवर्षेभ्यः पूर्वं, तस्य समयस्य वार्ता अस्ति, यदा अहं नववर्षीयः आसम् । तस्मिन् समये वयं डेरा गाजीखान इति स्थाने निवासं कुर्मः स्म । अधुना तत् स्थानं पाकिस्ताने अस्ति । तस्मिन् समये देशे बहु विक्षोभः जातः आसीत्, परन्तु अहं किमपि न अवगतवान् । पिता अकथयत् यत् वयं स्वग्रामं त्यक्त्वा अन्यस्मिन् स्थाने गमिष्यामः ।

अध्यापकाय - अस्य पाठस्य आरम्भात् पूर्वं बालकाः आङ्गलेभ्यः भारतस्य स्वतन्त्रताविषये तथा देश-विभाजनस्य विषये च वक्तुं शक्यन्ते । मानचित्रे भारतं पाकिस्तानं च दर्शयतु ।



मह्यं स्वगृहस्य त्यागः, स्वग्रामस्य त्यागः च लेशमात्रम् अपि न अरोचत । तत्र एव तु मम सर्वाणि मित्राणि आसन् । अहं, पिता, माता, मम त्रयः लघवः भगिनीभ्रातरः, तत्रत्याः बहवः जनाः च रेलयानम् आरूह्य दिल्लीम् आगतवन्तः । तत्र जनाः वार्तां कुर्वन्ति स्म यत् अस्माकं देशः द्वयोः भागयोः विभक्तः- भारते पाकिस्ताने च । भारतस्य बहवः निवासिनः अपि पाकिस्तानं गतवन्तः । वयं केषुचित् दिनेषु शिविरे (केम्प) निवासं कृतवन्तः । शिविरः एकस्मिन् दीर्घे क्षेत्रे दीर्घान् दीर्घान् तम्बून् निर्माय कृतः आसीत् ।

एकः नव्यः आरम्भः

कस्मिंश्चित् दिने पिता उक्तवान् यत् वयं सोहना इति ग्रामे भूमिं प्राप्तवन्तः । अधुना वयं तत्रैव गृहनिर्माणं करिष्यामः । अहं प्रसन्ना आसम्। पिता माता च परस्परं सहयोगेन गृहं कृतवन्तः । वयं बालकाः अपि तस्मिन् कार्ये लग्नाः अभवाम। पिता समीपात् एव मृत्तिकायाः खननं कृतवान् । वयं मृत्तिकायाः पात्रं पूरयित्वा मात्रे दत्तवन्तः । गुडिया मात्रा सह मिलित्वा मृत्तिकायां बुसं मेलितवती । पिता भित्तिकाः निर्मितवान् ।

वयं समीपस्य गृहेभ्यः गोमयम् आनीतवन्तः । माता तत् गोमयं मृत्तिकायां सम्मेल्य भूमेः लेपनं कृतवती । मातुः कथनम् आसीत् यत् अनेन मृत्तिकायां कीटाः न उत्पन्नाः भवन्ति ।

अधुना छदिसः निर्माणम् अवशिष्टम् आसीत् । पिता काष्ठखण्डानां योगं कृत्वा एकं फ्रेम निर्मितवान्, तत् च चतसृणां भित्तिकानाम् उपरि स्थापितवान् । काष्ठे देहिका न उत्पद्येत, अतः निम्बस्य किङ्किरातस्य च काष्ठानि अस्मिन् काष्ठे अवकीर्णानि ।

माता जीर्णान् कटान् तत्र आस्तीर्य मृत्तिकया लेपं कृतवती । समीपस्य प्रायः सर्वाणि अपि गृहाणि एतादृशानि एव निर्मितानि आसन् । किन्तु, स्वगृहं मह्यं सर्वाधिकं रोचते स्म, यतः तत् गृहम् अस्माकं पूर्वगृहम् इव एव आसीत् ।

पृच्छतु लिखतु च -

- स्वगृहे पितामहं पितामहीं तयोः आयुषः इव ज्येष्ठं वा कमपि पृच्छतु, यत् यदा सः अष्टवर्षस्य नववर्षस्य वा आयुषः आसीत्, तदा -
  - ❑ सः कस्मिन् स्थाने / नगरे वा निवसति स्म ?

    _____
  - ❑ तस्य गृहं कैः कैः वस्तुभिः निर्मितम् आसीत् ?

    _____
  - ❑ किं तस्य गृहस्य अन्तः शौचालयः आसीत् ? यदि न आसीत्, तदा कुत्र आसीत् ?

    _____
  - ❑ तस्य गृहे भोजनं कुत्र निर्मितं भवति स्म ?

    _____
  - ❑ चेतनदासस्य गृहनिर्माणे मृत्तिकायाः बहु प्रयोगः अभवत्, किमर्थम् ?

    _____

अध्यापकाय - सोहनाग्रामः हरियाणाराज्ये अस्ति । बालकान् मानचित्रे हरियाणाराज्यस्य अन्वेषणाय प्रेरयेत् । बालकानां मनः अस्मिन् तथ्ये प्रेरयितुं शक्यते यत् सोहनाग्रामस्य अधिकतराणां गृहाणां निर्माणे परिवेशे सरलतया उपलब्धानां वस्तूनां प्रयोगः अभवत् । परिवेशे उपलब्धवस्तूनां विषये, तेषां प्रयोगस्य विषये च कक्षायां चर्चां कर्तुं शक्यते ।

गृहे परिवर्तनम्

समयः शीघ्रतया व्यतीतः अभवत् । मम शिक्षा सम्पूर्णा जाता, अहं वृत्तिम् अपि च प्राप्तवान् । मातुः पितुः च इच्छा आसीत् यत् मम विवाहः भवेत् । अहं विचारितवान् यत् विवाहात् पूर्वं गृहस्य किञ्चित् नवीकरणं कर्तव्यम् । एकम् अपरम् अपि कक्षं निर्मात्तव्यम् । नगरे पाषाणचूर्णस्य (सीमेण्ट) बहु प्रचलनम् आसीत् । अनेन गृहं दृढं भवति इति जनाः कथयन्ति स्म । अहं पितुः मातुः च परामर्शेन नूतनकक्षस्य छदिः लोहेन पाषाणचूर्णेन च निर्मापितवान् ।

आपणे अपक्वाः इष्टिकाः अपि विक्रीयन्ते स्म । वयं कक्षस्य भित्तिकाः एताभिः इष्टिकाभिः निर्मापितवन्तः । अनेन अयं लाभः अभवत् यत् अधुना इष्टिकानां भित्तिकानां प्रत्येकं सप्ताहे लेपनं न आवश्यकं भवति स्म । प्रत्येकं वर्षे एकवारम् एतासु भित्तिकासु चूर्णकस्य लेपः क्रियते । वयम् आङ्गणे एकां पक्वां पाकशालाम् अपि निर्मापितवन्तः । तत्र एकतः मृत्तिकायाः चुल्ली स्थापिता, अपरत्र च पात्राणां स्थानम् ।



ततः मम विवाहः अभवत्। मम पत्नी सुमना अस्मिन् एव गृहे वधूरूपेण आगतवती । सा पाकशालायां नीचैः उपविश्य भोजननिर्माणं करोति स्म, कुटुम्बः च कटे उपविश्य युगपत् एव भोजनं करोति स्म । सत्यम्, तानि दिनानि अविस्मरणीयानि आसन् ।

तदा ग्रामीणाः मलमूत्रत्यागाय बहिः गच्छन्ति स्म । केचित् जनाः तदर्थं गृहे एव व्यवस्थां कृतवन्तः । वयम् अपि तथा एव कृतवन्तः । गृहस्य पृष्ठभागे अपक्वानाम् इष्टिकानाम् एकं लघुं शौचालयं निर्मितवन्तः ।

- चेतनदासः वदति यत् शौचालयस्य शुद्धतायै मलं मूत्रं च नेतुं नगरस्य जनाः आगच्छन्ति स्म । तेषां गृहस्य अन्यस्मिन् भागे गमनस्य निषेधः आसीत् ।
- ये जनाः शौचालयस्य उपयोगं कुर्वन्ति स्म, ते एव तं किमर्थं न स्वच्छं कुर्वन्ति स्म ? चर्चां करोतु ।
- किं भवतः गृहे शौचालयः अस्ति ? कः तं स्वच्छं करोति ?

अन्यानि अपि परिवर्तनानि

मम द्वौ पुत्रौ एका पुत्री च तस्मिन् एव गृहे उत्पन्ना अभवत् । समयः शीघ्रगत्या व्यतीतः । मम बालकानां शिक्षा समाप्ता अभवत्। वयं पञ्चदशभ्यः वर्षेभ्यः पूर्वं स्वपुत्र्याः लक्ष्म्याः विवाहः पलवल इति जनपदे कारितवन्तः । यदा राजोः विवाहस्य वार्ता अभवत्, तदा सर्वे विचारं कृतवन्तः यत्, वधोः आगमनात् पूर्वं सर्वं गृहं पक्कं कारयितव्यम् ।

तावत् अस्माकं ग्रामे पक्कानाम् इष्टिकानां चलनम् अपि जातम् । अतः वयं भित्तिकानां निर्माणं पक्काभिः इष्टिकाभिः कारितवन्तः। छदिसः निर्माणम् अपि पाषाणचूर्णेन कारितवन्तः । वयं गृहभूमिम् अपि पाषाणखण्डैः (मार्बल) पाषाणचूर्णेन च दृढां कारितवन्तः । शौचालये अपि ईदृशी व्यवस्था कारिता यत् मलं मूत्रं च नलिकामाध्यमेन बहिः निर्गच्छेत् । पूर्वापेक्षया पाकशालां दीर्घां कारितवन्तः । अधुना राजोः पत्नी उपविश्य, मृत्तिकायाः चुल्ल्यां भोजनं न पाचयति, अपितु उत्थाय एव गैसचुल्लिकायाः उपरि भोजनं पाचयति ।

अध्यापकाय - बालकान् पृच्छेत् यत् ते स्वशौचालयस्य अन्यैः जनैः शुद्धीकरणस्य विषये किं विचारयन्ति । किं ते तस्य स्थानस्य विषये जानन्ति यत्र अद्य अपि एतत् भवति ।

नव्यानि वस्तूनि

यदा मम कनिष्ठः पुत्रः मोण्टू वृत्तिं प्राप्तवान्, तदा सः दिल्लीं गत्वा एव निवासं कृतवान् । अधुना तस्य कुटुम्बः देहल्याम् एव निवसति । अहं सुमना च कदाचित् मोण्टुना सह देहल्यां निवासं कुर्वः, कदाचित् राजुना सह सोहनाग्रामे निवासं कुर्वः । अहं यदा सोहनाग्रामात् दिल्लीं गच्छामि, तदा मार्गे गुड़गाँव इति नगरं भवति । मयि पश्यति एव एतेषु व्यतीतेषु वर्षेषु अत्र बहूनि उन्नतानि भवनानि निर्मितानि जातानि ।

केभ्यश्चित् वर्षेभ्यः पूर्वं राजूः पुनः शौचालयं निर्मापितवान् । सः स्नानगृहे बहूनां रङ्गानां पाषाणान् अपि नियोजितवान् । स्नानस्य स्थाने एतावत् धनं व्यर्थम् एव व्ययं कृतवान् ।

अधुना अहं सप्ततिवर्षीयः अस्मि । अहम् एतेषु वर्षेषु स्वगृहे एव एतावन्ति परिवर्तनानि दृष्टवान् । न जानामि, मम पौत्राः पौत्र्याः च युवावस्थायां कुत्र निवसिष्यन्ति, तेषां गृहं च कीदृशं भविष्यति । डेरा गाजीखान इति स्थाने, न जाने कीदृशानि गृहाणि स्युः । मम बाल्यावस्थायाः मित्राणि कुत्र स्युः इति अहं न जानामि ।

- भवतः गृहं कैः कैः वस्तुभिः निर्मितम् अस्ति ?

  _____

  _____

- पृच्छतु, भवतः मित्रस्य गृहं कैः कैः वस्तुभिः निर्मितम् अस्ति ? किम् उभयोः गृहयोः कश्चित् भेदः अस्ति ? लिखतु ।

  _____

  _____

- भवतः मतानुसारं चेतनदासस्य पौत्राः पौत्र्याः च युवावस्थायां कीदृशे गृहे निवासं करिष्यन्ति ?

  _____

  _____

- भवते युवावस्थायां कीदृशे गृहे निवासः रोचते ?

_____

_____

_____

- किं भवान् स्वपितामहस्य पितामह्याः अथवा कस्यचित् वृद्धस्य बाल्यकालस्य समये गृहनिर्माणे प्रयुक्तानां वस्तूनां विषये लिखितवान् ? किं तेषु केषाञ्चित् वस्तूनां प्रयोगः भवतः गृहनिर्माणे अपि अभवत् ? केषां वस्तूनाम् ?

_____

_____

_____

चित्रं पश्यतु । एषु केचित् जनाः स्वकार्यानुसारेण आहूयन्ते, यथा - यः काष्ठस्य कार्यं करोति, सः काष्ठकारः उच्यते ।

- भवतः ग्रामे काष्ठस्य कार्यकर्ता कः उच्यते ?

_____

चित्रं दृष्ट्वा तालिकायां लिखतु, जनाः किं किं कार्यं कुर्वन्ति ? ते केषाम् उपकरणानां प्रयोगं कुर्वन्ति ?



कार्यम्	उपकरणम्	केन नाम्ना आहूयते
1.		
2.		
3.		
4.		

किं भवान् स्वपरिवेशे तान् जनान् जानाति, ये एतानि कार्याणि कुर्वन्ति ? तैः सह वार्तां कृत्वा तेषां कार्यस्य विषये जानातु । अस्मिन् विषये स्वमित्रैः सह चर्चां करोतु।

- अध्यापिकया सह स्वकुटुम्बस्य जनैः वा सह, तस्मिन् स्थाने गच्छतु यत्र किमपि भवननिर्माणस्य कार्यं प्रचलति । तत्र कर्मचारिभिः सह वार्तां करोतु, एतेषां प्रश्नानाम् उत्तराणि च ज्ञात्वा लिखतु ।
  - ❑ तत्र किं निर्मितं भवति ?

    _____

    _____
  - ❑ तत्र कति जनाः कार्यं कुर्वन्ति ?

    _____

    _____
  - ❑ ते कानि कानि कार्याणि कुर्वन्ति ?

    _____

    _____
  - ❑ तत्र कति पुरुषाः कति महिलाः च कार्यं कुर्वन्ति ?

    _____

अध्यापकाय - भवतः विद्यालयस्य समीपे यदि किमपि भवननिर्माणं गृहनिर्माणं वा प्रचलति, तदा बालकान् नाययेत् । तत्र श्रमिकैः सह वार्तालापं च कारयेत् ।

- ❑ किं तत्र बालकाः अपि आसन् ? किं ते बालकाः अपि कार्यं कुर्वन्ति ?

  _____

- ❑ श्रमिकाः प्रतिदिनं कति रूप्यकाणि प्राप्नुवन्ति ? केभ्यश्चित् त्रिभ्यः जनेभ्यः पृच्छतु ?

  _____

  _____

- ❑ श्रमिकाः कुत्र निवसन्ति ?

  _____

  _____

- ❑ यस्य भवनस्य निर्माणं प्रचलति, तस्य निर्माणे केषां केषां वस्तूनां प्रयोगः भवति ?

  _____

  _____

- ❑ सम्पूर्णे भवनस्य निर्माणे कति ट्रकयानानि यावत् इष्टिकानां कियत् पाषाणचूर्णस्य च आवश्यकता भविष्यति ? ऊहां कृत्वा वदतु ।

  _____

  _____

- भवननिर्माणस्य वस्तूनि कस्मिन् कस्मिन् वाहने भरित्वा आनीयन्ते - ट्रकयाने, रेहडीयाने, अन्येन केनचित् उपायेन वा ? सूचिनिर्माणं करोतु ।

  _____

- एतेषां मूल्यं ज्ञात्वा लिखतु -

  एकं बोरी पाषाणचूर्णम् _____

  एका पक्का इष्टिका _____

  एकस्मिन् दीर्घे ट्रकयाने भृता सिकता _____

अध्यापकाय - यदि शक्यं भवेत् तदा, यत्र भवननिर्माणं भवति, तत्र बालकान् नयेत्, अथवा कांश्चित् श्रमिकान् स्वविद्यालये आवाहयेत् । तेषां कार्यस्य विषये उपकरणानां विषये च तैः सह वार्तालापं कुर्यात् ।

- स्वेच्छानुसारं कांश्चित् अन्यान् अपि प्रश्नान् पृष्ट्वा तेषाम् उत्तराणि लिखतु ।

_____

_____

- षष्टिवर्षेषु चेतनदासस्य भवननिर्माणे येषां येषां वस्तूनां प्रयोगः अभवत् तान् उचितक्रमेण लिखतु -

1

2

3

4

आगच्छतु गृहनिर्माणं कुर्मः

- कक्षायाः बालकाः त्रिषु चतुर्षु वा समूहेषु विभक्ताः भवेयुः । प्रत्येकं समूहः पृथक् पृथक् प्रकारस्य भवनस्य प्रतिकृतिं कुर्यात् । भवान् एतेषां वस्तूनां प्रयोगं कर्तुं शक्नोति-मृत्तिकायाः, काष्ठस्य, वस्त्राणां खण्डस्य, नानावर्णानां, कागदस्य रङ्गस्य ।
- सर्वाणि गृहाणि एकस्मिन् स्थाने संस्थाप्य नगरनिर्माणं कुर्यात् ।

द्वादशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	हिन्दी
देहिका	-	दीमक
भित्तिका	-	दीवार
फ्रेम	-	फ्रेम
किङ्किरात	-	कीकर
अन्तः	-	अन्दर
नवीकरणम्	-	मरम्मत
पाषाणचूर्ण	-	सीमेण्ट
अपक्वाः इष्टिकाः	-	कच्ची ईंटें
चुल्ली	-	चूल्हा
पाकशाला	-	रसोई
छदिः	-	छत
पाषाणखण्डः	-	मार्बल
नलिका	-	पाइप
षष्टिः	-	साठ
प्रतिकृतिः	-	मॉडल
उद्योगशालाः	-	फैक्ट्रियां
तरङ्गाः	-	लहरें
दूषितम्	-	गन्दा
गोधूमचूर्णम्	-	आटा
द्विदलम्	-	दाल
चमषः	-	चम्मच
सुधाखण्डः	-	चॉक (खड़िया)
अवकरः	-	कूड़ा कचरा
उत्क्वाथनम्	-	उबालना

त्रयोदशः पाठः

पर्वतेभ्यः समुद्रं यावत्

नद्याः चित्रम् अवधानेन पश्यतु निम्नलिखितान् शब्दान् च अवधानेन पश्यतु ।

नौका, प्रवहत् जलम्, नीलम्, मत्स्याः, जलस्य वनस्पतयः, नदी, दीर्घं जलयानम्, तैलम्, नद्याः तटाः, दुर्गन्धः, उद्योगशालाः, पशवः, वस्त्रप्रक्षालनम्, अन्यानि कार्याणि, परिवर्तनानि, नगराणि ।

चित्राणां शब्दानां च सहायतया एकां कथां लिखतु । अस्याः कथायाः कृते किञ्चित् नाम अपि विचारयतु ।

पुनः चित्रं दृष्ट्वा निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखतु -
यतः नदी उत्पन्ना भवति, तत्र जलस्य वर्णः कीदृशः अस्ति ?

_____

नद्यां कुत्रचित् मत्स्याः अधिकाः सन्ति, कुत्रचित् न्यूनाः । कुत्रचित् तु मत्स्याः मृताः सन्ति । एतत् किमर्थम् अस्ति ? चर्चां करोतु । ग्रामे आगमनात् पूर्वं नद्यां किं किं दृश्यते ?

_____

_____

नद्याः जलस्य वर्णः कुत्र कुत्र परिवर्तितः? अयं किमर्थं परिवर्तितः? चर्चां करोतु ।
चित्रे प्रदर्शितेषु स्थानेषु भवान् कुत्र निवासं करिष्यति ? किमर्थम् ?

_____

_____

चित्रे यत् किमपि भवति, किं तस्मिन् भवान् किमपि परिवर्तनम् इच्छति ? किमर्थं कथं च ? चर्चां करोतु ।

_____

नदीनां शुद्धतायै किं किं कर्तुं शक्यते ?

_____

- यदि भवान् जलं पातुम् इच्छति, तदा नद्याः कस्य भागस्य जलं पास्यति ?

_____

_____

- चित्रस्य अन्ते नदी समुद्रे मिलिता अस्ति, किं भवान् समुद्रं दृष्टवान् ? कुत्र ? चलचित्रे, अन्यत्र वा ?

_____

- किं भवान् कदापि कस्याश्चित् नद्याः समुद्रस्य वा पार्श्वे गतवान् ? कदा ?

_____

- स्वहस्ताभ्यां कृत्वा दर्शयतु यत् समुद्रे तरङ्गाः कथम् उद्भवन्ति ।

_____

- किं समुद्रस्य जलं पातुं शक्यते ? किमर्थम् ?

_____

- किं सम्पूर्णे वर्षे नदीनां तडागानां निर्झराणां च जलेषु कानिचन परिवर्तनानि भवन्ति ? कथं परिवर्तनानि भवन्ति ? चर्चां करोतु ।

वर्षाऋतौ यावत् जलं तडागेषु नदीषु वा भवति, किं तावत् एव जलं ग्रीष्मऋतौ अपि भवति ?

_____

स्वग्रामस्य नगरस्य वा समीपस्य नद्याः, जलाशयस्य, तडागस्य वा विषये ज्ञानम् एकत्रितं करोतु ।

किं तस्य जले शीतकाले ग्रीष्मकाले वर्षाकाले वा कानिचित् परिवर्तनानि भवन्ति ?

_____

तस्मिन् कस्य कस्य प्रकारस्य जलस्य जन्तवः दृश्यन्ते ?

_____

तस्य समीपे कीदृशाः वनस्पतयः उत्पन्नाः भवन्ति ?

_____

तत्र कीदृशाः पक्षिणः आयान्ति ?

_____

किं भवान् कदाचित् जलविप्लवस्य विषये श्रुतवान् ? कुत्र ?

_____

जलविप्लवे सति किं भवति ?

_____

किं भवान् नद्यां तडागे वा दूषितं जलं दृष्टवान् ? कुत्र ?

_____

भवान् कथं ज्ञानं करिष्यति यत् जलं दूषितम् अस्ति ? यदि जलं शुद्धं दृश्यते तदा किम् एतत् आवश्यकम् अस्ति, यत् सः पेयम् अपि भवेत् ? चर्चां करोतु ।

जलं कथं दूषितं भवति ?

भवान् चित्रे दृष्टवान् यत् यतः यतः नदी प्रवहन्ती गता, तत्र तत्र तटेषु निवासकाः ग्रामस्य नगरस्य च जनाः नद्याः जलस्य पृथक् पृथक् रूपेण उपयोगं कृतवन्तः । यथा -वस्त्राणां प्रक्षालनं, पशूनां स्नानम्, पात्राणां मार्जनं च । एतेषां कारणेन नदी यथा आरम्भे शुद्धा आसीत् तथा अग्रे न शुद्धा अवशिष्टा । नद्याः जलम् यथा यथा आरम्भतः अग्रे गतम्, तथा तथा निरन्तरं परिवर्तितम् । एतैः कारणैः एव तडागानां जलाशयानां च जलम् अपि दूषितं भवितुं शक्यते ।

भवान् यत् जलं पिबति तत् कुतः आगच्छति । कस्माच्चित् तडागात् नद्याः वा ? किं तेन तडागेन नद्या वा सह अपि तत् एव भवितुं शक्यते, यत् अस्माकं चित्रस्य नद्या सह अभवत् ?

कृत्वा पश्यतु

- अस्मै गतिविध्यै वयं काश्चित् सामग्रीं गृहात् आनयामः । भवतः पाकशालायां एतानि सर्वाणि वस्तूनि प्राप्स्यन्ते ।
  लवणम्, शर्करा, हरिद्रा, गोधूमचूर्णम्, खादनस्य सोडा, द्विदलम् (प्रत्येकं वस्तु अर्धं चमषं यावत्) निम्बुकस्य रसः, फेनीलस्य जलम्, मधुरपेयम्, तैलम् (सर्वाणि वस्तूनि एकं चमषं यावत्) पञ्च षड् वा चषकाः कूप्यः वा ।

अधुना भवता किं करणीयम् ?

सर्वान् चषकान् कूपीः वा जलेन अर्धं पूरयतु । अवध्यातव्यं भवेत् यत् सर्वेषु समम् एव जलं भवेत् । अधुना प्रत्येकं पात्रे पृथक् पृथक् वस्तुनः मिश्रणं करोतु । यथा - एकस्मिन् पात्रे हरिद्रा, द्वितीये तैलम्, तृतीये खादनस्य सोडा । मिश्रयित्वा पश्यतु यत् किं भवति । ततः निम्नलिखितां तालिकां पूरयतु ।

भवान् किं दृष्टवान् ? उचितस्थाने(✓) इति चिह्नं करोतु ।

वस्तूनि	जले मिश्रितम्	जले न मिश्रितम्	जलस्य वर्णः परिवर्तितः	जलस्य वर्णः न परिवर्तितः
शर्करा				
लवणम्				
निम्बुकस्य रसः				
हरिद्रा				
फेनीलस्य जलम्				
गोधूमस्य चूर्णम्				
द्विदलम्				
मधुरपेयम्				
खादनस्य सोडा				
तैलम् (सार्षपम्, अन्यत् वा)				

भवान् यत् दृष्टवान् तस्य आधारेण वदतु -

- किं सर्वाणि वस्तूनि जले मिश्रितानि भवन्ति ?
- किं जलस्य वर्णः सदा परिवर्तितः भवति ?
- किं तैलं जले मिश्रितं जातम् ?

भवान् कथं वक्तुं शक्तः अस्ति यत् एतत् वस्तु मिश्रितं न वा ? केषाञ्चित् वस्तूनां मिश्रणानन्तरम् अपि जलस्य वर्णः परिवर्तितः न भवति ? किं वयं वक्तुं शक्ताः, यत् तानि जले न सन्ति ?

विचारं करोतु, यदि शर्करा, लवणम्, मधुरपेयम्, निम्बुकस्य रसः, इत्यादीनि वस्तूनि जले मिश्रितानि एव न स्युः, तदा कि भविष्यति ?

विचारं करोतु, यदि पाषाणः, प्लास्टिकम्, सुधाखण्डः, अवकरः इत्यादीनि वस्तूनि यदि जले मिश्रितानि भवेयुः, तदा किं भविष्यति ?

बहूनि वस्तूनि जले सरलतया मिश्रितानि भवन्ति । एतेषु कानिचित् वस्तूनि अस्माकं शरीराय हानिकारकाणि भवितुम् अर्हन्ति । अतः जलस्य पानात् पूर्वं तस्य शोधनम् आवश्यकम् अस्ति । जलं शोद्धुं सर्वोत्तमः उपायः अस्ति, जलस्य उत्क्वाथनम्। यदि एवं करणे केन अपि कारणेन कठिनता भवति, तदा भवान् जलं शोद्धुं कम् अपि उपायं विचारयितुं शक्तः अस्ति ।

- भवतः गृहे पेयं जलं कथं शुद्धं क्रियते ?
- जलं शोद्धुं पृथक् पृथक् उपायानां विषये ज्ञानं करोतु ।
- एतेषु उपायेषु केषाञ्चित् द्वयोः चित्रनिर्माणं करोतु ।

त्रयोदशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	हिन्दी
दुर्गन्धः	-	बदबू
पशुः	-	जानवर
पाकशाला	-	रसोई
तरङ्गः	-	लहर
निर्झरः	-	झरना
तडागः	-	तालाब
जलविप्लवः	-	बाढ़
लवणम्	-	नमक
शर्करा	-	चीनी
गोधूमचूर्णम्	-	गेहूँ का चूना
अवकरः	-	कूड़ा

चतुर्दशः पाठः

वासुदेवस्य क्षेत्रम्

अहं वासुदेवः अस्मि । अहं कर्णाटकस्य बेलवनिकाग्रामे निवसामि । मम पिता कृषकः अस्ति । प्रत्येकं वर्षस्य इव अस्मिन् वर्षे अपि पिता पलाण्डोः कृषिकरणाय सज्जितः अस्ति । कृषिकरणाय पिता बहूनि कार्याणि करोति । पिता आवश्यकतानुसारं माम् अपि कृषिक्षेत्रे नयति । गतेषु केषुचित् दिनेषु पिता खनित्रस्य सहाय्येन क्षेत्रस्य मृत्तिकां मृद्वीं कृतवान् ।

ज्ञानं कुर्वन्तु

वासुदेवस्य प्रदेशे तु खनित्रस्य सहाय्येन क्षेत्रस्य मृत्तिका मृद्वी क्रियते । भवतः प्रदेशे एतत् किं कथ्यते ? तस्य चित्रनिर्माणं कृत्वा चर्चां करोतु ।

अध्यापकाय - अस्मिन् पाठे पलाण्डोः कृषिकार्यस्य एकम् उदाहरणमात्रं गृहीतम् । स्वप्रदेशस्य समीपस्य वा कस्यचित् एकस्य धान्यस्य कृषिकार्याय, कृतेषु कार्येषु चर्चां कारयितुं - शक्यते । बालकान् मानचित्रे कर्णाटकं दर्शयेत् ।

कश्चित् कृषकम् अन्यं ज्येष्ठं वा पृच्छतु यत् तस्य भू-भागे कस्य कस्य धान्यस्य कृषिः भवति ?

कृषेः कला

पिता अस्मिन् वर्षे अपि पलाण्डोः बीजानां रोपणं करिष्यति । बलीवर्दौ हलं (कूरिगे) कर्षिष्यतः, पिता च पृष्ठतः बीजानि क्षिपन् चलिष्यति । पितरं हले बीजानि



क्षिपन्तं दृष्ट्वा मम अपि मनसि एतत्करणस्य भावः उत्पन्नः भवति, किन्तु अहं बालकः अस्मि, अतः अस्मै कार्याय उपयुक्तः न अस्मि । मम हस्तात् अधिकानि बीजानि न पतेयुः, अनेन कारणेन पिता मह्यं बीजानि क्षेपणार्थम् आज्ञां न ददाति । किञ्चित् किञ्चित् बीजानां क्षेपणं दुष्करम् अस्ति । न जानामि अहं कदा कर्तुं शक्तः भविष्यामि ।

पशुम् अतिरिच्य अन्येन केनचित् विधिना अपि क्षेत्रं कर्षयितुं शक्यते ?

पलाण्डोः कृषिः

बीजानां वपनानन्तरं विंशतिदिनानि व्यतीतानि । अधुना पलाण्डोः लघुपादपाः उत्पन्नाः सन्ति । सह एव उत्पन्नानि सन्ति - अनपेक्षितानि शस्यानि । भवान् जानाति वा अनपेक्षितानि शस्यानि ? भवान् कस्मिंश्चित् क्षेत्रे उद्याने वा दृष्टं भवेत् यत् केचित् पादपाः वपनं विना, स्वयमेव उत्पन्नाः भवन्ति ।

तानि एव भवन्ति अनपेक्षितानि शस्यानि । पिता वदति यत् एतेषां कर्तनं बहु आवश्यकम् अस्ति । अन्यथा सर्वं भूमिलेपं जलं च अनपेक्षितशस्यानि एव ग्रहीष्यन्ति । अनेन पलाण्डुकृषिः न्यूनः भविष्यति । अहम् अपि अनपेक्षितशस्यानां विनाशे मातुः पितुः पितृव्यस्य च सहायतां करिष्यामि ।

पलाण्डोः कृषिक्षेत्रे

अहं प्रतिदिनं वर्धयन्तः पादपान् दृष्ट्वा प्रसन्नः भवामि । अधुना तु एते पादपाः मम जानुपर्यन्तं वर्धिताः । एतेषां पत्राणि अपि पीतानि भूत्वा शुष्कानि जातानि । अधुना पलाण्डुः निष्कासनाय सज्जितः अस्ति ।

भवान् यत् धान्यं क्षेत्रे दृष्टवान् तस्य चित्रनिर्माणं करोतु ।

जानाति किमर्थम् ?

अधुना पलाण्डुः सज्जितानां पादपानां निष्कासनम् अस्ति । पलाण्डोः कृषिकार्ये एतत् कार्यं सर्वाधिकं महत्त्वपूर्णम् अस्ति । माता पिता पितृव्यः पितृव्या अहं च मिलित्वा एतत् कार्यं करिष्यामः । यदि उचितसमये पलाण्डवः भूमेः न निष्कासिताः, तदा ते भूमेः अन्तः एव विगलिताः भविष्यन्ति । तदा तु सम्पूर्णः एव श्रमः व्यर्थः भविष्यति।

किं भवान् अपि वासुदेवः इव कस्मिंश्चित् कार्ये गृहस्य ज्येष्ठानां सहायतां करोति ? कस्मिन् कार्ये ?

_____

_____

- तत् कार्यं भवते रोचते न वा ?

_____

पलाण्डोः कृषिः

अहो ! अस्मिन् वर्षे तु स्थूलाः पलाण्डवः उत्पन्नाः सन्ति । गृहे सर्वे अपि प्रसन्नाः सन्ति । पितृव्या लवित्रस्य (इलिगे) साहाय्येन पलाण्डुं पादपात् पृथक् कृतवती । एतत् कार्यं सावधानतया करणीयं भवति अन्यथा, हस्तकर्तनस्य भयं भवति । पिता पितृव्यस्य सहाय्येन पलाण्डून् दीर्घेषु गोणीषु पूरयित्वा गोणीनां बन्धनं कृतवान् । अधुना पिता एतान् पलाण्डून् महाहट्टे विक्रेतुं ट्रकयाने पूरयित्वा गमिष्यति ।

प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखतु

- वासुदेवः कानिचित् दिनानि यावत् विद्यालयं गन्तुं कथं न अशक्नोत् ?
- किं भवतः गृहस्य पार्श्वे किमपि क्षेत्रम् अस्ति ? तत्र किं किं धान्यं वप्तुं शक्यते ?

- वासुदेवस्य पिता महाहट्टे पलाण्डून् विक्रेतुं ट्रकयाने पूरयित्वा गच्छति, विचारयतु, येषु स्थानेषु पक्कः राजमार्गः न भवति, तत्र फलानि शाकानि च कथं नीयेरन् ?
- केषु केषु यानेषु पूरयित्वा फलानि शाकानि च नीयन्ते ? कस्यचित् एकस्य यानस्य चित्रनिर्माणम् उत्तरपुस्तिकायां करोतु ।

ज्ञात्वा लिखतु

- अत्र केषाञ्चित् उपकरणानां चित्राणि सन्ति, येषां नामानि अस्मिन् पाठे आगतानि । एषां नामानि लिखतु । एतत् अपि लिखतु यत् भवतः ग्रामे एतेषां कानि नामानि सन्ति ?



नाम (पाठे) _____

भवतः क्षेत्रे _____

कार्यम् _____

नाम (पाठे) _____

भवतः क्षेत्रे _____

कार्यम् _____



नाम (पाठे) _____

भवतः ग्रामे _____

कार्यम् _____

- कृषि-उत्पादनाय बहूनि कार्याणि क्रियन्ते । चित्राणि दृष्ट्वा तेषाम् उचितं क्रमं लिखतु ।

- स्वक्षेत्रे उप्यमानस्य कस्यचित् धान्यस्य विषये ज्ञानम् एकत्रितं करोतु । तस्य धान्यस्य कृषिः कथं क्रियते ? क्रमेण उत्तरपुस्तिकायां चित्रनिर्माणं करोतु ।

चतुर्दशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	हिन्दी
क्षेत्रम्	-	खेत
मृद्वी	-	मुलायम
भूमिलेपम्	-	खाद
हट्टः	-	मण्डी
राजमार्गः	-	सड़क
उपकरणम्	-	औजार
उप्यमानम्	-	बोई जानें वाली



अहं वैशाली अस्मि। मम पिता शाकं विक्रीणाति । अस्मिन् कार्ये माता, भ्राता, लघुभ्राता, अहम् अपि च सहायतां कुर्मः । जानाति किम्, वयं कदा कार्यस्य आरम्भं कुर्मः ? प्रातः काले त्रिवादने । यदा बहवः जनाः प्रगाढनिद्रायां शयनं कुर्वन्ति, तदा वयं स्वकार्यस्य आरम्भं कुर्मः । हट्टात् नव्यशाकानि आनेतव्यानि भवन्ति, अतः पिता माता भ्राता अहं च गतदिनानाम् अवशिष्टानि शाकानि गोणीभ्यः करण्डीभ्यः च निष्कासयामः । कदाचित् लघुभ्राता अपि अस्मिन् कार्ये सहायतां करोति ।

कार्यं समाप्य, यदा वयं चायपानं कुर्मः, तदा एव टैम्पोयानस्य ध्वनिः पौं-पौं....इति श्रूयते । तदा पिता, भ्राता, पितृव्यः च प्रतिवेशस्य अन्यैः जनैः सह टैम्पोयानम् आरूह्य शाकं नेतुं हट्टं गच्छामः ।

- किं भवतः गृहे अपि कश्चित् जनः प्रातः काले शीघ्रं जागर्ति ? कस्मिन् समये ? किमर्थम् ?

_____

_____

_____

दिने सज्जा

पितुः गमनानन्तरं लघुभ्राता, माता अहं च पूर्वदिनानाम् अवशिष्टानि शाकानि गोणीनाम् उपरि संस्थाप्य तेषां जलेन सेचनं कुर्मः । प्रातःकाले प्रायः सार्धषड्वादनं (6.30) यावत् पिता हट्टात् शाकस्य करण्डीः गोणीः च गृहीत्वा गृहं प्राप्नोति। तस्मिन् समये तु गृहम् एव शाकस्य हट्टम् इव प्रतीतं भवति - वृन्ताकम्, आलुकम्, रक्ताङ्गः, भिण्डिः, कूष्माण्डम्, काशीफलम्, मरिचः - इत्यादीनि शाकानि परितः दृश्यन्ते । गृहस्य सर्वे जनाः मिलित्वा एतेषां पृथक् पृथक् चयनं कुर्वन्ति । यानि शाकानि अपक्वानि भवन्ति, विक्रेतुं योग्यानि च न भवन्ति, तानि वयं पृथक् कुर्मः । एतानि सर्वाणि कार्याणि शीघ्रतया कर्तुं प्रयासः भवति, येन आपणं शीघ्रतया प्राप्नुयाम ।

अध्यापकाय - बालकाः हट्टे जायमानानां कार्याणां विषये वक्तुं शक्यन्ते ।

सप्तवादनं यावत् पिता भ्राता च शाकानि हस्तशकटे धृत्वा आपणं गच्छति । पिता वदति यदि अहं विलम्बेन गच्छामि, तदा ग्राहकः अन्यैः शाकस्य विक्रेतृभिः शाकं क्रीणाति । पितुः गमनानन्तरम् अहं शीघ्रतया विद्यालयं गन्तुं सज्जिता भवामि । यतः मया अपि सार्धसप्तवादनं (7.30) यावत् विद्यालयः प्राप्तव्यः भवति ।

पिता आपणे

लघुभ्रातुः विद्यालयस्य समयः मध्याह्नकालात् आरम्भः भवति । सः किञ्चित् विश्रामं कृत्वा पित्रे भ्रात्रे च अल्पाहारं स्वीकृत्य आपणं गच्छति । किञ्चित् कालं यावत् सः हस्तशकटस्य पार्श्वे एव तिष्ठति, तदनन्तरं मध्याह्ने विद्यालयं गच्छति । सः कदाचित् सायङ्काले अपि, विद्यालयस्य अवकाशस्य अनन्तरम् अपि, पितुः सहायतायै तस्य पार्श्वे गच्छति । पिता पूर्वदिनानाम् अवशिष्टानां शाकानां प्रथमं विक्रयणस्य प्रयासं करोति ।

वदतु

- पिता पूर्वदिनानां शाकानां प्रथमं विक्रयणस्य प्रयासं करोति । सः किमर्थम् एतत् करोति ?
- किं भवान् कदाचित् शुष्कं, विगलितं वा शाकं दृष्टवान् ? कुत्र ?
- भवान् कथं जानाति यत् शाकं विगलितं जातम् ?

यथा यथा पूर्वदिनानां शाकस्य विक्रयणं भवति, तथा तथा एव भ्राता गोणीभ्यः नव्यशाकानि निष्कास्य हस्तशकटे स्थापयति । तेन सह एव शाकेषु अपि जलस्य सेचनं करोति, अनेन तानि शुष्कानि न भवन्ति, विशेषतः ग्रीष्मकाले । पिता भ्राता च शाकानि विक्रीय रात्रौ दशवादने गृहम् आगच्छतः । ततः पूर्वम् एव, अहं, मम लघुभ्राता च शयनं कुरुतः । गृहस्य अन्ये सदस्याः एकादशतः (11) सार्धैकादशवादनं यावत् शयनं कुर्वन्ति । केवलं चतुर्णां होराणाम् अनन्तरं प्रातः त्रिवादने (3.00) अस्माकं कुटुम्बस्य नव्यदिनस्य आरम्भः भवति ।

- नीचैः घटिकासु दर्शितेषु समयेषु भवान् वैशाली च किं-किं कुर्वन्तः भवन्ति ?





प्रातः **प्रातः** **प्रातः**

वैशाली _____ वैशाली _____ वैशाली _____

भवान् _____ भवान् _____ भवान् _____

- भवतः गृहे शाकानि कुतः आनीयन्ते ? तानि कः आनयति ?

_____

_____

शाकैः सह काश्चित् क्रीडाः

- अस्मिन् पर्याये यदा भवतः गृहे भिण्डकाः आगच्छेयुः, तदा कञ्चित् भिण्डकं पश्यतु । किं ते सर्वे अपि भिण्डकाः समानाः सन्ति ?
- तासु सर्वतः दीर्घं भिण्डकं, सर्वतः लघुं भिण्डकं च चिनोतु, तयोः मापनं कृत्वा लिखतु ।
- किं तयोः वर्णः समानः अस्ति ? किं तौ समानरूपेण स्थूलौ स्तः? द्वौ गृहीत्वा लम्बं कृत्वा कर्तयतु । किं तयोः समानानि बीजानि सन्ति ? उत्तरपुस्तिकायां तयोः चित्रनिर्माणं करोतु ।
- सीतायाः माता आपणात् कानिचित् फलानि शाकानि च आनीतवती । तानि चित्रे दर्शितानि । चित्रे तानि अन्विष्य वर्णं पूरयतु, तेषां नामानि अपि तत्र एव लिखतु ।

ज्ञानं करोतु

- अत्र केषाञ्चित् फलानां शाकानां च सूचिः दर्शिता अस्ति । एतेषु कानि कानि फलानि शाकानि च शीघ्रं विगलितानि भवन्ति, कानि च विलम्बेन विगलितानि भवन्ति ? तेषां नामानि तालिकायाम् उचितस्थाने पूरयतु । भवान् स्वपक्षतः अपि कानिचित् नामानि अस्यां सूच्यां लेखितुं शक्नोति ।

पालक्या, आलुकम्, कदलीफलम्, रक्ताङ्गः, अमृतफलम्, चीकुफलम्, क्षुपफलम् अलाबुः, पलाण्डुः, पुष्पशाकम्, त्रपुषम्, द्राक्षाफलम्, आर्द्रकम् ।

यानि शाकानि फलानि च शीघ्रतया विगलन्ति	यानि शाकानि फलानि च विलम्बेन विगलन्ति

एतेषु कानिचित् फलानि शाकानि च स्पर्शेन स्निग्धानि प्रतिभान्ति, कानिचित् च स्निग्धशून्यानि । एतेषां नामानि चित्वा उचितसूच्यां लिखतु ।

स्निग्धानि फलानि शाकानि च	अस्निग्धानि फलानि शाकानि च

- कस्यचित् एकस्य फलस्य शाकस्य वा नाम लिखतु, यत् भवान् ग्रहणे अधिकं भारयुक्तम् अनुभवति । तस्य उत्तरपुस्तिकायां चित्रनिर्माणं करोतु ।
- भवान् यानि फलानि शाकानि वा खादितवान्, तेषु सर्वतः न्यूनभारस्य फलं शाकं वा किम् अस्ति ? तस्य नाम लिखित्वा, उत्तरपुस्तिकायां चित्रनिर्माणं करोतु ।
- तेषां त्रयाणां शाकानां नामानि लिखतु, येषु बीजानि न भवन्ति ।

_____ _____ _____

नीचैः प्रदत्तां तालिकां पूरयतु । भवान् अस्याम् अन्यानि त्रीणि नामानि अपि योजयितुम् अर्हति ।

	रङ्गः	दीर्घता	मात्रा	मूल्यम्
सेबफलम्			(½ किलो)	
कदलीफलम्			(1 द्वादशकम्)	
आलुकम्			(½ किलो)	

- स्वक्षेत्रस्य केनचित् शाकविक्रेत्रा सह वार्तालापं करोतु । तम् एतान् प्रश्नान् पृष्ट्वा उत्तरपुस्तिकायां लघ्वीं विवरणिकां लिखतु ।
  - ❑ तस्य किं नाम अस्ति ?
  - ❑ तस्य गृहे कति जनाः सन्ति ? कति बालकाः सन्ति ?
  - ❑ तेषां बालकानां नामानि आयूंषि च कानि सन्ति ?
  - ❑ शाकस्य विक्रयणे तस्य सहायतां के के कुर्वन्ति ?

- ❑ हस्तशकटे / विपण्यां तम् अतिरिच्य के के तिष्ठन्ति ?
- ❑ सः कानि कानि शाकानि विक्रीणाति ?
- ❑ सः कति वादनतः कार्यस्य आरम्भं करोति ?
- ❑ सः दिवसे प्रायः कति होरां यावत् कार्यं करोति ?
- ❑ तं केषाञ्चित् त्रयाणां शाकानां विषये एतत् पृच्छतु -

	शाकम्-1	शाकम्-2	शाकम्-3
शाकस्य नाम			
शाकस्य मूल्यम्			
कस्मात् स्थानात् आनीयते ?			
सः सकृत् कियत् शाकं क्रीणाति ?			
एतत् शाकं केषु मासेषु अधिकं प्राप्यते ?			

पञ्चदशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	हिन्दी
प्रगाढनिद्रा	-	गहरी नीन्द
करण्डः	-	टोकरा
हस्तशकटम्	-	ठेला
विवरणिका	-	रिपॉर्ट
विपणिः	-	दुकान



षोडशः पाठः

चूं चूं कुर्वती आगता चटका

बालमन्दिरम्

भावनगरम्, 13 अप्रैल 1936

प्रियाः बालकाः,

अयं मध्याह्नस्य समयः अस्ति । आकाशे एकः अपि मेघः न अस्ति । सूर्यः तीव्रः भाति ।

फ़ाख्तापक्षी

चटकाः, फ़ाख्तापक्षिणः, शक्करखोरापक्षिणः, सर्वाः अपि युग्मं कृत्वा नीडस्य निर्माणाय सज्जिताः सन्ति । केचित् पक्षिणः तु नीडस्य निर्माणं कृतवन्तः अपि । केषुचित् नीडेषु अण्डेभ्यः शावकाः अपि निर्गताः सन्ति । तेषां शावकानां मातरः पितरः च तान् विभिन्नान् कीटान् अन्यानि वस्तूनि च खादयने व्यस्ताः सन्ति ।

अस्माकम् अङ्गणे अपि फ़ाख्तापक्षिणः एकः शिशुः उत्पन्नः अस्ति । अधुना तस्याः नीडे एकः अन्यः अपि अण्डः अस्ति । प्रतिभाति यत् अस्य माता अधुना अण्डं सेवितवती अपि न ।

अध्यापकाय - गिजुभाई बधेका गुजराते निवसति स्म । सः बालकेभ्यः आनन्दप्रदाः कथाः पत्राणि च लिखति स्म । तेन बालकेभ्यः लिखिते अस्मिन् पत्रे परिवेशस्य पक्षिणां विषये प्रोक्तम् अस्ति । अस्य पत्रस्य पठनानन्तरं बालकान् स्वपरिवेशस्य पक्षिणः द्रष्टुं प्रोत्साहयेत् । पक्षिणां विषये च चर्चां कुर्यात् ।

गोपालस्य गृहस्य पार्श्वे राजमार्गस्य एकस्मिन् तटे बहवः पाषाणाः सन्ति । एतेषां पाषाणानां मध्ये रिक्तस्थाने कलचटका बहून् अण्डान् जनितवती । बच्चूभाई तत् स्थानं मां दर्शितवान् । अहं दूरवीक्षणयन्त्रेण नीडे दृष्टवान् । नीडः तृणेन निर्मितः अस्ति । तस्य उपरि पादपानां सूक्ष्माः मृदुशाखाः, सूक्ष्मानि मूलानि, ऊर्णम्, तूलम् एतत् सर्वम् आस्तीर्णम् अस्ति । कलचटकायाः नीडः ईदृशम् एव भवति । तस्य शिशवः अपि विश्रामप्रदं गृहं शय्यां च लभेरन् । कलचटका काकः इव न भवति । काकस्य नीडे तु लौहस्य तन्तवः, काष्ठानां लघुशाखाः, ईदृशानि अपि वस्तूनि च भवन्ति ।

कलचटका

काकः

कलचटकायाः नीडे अहम् एकं शिशुम् अपि दृष्टवान् । सः चञ्चुम् उज्जृम्भ्य तिष्ठति स्म, तस्य चञ्चुः अन्तस्थात् रक्ता आसीत् । किञ्चित् कालानन्तरं कलचटका कुतश्चित् उड्डीय आगता, तस्य शिशोः चञ्चौ किञ्चित् स्थापितवती । केचित् लघुकीटाः स्युः इति शक्यते । तावत् एव सायङ्कालः सञ्जातः । कलचटका अपि अधुना स्वशिशोः सह नीडे एव उपातिष्ठत ।

कोकिला

बसन्तगौरी-चटका

भवान् जानाति एव, यत् कोकिला मधुरं गायति । किन्तु सा स्वस्य नीडस्य निर्माणं न करोति । सा काकस्य नीडे अण्डान् जनयति । काकः स्वीयैः अण्डैः सह कोकिलायाः अण्डान् अपि सेवते ।

समीपे एकः लघुः पादपः अपि अस्ति । तस्य एकया शाखया नीडः अपि लम्बितः अस्ति । पक्षिषु अपि बहु भेदः अस्ति। काकः वृक्षस्य उन्नतायां शाखायां नीडं निर्माति, तथा च फ़ाख्तापक्षी कैकटसस्य कण्टकानां मध्ये, मेन्धिकावृक्षस्य क्षेत्रे नीडं निर्माति । गोरैया सामान्यतः गृहादीनां पार्श्वे दृश्यते । सा कुत्रचित् अपि नीडं निर्माति यथा - उत्थितपिटकस्य उपरि,

दर्पणस्य पृष्ठे, गृहस्य भित्तिकायाः रिक्ते स्थाने इत्यादिषु स्थानेषु । कपोताः अपि एवम् एव स्वनीडस्य निर्माणं कुर्वन्ति - प्राचीनगृहेषु, जर्जरेषु भवनेषु वा । या च ग्रीष्मकाले टुक-टुक ध्वनिं करोति, सा वसन्तगौरी-चटका वृक्षस्य त्वचायां गूढं छिद्रं कृत्वा तत्र अण्डान् स्थापयति ।

दर्जिन इत्याख्या चटका तु यथा नाम तथा गुणः अस्ति । सा स्वकीयेन तीव्रेण चञ्चुना पत्रं सीवति । तं स्यूतम् इव कृत्वा अण्डान् तस्मिन् जनयति । अयम् एव अस्याः चटकायाः नीडः अस्ति ।

शक्करखोरा-चटका कस्यचित् लघुवृक्षस्य शाखायां गुल्मेषु वा लम्बमानं नीडं निर्माति । तस्मिन् एव सायङ्काले वयम् एकया शाखया लम्बमानं शक्करखोरापक्षिणः नीडं दृष्टवन्तः । किं भवान् जानाति यत् अयं नीडः कैः वस्तुभिः निर्मितम् अस्ति ? तस्याः नीडे केशाः, तृणम्, सूक्ष्माः शाखाः, शुष्कानि पत्राणि, तूलम्, वृक्षस्य त्वचायाः खण्डानि, वस्त्राणां तन्तवः इत्यादयः । एतत् अतिरिच्य लूतायाः जालानि अपि तत्र भवन्ति ।

शक्करखोरा-चटका

विवरपक्षी

अहं दूरवीक्षणयन्त्रेण अपश्यम् - एकः शिशुः अपि आसीत् । नीडस्य एकस्मिन् भागे कश्चन लघुः क्षिद्रः आसीत् । तत्र एव शिशुः भोजनार्थं स्वमातुः प्रतीक्षायामतिष्ठत् । यतः तस्य द्वे एव कार्ये स्तः -भोजनं शयनं च।

किं भवान् वीवरपक्षिणः विषये जानाति ? सर्वे नराः वीवरपक्षिणः स्वस्मै नीडं निर्मान्ति । स्त्री-वीवरपक्षी तान् सर्वान् नीडान् पश्यति, तेषु यः नीडः तस्यै रोचते, तस्मिन् सा अण्डान् जनयति ।

अधुना सर्वे पक्षिणः व्यस्ताः सन्ति । नीडानां निर्माणम्, अण्डानां जननं च - एतत् तु प्रथमः चरणः अस्ति । बहुना परिश्रमेण निर्मिते नीडे शिशूनां सम्यक्तया पालनं बहु दुष्करं कार्यं भवति ।

पक्षिणाम् अनेके शत्रवः सन्ति - मनुष्याः अन्ये अपि पशवः च । काकाः, वृक्षशायिकाः, मार्जाराः, मूषकाः च अवसरं प्राप्य एव अण्डान् चोरयन्ति । बहुवारं नीडान् अपि नश्यन्ति ।

एतेभ्यः शत्रूभ्यः रक्षाकरणं, भोजनस्य अन्वेषणम्, नीडस्य निर्माणम्, अण्डानां सेवनम् , स्वशिशूनां पालनं च.....एतत् प्रत्येकं पक्षिणः परीक्षा अस्ति ।
तथापि एते आनन्देन गायन्ति, पक्षौ विस्तृत्य च उड्डीयन्ते ।

अस्तु, नमस्कारः

भवतः

गिजुभ्रातुः आशीर्वादः

- गिजुभाई बधेका एतत् पत्रं कतिभ्यः वर्षेभ्यः पूर्वम् अलिखत् ?

  _____

- पृच्छतु, तदा भवतः पितामहस्य पितामह्याः, मातामहस्य, मातामह्याः च किम् आयुः आसीत् ?

  _____

- अस्मिन् पत्रे येषां पक्षिणां नामानि सन्ति, भवान् तेषु कति पक्षिणः दृष्टवान् ?

  _____

- एतान् पक्षिणः अतिरिच्य भवन्तः कान् कान् पक्षिणः दृष्टवन्तः?

  _____

- किं भवन्तः कस्यचित् पक्षिणः नीडं दृष्टवन्तः? कुत्र ?

  _____

- भवतः प्रियः पक्षी कः अस्ति ? कक्षायां तद्वत् उड्डीय दर्शयतु, तद्वत् ध्वनिं च करोतु ।
- जानातु अवगच्छतु च -

एकः पक्षी ईदृशः यस्य पुच्छे नाणकम् ।
शिरसः पुच्छं यावत् नीलः एव नीलः (सङ्केतः- अस्माकं राष्ट्रियः पक्षी)

_____

- किं वसन्तगौरी इव कश्चित् अन्यः अपि पक्षी वृक्षस्य त्वचायाः अन्तः नीडं निर्माति ?

_____

- स्वगृहे समीपे वा कस्यचित् पक्षिणः नीडम् अवधानेन पश्यतु । एतत् ध्यातव्यं भवेत् यत् नीडस्य अधिकपार्श्वे न गन्तव्यम्, न च तस्य स्पर्शः कर्तव्यः । यदि कदाचित् स्पर्शः कृतः, तदा पुनः पक्षिणः तस्मिन् नीडे न आगमिष्यन्ति ।

कानिचित् दिनानि यावत् कञ्चित् नीडं पश्यतु,
एतत् ज्ञात्वा च लिखतु -

- ❑ नीडः कुत्र निर्मितः अस्ति ?

  _____

- ❑ कैः कैः वस्तुभिः निर्मितः अस्ति ?

  _____

- ❑ किं नीडः निर्मितः जातः, अथवा पक्षी अधुना अपि अस्य निर्माणं करोति ?

  _____

- ❑ किं भवान् पक्षिणं जानाति ? कः पक्षी अस्ति ?

  _____

- ❑ पक्षिणः नीडे किं किं गृहीत्वा आगच्छन्ति ?

  _____

- ❑ किं नीडे कश्चित् पक्षी स्थितः अस्ति ?

  _____

- ❑ भवतः कः विचारः अस्ति ? पक्षी नीडे अस्ति अण्डे वा ?

  _____

- ❑ किं नीडात् केचित् ध्वनयः (चीं-चीं) श्रूयन्ते ?

  _____

- ❑ यदि नीडे शिशवः सन्ति, तदा तेषां माता पिता च तेषां भोजनाय किं किम् आनयतः ?

  _____

- ❑ पक्षिणः एकहोरायां कतिवारं नीडे आगच्छन्ति ?

  _____

- ❑ शिशवः कतीनां दिनानाम् अनन्तरं नीडं त्यक्त्वा उड्डीनाः ?

  _____

- ❑ भवान् यं नीडं दृष्टवान् तस्य चित्रम् उत्तरपुस्तिकायां निर्मातु ।

- भवान् दृष्टवान् यत् पक्षिणः नीडस्य निर्माणाय पृथक् पृथक् वस्तूनां प्रयोगं कुर्वन्ति । तेभ्यः एव कानिचित् वस्तूनि स्वीकृत्य भवान् अपि नीडस्य निर्माणं करोतु । अस्मिन् एकं कागदेन निर्मितं पक्षिणं स्थापयतु ।

पक्षिणः केवलम् अण्डानां जननाय नीडस्य निर्माणं कुर्वन्ति। यदा अण्डात् शिशुः निर्गच्छति, तदा ते पक्षिणः नीडं त्यक्त्वा उड्डीयन्ते । विचारयतु, वयं कथम् अनुभविष्यामः, यदि वयम् अपि बाल्यकाले (चलनशिक्षणानन्तरं भाषणशिक्षणानन्तरं च) एव गृहं त्यक्तुं विवशाः भवेम ।

नीडान् त्यक्त्वा पक्षिणः पृथक् पृथक् स्थानेषु गच्छन्ति -वृक्षेषु, भूम्यां, जले च । अन्ये जीवाः अपि पृथक् पृथक् स्थानेषु निवसन्ति - केचित् भूम्याम्, केचित् भूमेः अधः, केचित् वृक्षेषु, केचित् जले च निवसन्ति ।

आगच्छतु, किञ्चित् आनन्दप्रदं कुर्मः...

- कक्षायाः बालकाः त्रिषु समूहेषु विभक्ताः भवेयुः । प्रत्येकं बालकः एकस्य पशोः पक्षिणः जन्तुनः वा चित्रं निर्माय, तस्मिन् वर्णं पूरयतु । चित्रे निर्मिते सति, तत् पृथक् कर्तयेत् ।
- अधुना प्रथमसमूहस्य बालकाः एकस्मिन् दीर्घे रेखापत्रे कपिलवर्णं कुर्वन्तु, तस्मिन् लघुशस्यान् मृत्तिकाः इत्यादीन् दर्शयन्तु । अत्र स्थलस्य पशूनां चित्राणि संश्लेषयन्तु ।
- द्वितीयसमूहस्य बालकाः रेखाचित्रे जलं लघून् पाषाणान् च दर्शयन्तु । जले उत्पन्नान् पादपान् अपि निर्मान्तु । ये जन्तवः जले निवसन्ति, अत्र तेषां चित्राणि संलेषयन्तु ।
- तृतीयसमूहस्य बालकाः रेखाचित्रे वृक्षस्य चित्रं निर्माय, तस्मिन् वर्णं कुर्वन्तु । अत्र वृक्षेषु निवासिनां जन्तूनां पक्षिणां च चित्राणि संश्लेषयन्तु ।

एतानि त्रीणि रेखाचित्राणि स्वकक्षायां संश्लेषयन्तु । तेषां चित्राणां विषये च चर्चां कुर्वन्तु ।

पक्षिणां पादाः- यथा कार्यं तथा पादाः

जले तरणाय

शाखानां ग्रहणाय

आखेटस्य ग्रहणाय



वृक्षे आरोहणाय

भूम्यां चलनाय

पक्षिणां चञ्चवः- यथा भोजनम्, तथा चञ्चुः

मांसं छेत्तुं विदारितुं च

काष्ठे छिद्रकरणार्थम्

पुष्पाणां रसग्रहणाय

पङ्कात् कीटान् अन्विष्य भक्षणाय

बीजानि सम्मर्द्य त्रोटयितुम्

कर्तयितुम्

पशूनां दन्ताः

भवान् दृष्टवान् यत् पशूनां दन्ताः पृथक् पृथक् प्रकारस्य भवन्ति ।

गोः अग्रिमाः दन्ताः लघवः भवन्ति, पत्राणां कर्तनाय । शस्यानि, तृणानि च चर्बयितुं पृष्ठे दन्ताः समस्थाः दीर्घाः च भवन्ति ।

मार्जारस्य दन्ताः तीक्ष्णाग्राः भवन्ति, ते मांसं विदीर्णं कर्तुं कर्त्तयितुं च भवन्ति ।

यद्यपि सर्पस्य दन्ताः तीक्ष्णाग्राः भवन्ति, किन्तु सः स्वभक्ष्यं चर्वयित्वा न खादति, अपितु सम्पूर्णम् एव निगरति ।

वृक्षशायिकायाः दन्ताः सदा वर्धिताः भवन्ति । दन्तैः कर्त्तनकारणेन अस्याः दन्तैः सह एव सङ्घर्षन्ति ।

आगच्छतु, स्वदन्तानां विषये काश्चित् वार्ताः ज्ञात्वा लिखतु ।

- भवतः आयुः
- भवतः मुखे कति दन्ताः सन्ति ?
- भवतः कति दन्ताः त्रुटिताः सन्ति ?
- नव्याः दन्ताः कति उत्पन्नाः ?
- कति दुग्धस्य दन्ताः त्रुटिताः, येषां स्थाने नव्याः दन्ताः न आगताः ?

दन्तानां विषये किञ्चित् अन्यत् अपि जानन्तु

स्वमित्राणां दन्तान् पश्यतु । किं तेषां दन्ताः पृथक् पृथक् प्रकारस्य सन्ति ? एकस्य अग्रिमस्य एकस्य पृष्ठस्य च दन्तस्य चित्रम् उत्तरपुस्तिकायां निर्मातु ।

किम् एतेषु दन्तेषु काचित् भिन्नता दृश्यते ?

कल्पनां कृत्वा वदतु

- भवतः अग्रिमस्य उपरिभागे अधोभागे च दन्ताः न सन्ति । भवान् पेरुफलं कथं खादिष्यति ? कृत्वा दर्शयतु ।
- भवतः मुखे अग्रिमभागे तु दन्ताः सन्ति, किन्तु पृष्ठभागे एकः अपि न अस्ति । अधुना भवान् रोटिकां कथं खादिष्यति ? कृत्वा दर्शयतु ।
- भवतः मुखे एकः अपि दन्तः न अस्ति । तदा भवान् कीदृशानि वस्तूनि खादितुं शक्तः अस्ति ?
- यदि भवतः दन्ताः एव न स्युः तदा भवान् कथं प्रतिभाति । उत्तरपुस्तिकायां चित्रं निर्मातु ।
- येषां वृद्धानां दन्ताः न भवन्ति, ते कीदृशानि वस्तूनि भोक्तुं न शक्नुवन्ति ? पृच्छतु ।

यः पक्षी भवतः गृहस्य पार्श्वे सर्वाधिकः दृश्यते, तस्य चित्रं निर्मातु । तस्य शरीरस्य अङ्गानां नामानि अपि लिखतु ।

सप्तदशे पाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	हिन्दी
नीडः	-	घोंसला
कलचटका	-	कलचिड़िया
दूरवीक्षणयन्त्रम्	-	दूरबीन
ऊर्णम्	-	ऊन
तूलम्	-	रूई
आस्तीर्णम्	-	बिछा
तन्तुः	-	तार
चञ्चुः	-	चोंच
लूता	-	मकड़ी
मेन्धिकावृक्षः	-	मेंहदी का पेड
मार्जारी	-	बिल्ली
नाणकम्	-	सिक्का (पैसा)
रेखापत्रम्	-	चॉर्ट
समस्था	-	चपटा
तीक्ष्णाग्रा	-	नुकीला
पेरुफलम्	-	अमरूद

सप्तदशः पाठः

नन्दिता मुम्बय्याम्

अद्य आगतवतः मम मुम्बय्याम् एकः मासः व्यतीतः । माता ततः एव चिकित्सालये प्रविष्टा अस्ति । चिकित्सार्थम् एव वयं ग्रामात् मुम्बयीम् आगतवन्तः ।

मुम्बयी किञ्चित् महानगरम् ।

मम अपि शनैः शनैः नगरे निवासस्य अभ्यासः जातः । परन्तु अद्य अपि तत् दिनं स्मरामि, यदा माता अहं च रेलयानात् रेलस्थानके अवतीर्णवन्तः । अहं तक्षणं मातुः हस्तं ग्रहीतवती । अहं विचारितवती यत् एतावति जनसमूहे मातुलः कथं दृष्टः भविष्यति । तदा एव पृष्ठतः ध्वनिं श्रुतवती, "नन्दिता ! नन्दिता!!" अहं पृष्ठे दृष्टवती, सः मातुलः एव आसीत् ।

अध्यापकाय - मातुः भ्राता मातुलः कथ्यते । बालकान् पृच्छतु, यत् ते स्वमातुः भ्रातरं किं कथयन्ति ।

रेलस्थानकात् मातुलस्य गृहं प्रति गतवन्तः, किन्तु एतत् किम् ? पुनः एतावतः जनसमूहस्य मार्गः अस्ति । सङ्कीर्णां वीथिकाम् उभयतः परस्परं लग्नाः कुटीराः आसन् । वयं तस्याम् एव वीथिकायां चलित्वा मातुलस्य गृहं प्राप्तवन्तः । अत्र एकस्मिन् एव कक्षे मातुलः मातुलानी, तयोः द्वे पुत्र्यौ एकः पुत्रः च निवासं कुर्वन्ति, अधुना अहम् अपि च अत्रैव निवासं करिष्यामि । तत्र एव उपवेशनम्, तत्र एव शयनम्, तत्र एव पाचनम्, तत्र एव च स्नानं कर्त्तव्यम् आसीत् ।

अस्माकं ग्रामस्य गृहे अपि एकः एव कक्षः अस्ति, किन्तु पाकशाला स्नानगृहं च पृथक् पृथक् स्तः । बहिः अङ्गणम् अपि अस्ति ।

जलस्य कष्टम्

अहं प्रातः काले चतुर्वादने उत्थाय मातुलान्या सीमया च सह जलं नेतुं नलकूपं गच्छामि । धिक् । तत्र जलाय बहु विवादः भवति । यदि नलकूपगमने विलम्बः भवति, तदा पूर्णे अपि दिने जलं न प्राप्तुं शक्यते । अस्माकं ग्रामस्य गृहे अपि नलकूपः न अस्ति । ग्रामे तडागं गमनाय विंशतिः निमेषं यावत् समयः अपेक्षितः भवति । ग्रीष्मकाले कदाचित् तडागः शुष्कः भवति चेत् तदा नद्याः जलम् आनेतुं एकहोरां यावत् कालः अपेक्षितः अस्ति ।

अध्यापकाय - मातुः भ्रातुः पत्नी मातुलानी कथ्यते । बालकान् पृच्छेत् यत् ते स्वप्रदेशे तां किं कथयन्ति ।

किन्तु कदापि जलाय विवादः न भवति।



मातुलस्य गृहं यस्यां वीथिकायाम् अस्ति, तस्याः एव एकस्मिन् कोणे एकः शौचालयः अस्ति। वीथिकायाः सर्वे जनाः तत्र एव पुरीषोत्सर्गाय गच्छन्ति। तत्र गमने आरम्भे तु मम वमनं भवति स्म। बहुधा तत्र जलम् अपि न उपलब्धं भवति स्म। जलेन सह एव नेतव्यम् आसीत्। अधुना तु एतस्य अभ्यासः जातः। ग्रामे तु सर्वे मुक्तस्थाने पुरीषोत्सर्गाय गच्छन्ति, किन्तु तत्र पुरुषाणां महिलानां च पृथक् पृथक् स्थानम् अस्ति।

लिखतु

- नन्दिता ग्रामात् किमर्थं मातरं मुम्बयीं प्रति आनयितवती ?

_____

_____

- मातुलस्य नगरे शौचालये गता नन्दिता पूर्वं वमति स्म। किमर्थम् ?

_____

_____

_____

- नन्दिता स्वगृहे स्वमातुलस्य गृहे च कं भेदम् अनुभूतवती ?

_____

_____

_____

- नगरस्य नलकूपात् जलग्रहणे ग्रामे जलग्रहणे च नन्दिता कं भेदम् अनुभूतवती ?

_____

_____

- भवतः मतानुसारम्, किं नन्दितायाः मातुलस्य नगरे विद्युत् भवेत् ?

_____

_____

शिक्षितम् एव

अहं प्रतिदिनं मातरं द्रष्टुं बसयानेन चिकित्सालयं गच्छामि । आरम्भे तु बसयानेषु बहु जनसमूहं दृष्ट्वा तेषु आरोहणस्य साहसः एव न भवति स्म । यतः मम अभ्यासः न आसीत् । अहं भीता अपि आसम् । किन्तु अधुना सर्वं सम्यक् अस्ति । कथं पङ्क्तौ स्थातव्यम्, कति रूप्यकाणां चिटिका क्रेतव्या, कुत्र च अवतरितव्यम् एतत् सर्वम् अहं ज्ञातवती ।

नगरस्य किञ्चित् दूरं यावत् किञ्चन उच्चं भवनम् अस्ति । तत्र एव सप्तसु गृहेषु मम मातुलानी मार्जनस्य पात्राणां प्रक्षालनस्य च कार्यं करोति । कस्मिंश्चित् दिने अहम् अपि मातुलान्या

सह तत्र गतवती । प्रथमं तावत् अहम् अनुभूतवती यत् एतत् एकम् एव उच्चं गृहम् अस्ति । किन्तु यदा गतवती तदा ज्ञातवती यत् एतानि तु उपरि उपरि बहूनि गृहाणि आसन् । अहं विचारितवती यत् एतेषु बहुषु सोपानेषु कथम् आरोहणं करिष्यामि । किन्तु तत्र आरोहणयन्त्रम् अपि आसीत्, तत् एकं दीर्घलौहस्य पिञ्जरम् इव आसीत् । व्यजनम्, घण्टिका, विद्युद्दीपम् - एतत्सर्वं तत्र लग्नम् आसीत् । वयं बहवः जनाः तस्मिन् प्रविष्टाः । आरोहणयन्त्रस्य पिञ्जः नोदितः, तेन तत्कालम् एव उपरि गतवन्तः । सत्यं वदामि, प्रथमं तु अहं भयम् अनुभूतवती ।

वदतु

- किं भवतः कश्चित् सम्बन्धी कदाचित् चिकित्सालये चिकित्सार्थं प्रविष्टः अभवत् ?
  - ❑ कति दिनानि यावत् ?
  - ❑ किं भवान् तं द्रष्टुं गच्छति स्म ?
  - ❑ तत्र तस्य पर्यवेक्षणं कः कः करोति स्म ?
- किं भवान् कदापि उच्चं भवनं दृष्टवान् ? कुत्र ?
- तस्मिन् भवने उपरि उपरि कति भवनानि आसन् ?
- भवान् कस्मिन् अपि भवने कियत् उपरि यावत् गतवान् ?

अन्यस्मिन् गृहे

मातुलानी सर्वप्रथमं मां बबलोः गृहे नयितवती । तस्य गृहस्य उपरि गत्वा द्वादशे तले आसीत् । उपवेशकक्षः, भोजनकक्षः, शयनकक्षः एताः सर्वाः कक्षाः पृथक् पृथक् आसन्, एवं पाकशाला अपि आसीत् । तत्र शौचालयः अपि गृहम् अन्तः एव आसीत् । बबलोः गृहस्य कार्यकरणे यद्यपि मातुलान्याः बहु समयः नष्टः, किन्तु सा कार्यकरणे काञ्चित् विशेषबाधां न अनुभूतवती । पाकशालायाम् एव नलयन्त्रम् आसीत्, तस्मात् जलं झर-झर

ध्वनिं कुर्वत् वहति स्म । बबलूः स्नानार्थं जलपात्रं नलस्य नीचैः संस्थाप्य चलचित्रं द्रष्टुं तिष्ठति । बहु जलं व्यर्थं जातम् । एतत् मह्यं न रोचितम्, अतः अहं गत्वा नलस्य पिधानं कृतवती ।

बबलोः गृहे काचस्य दीर्घाणि वातायनानि आसन् । मातुलानी मां वातायनात् अधः द्रष्टुं कथितवती । बबलोः गृहस्य वातायनेभ्यः मातुलस्य नगरं तु अहं दृष्टवती, किन्तु एतत् न ज्ञातवती यत् मातुलस्य गृहं कतमम् अस्ति । उपरिष्टतात् नीचैः सर्वं क्रीडनकम् इव प्रतिभाति स्म । अहम् उपरिष्टात् नीचैः दर्शनात् बहु भयम् अपि अनुभूतवती ।

- आरम्भे नन्दिता मुम्बय्यां कस्मात् कस्मात् कार्यात् भयम् अनुभूतवती ?

_____

_____

_____

अध्यापकाय - अस्मिन् पाठे मातुलस्य नगरस्य उच्चभवनस्य च मध्ये भेदस्य विषये उक्तम् अस्ति । एषां कारणेषु चर्चायाः समये, बालकान् तेषाम् अनुभवानुसारेण अन्येषाम् अपि भेदानां, तेषां कारणानां च विषये विचारयितुं प्रोत्साहितं कर्तुं शक्यते ।

- मातुलस्य गृहे उच्चभवनस्य गृहेषु च कः कः भेदः अस्ति ?

मातुलस्य नगरस्य गृहाणि	उच्चभवने निर्मितानि गृहाणि

- अयं भेदः किमर्थम् अस्ति ? चर्चां करोतु ।

स्वविषये वदतु

- निम्नलिखितेषु भवतः गृहं कीदृशम् अस्ति ? तत्र वर्तुलं करोतु ।

नन्दिता मातुलः बबलूः कस्यचित् अन्यप्रकारस्य

- भवतः गृहे जलं कुतः आगच्छति ?
- किं भवतः गृहे विद्युतः सम्पर्कः अस्ति ? यदि आम्, तदा प्रत्येकं दिने विद्युत् कति होरां यावत् आगच्छति ?
- भवतः गृहस्य पार्श्वे कः चिकित्सालयः अस्ति ?
- निम्नलिखितानि स्थानानि भवतः गृहात् प्रायः कति दूराणि सन्ति ?

	समयः (निमेषेषु)	दूरता (कि.मी.)
बसस्टॉप		
विद्यालयः		
आपणम्		
पत्रालयः		
चिकित्सालयः		

- भवतः क्षेत्रे निर्मितानां पृथक् पृथक् प्रकारस्य गृहाणां चित्रम् उत्तरपुस्तिकायां निर्मातु ।

एका नव्या चिन्ता

मातुलः उक्तवान् यत् सः मां मुम्बय्यां भ्रमणार्थं नाययिष्यति । नगरस्य बालकाः चौपाटी इति स्थलस्य बहुवार्ताः कुर्वन्ति । श्रूयते, यत् तत्र बहवः चलचित्रस्य कलाकाराः अपि आगच्छन्ति । हे प्रभो । वयं तत्र गच्छेम, कञ्चित् चलचित्रस्य अभिनेतारं च पश्येम । अधुना मातुलः बहु दुःखितः अस्ति । अतः अहं तेन मुम्बय्यां भ्रमणार्थम् अपि वक्तुं न शक्ता अस्मि । विगते सप्ताहे केचित् जनाः नगरस्य रिक्तकरणाय सूचनापत्रं दत्तवन्तः । अधुना अत्र महतः नगरगृहस्य निर्माणं भविष्यति । मातुलः उक्तवान् यत् मह्यं विगतेषु दशवर्षेषु तृतीयवारं सूचनापत्रं दत्तम् अस्ति । ये जनाः अत्र निवसन्ति, तेभ्यः स्वगृहस्य निर्माणाय किञ्चित् अपरं स्थानं प्रदीयते । नगरस्य मूल्यरूपेण यत् स्थानं दीयते तत् नगरात् बहु दूरम् अस्ति । नगरस्य अपरस्मिन् कोणे एव तत् स्थानम् अस्ति । तत्र न तु पेयं जलम् अस्ति, न च विद्युत् । न जाने तत्र किमपि बसयानम् अपि गच्छेत् न वा । न जाने, मातुलः कथम् एतावतः दूरात् स्थानात् कार्यं कर्तुम् आगच्छेत् ? ततः आगमने तु अत्यधिकं धनं समयः च नष्टौ भविष्यतः । एवं च मातुलानी अपि न जाने तत्र कार्यं प्राप्स्यति न वा । यदि मातुलः नव्ये स्थाने गच्छेत्, तदा अहं मात्रा सह मेलनार्थं कथम् आगच्छेयम् । माता तु अधुना पूर्णतः स्वस्था अपि न जाता ।

अध्यापकाय - नन्दितायाः मातुलस्य कुटुम्बस्य इव बहवः जनाः स्वगृहाणि त्यक्तुं विवशाः भवन्ति । कक्षायाम् एतेषां कारणानां विषये चर्चां कारयितुं शक्यते । एतैः परिवर्तनैः तेषु कुटुम्बेषु जातस्य प्रभावस्य विषये अपि चर्चा कारयितुं शक्यते ।

उत्तरपुस्तिकायां लिखतु

- मातुलः किमर्थं स्वगृहं परिवर्तयितुं विवशः अस्ति ।
- किं भवान् कदापि स्वगृहं परिवर्तितवान् ? यदि आम्, तर्हि कैः कारणैः परिवर्तितवान् ?
- किं भवतः कुटुम्बस्य जनाः कार्यकरणाय गृहात् दूरं गच्छन्ति ? ते कुत्र गच्छन्ति ? ते कियत् दूरं गच्छन्ति ?

चर्चां करोतु

- किं मातुलस्य नगरं विनश्य तत्र आपणगृहस्य निर्माणम् उचितम् अस्ति ?
- अनेन कस्मै लाभः भविष्यति ?
- अनेन के दुःखिताः भविष्यन्ति ?
- किं भवान् तादृशस्य कुटुम्बस्य विषये जानाति, यः नन्दितायाः कुटुम्बः इव दुःखितः अभवत् ? तस्य विषये कक्षायां वदतु ।

कस्यचित् गृहस्य चित्रं निर्माय तस्मिन् वर्णं पूरयतु ।

सप्तदशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	हिन्दी
कुटीरः	-	झुग्गियां
सङ्कीर्णा	-	संकरी
वीथी	-	गली
वमनम्	-	उलटी
मुक्तस्थानम्	-	खुली जगह
पिञ्जरम्	-	पिंजरा
विद्युद्दीपम्	-	बल्ब
भवनम्	-	बिल्डिंग
अन्तः	-	अन्दर
सम्पर्कः	-	कनेक्शन
सूचनापत्रम्	-	नोटिस
महान्	-	बड़ा
नगरम्	-	बस्ती

अष्टादशः पाठः
जलं कुत्रचित् अधिकं, कुत्रचित् अल्पम्

पिपासां कथं शाम्येम ?

नल्लामडा, आन्ध्रप्रदेशः

सुगुणा पुस्तकं पठति स्म, तदा एव कस्यचित् आगमनस्य ध्वनिः श्रुतः । सा दृष्टवती यत् नगरात् कश्चित् अतिथिः आगतवान् । पिता तम् आसन्दे उपावेशितवान्, अपि च सेल्वाम् उक्तवान् यत् तस्य कृते शीतलपेयम् आनयतु इति ।

अतिथिः उक्तवान् यत् - "शीतलपेयं तु अहं न पिबामि । केवलं एकं चषकं जलमात्रं ददातु"। पिता अवदत् - "अत्र जलं पेयं न अस्ति । दर्शनेन अपि एतत् शुद्धं न अस्ति । भवान् एतत् जलं न पिबेत् इति एव उचितम्, वयं तु विवशतया एतत् जलं पिबामः" ।

चर्चां करोतु

- दूषितजलस्य पानेन शरीरस्य का हानिः भवितुम् अर्हति ?
- किं भवतः गृहे नगरे वा कदापि नलयन्त्रेषु दूषितं जलम् आगतम् ?
- किं भवतः गृहे दूषितजलस्य पानेन कश्चित् अपि रुग्णः जातः? चर्चां करोतु ।
- सुगुणायाः नगरे जनानां पानाय स्वच्छं जलं न आसीत् । अतः अतिथ्यै शीतलपेयं प्रस्तुतम् । भवान् किं विचारयति, सुगुणायाः कुटुम्बस्य जनाः प्रतिदिनम् एव जलं पातुं किं कुर्वन्ति ?
- अतिथिः शीतलपेयं पातुं निषेधं कृतवान् । भवतः अनुसारं सः किमर्थम् एतत् कृतवान् ?

जलस्य क्रीडाः

बाजारग्रामः महाराष्ट्रः बाजारग्रामस्य पार्श्वे एव एकं दीर्घं जलोद्यानम् आसीत् । कस्मिंश्चित् दिने रोहनः रीना च मात्रा पित्रा च सह तत्र गतवन्तौ । तत्र बहवः उत्सेकाः आसन् । तदा एव रीना अवदत् रोहन! पश्यतु । अत्र विभिन्नप्रकारस्य जलयन्त्राणि सन्ति । रोहनः अवदत्-

एवं तत्र पश्यतु! कियन्तः दीर्घाः तडागाः। छपाक । छपाक । इति ध्वनिं श्रुत्वा उभौ दृष्टवन्तौ । ज़ूम । ज़ूम । ज़ूम । पिच्छलपट्टिकातः तीव्रगत्या स्खलन्तः बालकाः छपाक इति ध्वनिं कुर्वन्तः जले पतन्ति स्म । रोहनः एकस्मिन् दीर्घे हिन्दोले प्रविष्टः, एकक्षणे एव च प्रोच्चस्थानात् नीचैः जले पतितः । रीना तु भयात् उच्चैः शब्दं कृतवती ।

पृष्ठे

तदा एव उद्यानात् बहिः कोलाहलः श्रुतः । सर्वे जनाः दीर्घं द्वारं प्रति धावितवन्तः । तत्र रिक्तानि जलपात्राणि घटान् च गृहीत्वा बहवः जनाः उपस्थिताः आसन् । एकः लघुः बालकः रिक्तां कूपीं गृहीत्वा स्वमात्रा सह आश्लिष्टः आसीत् ।

सा महिला क्रोधेन उक्तवती - त्वं पृच्छसि, यत् किं भवति । अस्माकं कूपाः शुष्काः सन्ति । सप्ताहे एकवारम् पेयजलस्य यानम् आगच्छति । अद्य तु तत् अपि न आगतम् । अत्र एतावत् अधिकं जलं च केवलं भवतीनां क्रीडायै अस्ति । वदतु वयं किं कुर्मः ।

पठित्वा लिखतु

- किं भवतः गृहे कदापि जलस्य न्यूनता जाता? कदा ?

  _____

  _____

- तदा भवान् किं कृतवान् ?

  _____

- किं भवान् कदाचित् जले क्रीडितवान् ? कदा कुत्र च ?

  _____

  _____

- किं भवतः जले क्रीडनाय निषेधः क्रियते ? किमर्थम् ?

  _____

  _____

- किं भवान् प्रतिवेशिनः गृहे जलं व्यर्थं प्रवहन्तं दृष्टवान् ? चर्चां करोतु ।

  _____

  _____

- जलोद्याने क्रीडनाय बहु जलम् आसीत्, किन्तु तस्मिन् ग्रामे जनानां पानाय जलं न आसीत् । विचारयतु, एवं किमर्थम् ?
- यदि भवान् कदाचित् जलोद्याने गच्छेत्, तदा पृच्छेत् यत् तत्र जलं कुतः आगच्छति ।

किम् एतत् पातुं शक्यते

कफ़ परेड, मुम्बयी

उत्थापनयन्त्रं षड्विंशतमं भूमिं प्राप्तवत् । दीपकः उत्थापनयन्त्रे बहु आनन्दम् अनुभवति । अद्य विद्यालयस्य अवकाशः अस्ति । अतः सः मात्रा सह रजियामहोदयायाः गृहम् आगतवान् । अत्र तु सर्वं शीतलं शान्तं च प्रतिभाति। रजिया समाचारपत्रं पठन्ती आसीत् । सा स्मित्वा दीपकं दृष्टवती, पृष्टवती च - किम् भोः ! अद्य अवकाशः अस्ति किम् ? रजिया दूरदर्शनयन्त्रं चालितवती, दीपकः तस्मिन् हास्यचित्राणां दर्शने तल्लीनः तदा एव रजिया उक्तवती- भोः पुष्पे! समाचारपत्रे सूचना अस्ति यत् अस्मिन् क्षेत्रे जलनलिकायां मलयुक्तं जलं मिश्रितं जातम् । अत्र लिखितम् अस्ति-

यत् अनेन दूषितजलस्य कारणेन बहवः जनाः अतिसारेण विषूचिकया च रुग्णाः सन्ति । ह्यस्तनं जलं क्षिप्त्वा, काषुचित् स्थालीषु जलम् उत्क्वाथयतु । भवती स्वगृहे प्रयोगाय अपि उत्क्वाथितं जलं नयतु । दीपकः प्रसन्नः अभवत् यत् अद्य होरापर्यन्तं पङ्क्तौ स्थितः न भवेयम्।

उत्तरपुस्तिकायां लिखतु

- समाचारपत्रं पठित्वा रजिया उद्विग्ना किमर्थम् अभवत् ?
- रजिया ह्यस्तनं सर्वं जलं क्षेप्तुम् उक्तवती, किं तस्य जलस्य कश्चित् अन्यः उपयोगः भवितुं शक्यते स्म ? कस्मै कार्याय ?
- रजिया जलं शोद्धुं कम् उपायम् आश्रितवती ?
- भवान् जलं शोद्धुं कान् कान् उपायान् जानाति ?
- यदि रजिया समाचारपत्रस्य सूचनां न पठेत्, सर्वे च विना उत्क्वाथ्य एव जलं पिबेयुः, तदा किं भवेत् ?

चर्चां करोतु

- दीपकस्य नगरे जलं पूरयितुं पङ्क्तौ स्थातव्यं भवति, रजियायाः गृहे च, पूर्णे दिने जलम् आगच्छति । एतत् किमर्थम् ?
- रजिया समाचारपत्रात् जलस्य सूचनां प्राप्तवती । किं भवान् कदाचित् समाचारपत्रे जलेन सम्बद्धां काञ्चित् सूचनां पठितवान् ? कां सूचनां पठितवान् ?

स्वयं कृत्वा चर्चां करोतु

- विगते मासे पृथक् पृथक् समाचारपत्रेषु जलेन सम्बद्धाः याः सूचनाः आगताः, ताः एकत्रितं कृत्वा कस्मिंश्चित् दीर्घे कागदे संश्लेषयतु । एतासां विषये चर्चां करोतु ।

किं भवान् कदाचित् अतिसारेण वमनेन च पीडितः जातः ? तदा किम् अभवत् ? यदा अतिसारः भवति वमनं वा भवति तदा अस्माकं शरीरात् बहु जलं बहिः निर्गच्छति । एतत् शरीराय हानिकारकं भवितुम् अर्हति। अतः आवश्यकम् अस्ति यत् शरीरे जलस्य अभावे सति, सः अभावः दूरीकरणीयः । यावत् अतिसारः वमनं च भवेतां, तावत् किञ्चित्कालानन्तरं पुनः पुनः जलं पिबेत् । जले शर्करा लवणं च मिश्रिते ।

आगच्छतु लवणशर्करापेयं कुर्मः ।

एकं चषकं यावत् पेयजलम् उत्क्वाथ्य शीतलं करोतु । अस्मिन् एकं लघुचमषं यावत् शर्करां मिश्रयतु । किञ्चित् लवणं मिश्रयतु । एतत् मिश्रणं आस्वादयतु, एतत् अस्माकम् अश्रूणाम् आस्वादनात् अधिकं लवणयुक्तं न भवेत् ।



रोगी यदा अपि अतिसारेण वमनेन च पीडितः भवेत् तदा एतत् मिश्रणं पिबेत् । अल्पाहारः अपि अवश्यं ग्रहीतव्यः । यदि शिशुः रोगी अस्ति तदा तस्मै स्वमातुः दुग्धपानम् आवश्यकम् अस्ति। रोगनिवारणार्थम् औषधयः (याः गृहे निर्मिताः अपि भवितुम् अर्हन्ति) अपि अवश्यं स्वीकरणीया । यदि वमनम् अतिसारः च न शान्तौ भवेताम्, तदा वैद्यस्य परामर्शः आवश्यकः अस्ति ।

स्वविद्यालये जलस्य निरीक्षणम्

कक्षायाः सर्वे छात्राः त्रिषु समूहेषु विभक्ताः भवेयुः ।

- प्रथमसमूहस्य बालकाः पेयजलस्य व्यवस्थायाः विषये ज्ञानं कुर्वन्तु ।
- द्वितीयसमूहस्य बालकाः शौचालयस्य व्यवस्थायाः विषये ज्ञानं कुर्वन्तु ।
- तृतीयः समूहः स्वकक्षायाः बालकेषु जातानां रोगाणां विषये ज्ञानं करोतु ।

निम्नलिखिताः प्रश्नाः बालकानां ज्ञानस्य एकत्रीकरणे सहायतां करिष्यन्ति ।

प्रथमः समूहः

द्रष्ट्वा लिखतु

- उचितस्थाने (✓) इति चिह्नं करोतु
  - ❑ विद्यालये पेयजलं कुतः आगच्छति ?

नलकूपात् ☐ जलटंकीतः ☐ हैण्डपम्पात् ☐ कुतश्चित् अन्यस्मात् वा ☐

  - ❑ भवान् विद्यालये पेयजलं कुतः प्राप्नोति ?

नलकूपात् ☐ वापिका ☐ हस्तनलिका ☐ कुतश्चित् अन्यस्मात् वा ☐

- यदि नलकूपं घटाः हस्तनलिकाः च न सन्ति, तदा पेयजलं कुतः आनयति ?

_____

- किं सर्वेषु नलयन्त्रेषु हस्तनलिकासु च जलम् आगच्छति ?

_____

- किम् एतेषु कस्माच्चित् नलयन्त्रात् जलं सदा वहति, क्षरति वा ?

_____

- किं सर्वेषु घटेषु पात्रेषु वा जलं पूर्णम्, आच्छादितं च भवति ?

_____

- किं घटानाम् अन्येषां च जलपात्राणां प्रतिदिनं मार्जनं क्रियते ?

_____

- जलं पातुं योग्यं कथं भवति ?

_____

- किं घटेभ्यः जलपात्रेभ्यः च जलं ग्रहीतुं दीर्घवारङ्गयुतानि पात्राणि सन्ति ? यदि सन्ति, तर्हि कियन्ति ?

- यत्र जलं पीयते, किं तस्य स्थानस्य प्रतिदिनं मार्जनं क्रियते ?

विचारयतु, चर्चां करोतु

- एतानि स्थानानि किमर्थं दूषितानि भवन्ति ?
- एतेषां स्थानानां शुद्धतायै किं कर्तुं शक्यते ?

ज्ञानं करोतु उत्तरपुस्तिकायां च लिखतु

- येन पात्रेण घटात् जलस्य ग्रहणं कुर्मः, तस्य पात्रस्य, घटस्य च कतिषु दिनेषु मार्जनं भवति ? कः मार्जनं करोति ?
- विद्यालये कति बालकाः सन्ति ? कति घटाः, नलयन्त्राणि, हैण्डपम्पाः च सन्ति ? किं तानि सर्वेभ्यः बालकेभ्यः पर्याप्तानि सन्ति ?
- एतेषां स्थानानां मार्जनं के कुर्वन्ति ?
- यत् जलं नीचैः पतति, तत् कुत्र गच्छति ?

द्वितीयः समूहः

दृष्ट्वा लिखतु -

- ❑ उचितस्थाने (✓) चिह्नं करोतु ।
- ❑ विद्यालये शौचालयस्य का व्यवस्था अस्ति ?

पक्वः शौचालयः ☐ मुक्तं स्थानम् ☐

- तत्र कति शौचालयाः सन्ति ?

- किं बालकानां बालिकानां च शौचालयाः पृथक् पृथक् सन्ति ?

( ) आम् ( ) नैव

- किं तत्र जलम् अस्ति ? ( ) आम् ( ) नैव
- जलं कुतः आगच्छति ? ( ) आम् ( ) नैव
  - ❑ नलकूपात् ( ) आम् ( ) नैव
  - ❑ भरितात् वापिकातः ( ) आम् ( ) नैव
  - ❑ गृहात् आनेतव्यं भवति ( ) आम् ( ) नैव
- हस्तप्रक्षालनाय जलम् अस्ति किम् ? ( ) आम् ( ) नैव
- किं भवान् शौचालये गमनानन्तरं हस्तौ प्रक्षालयति ? ( ) आम् ( ) नैव
- किं किञ्चित् अपि नलयन्त्रं वहति क्षरति वा ? ( ) आम् ( ) नैव
- किं शौचालयाः स्वच्छाः सन्ति ? ( ) आम् ( ) नैव

ज्ञात्वा लिखतु

- विद्यालये कति बालकाः बालिकाः च सन्ति ?

  बालकाः _____ बालिकाः _____

- बालकेभ्यः बालिकाभ्यः च कति शौचालयाः सन्ति ?

  बालकेभ्यः _____ बालिकाभ्यः _____

- यदि नलयन्त्राणि न सन्ति, तदा शौचालये जलं पूरयित्वा कः स्थापयति ? जलं कुतः आनेतव्यं भवति ?

  _____

- अस्य स्थानस्य मार्जनं कः करोति ?

  _____

वदतु

- शौचालयस्य मार्जनाय किं किं कर्तुं शक्यते ?

- शौचालयस्य मार्जनाय वयं किं किं कर्तुं शक्नुमः ?
- किं भवान् बसस्थानके रेलस्थानके वा शौचालयं दृष्टवान् ? गृहस्य शौचालये तेषु शौचालयेषु च कः भेदः अस्ति ?

तृतीयः समूहः

स्वकक्षायाः बालकेभ्यः ज्ञात्वा निम्नलिखितां तालिकां पूरयतु । विगतेषु केषुचित् मासेषु भवतः कक्षायाः कति जनाः केन रोगेण ग्रस्ताः जाताः ? तेषां बालकानां नामानि उचितस्थाने लिखतु ।

क्र.	अतिसारः	वमनम्	अतिसारः वमनं च युगपत्	पीतवर्णस्य मूत्रं, किञ्चित् ज्वरः, नेत्रयोः शरीरे च पीतवर्णता	उदरपीडा
1.					
2.					
3.					
4.					
5.					

निरीक्षणेन भवान् यत् ज्ञातवान् तस्य विषये स्वशिक्षकेण चर्चां करोतु, स्वपरामर्शान् लिखित्वा विवरणिकां निर्मातु । एतां विवरणिकां विद्यालयस्य सभायां पठतु सूचनापट्टे च संश्लेषयतु ।

अध्यापकाय - अत्र केवलं तेषां लक्षणानां चर्चा कृता अस्ति, यानि बालकाः जानन्ति । यदि एतत् विषूचिकायाः कारणात् अस्ति, तर्हि तस्याः विषये चर्चा कर्तव्या । तत्र परिवेशे के के रोगाः सन्ति? एतत् शक्यं नास्ति यत् सर्वे बालकाः एतेषां रोगाणां विषये जानन्ति एव ।

बालकाः एव प्रथमम् आरम्भं कृतवन्तः

कर्नाटकस्य होलगुण्डीग्रामस्य जनेभ्यः जलस्य न्यूनता जाता । वर्षाकाले एव कूपेषु जलं भवति स्म । विगतेषु त्रिषु वर्षेषु तत्र वर्षायाः अभावात् जलस्य शुष्कता जाता । तत्र कस्मैचित् अपि कार्याय जलं न आसीत् - न तु कृषिकार्याय, न पानाय, न च पशूभ्यः । पराजयं स्वीकृत्य बहवः जनाः वृत्त्यै ग्रामात् नगरं प्रति पलायनं कृतवन्तः । तेषां बालकाः अपि विद्यालयं त्यक्त्वा कुटुम्बेन सह गतवन्तः ।

अनेन कष्टेन ग्रामसभा अपि दुःखिता आसीत् । सर्वे जनाः जलस्य समस्यायाः विषये वार्तां कृतवन्तः । अस्याः ग्रामसभायाः एका विशेषता अस्ति । अस्यां सभायां ज्येष्ठैः सह बालकाः अपि सन्ति । बालकानाम् अस्याः सभायाः नाम अस्ति- 'भीमासङ्घः' इति ।

बालकाः ज्येष्ठान् पृष्टवन्तः - किम् अस्माकं ग्रामे पूर्वम् अपि जलस्य समस्या आसीत् ? केचित् ज्येष्ठाः उक्तवन्तः यत् पूर्वम् एवं न आसीत् । लघुपर्वतस्य उपरि एका जलस्य महती वापिका आसीत्, तस्यां वृष्टेः जलं पूरितं भवति स्म । तस्यां मत्स्याः अपि भवन्ति स्म, एवं च तां परितः बहु हारित्यम् आसीत् । तस्मिन् समये तु ग्रामस्य अन्येषु अपि कूपेषु तडागेषु च जलम् आसीत् ।

भीमासङ्घस्य बालकाः विचारितवन्तः यत् ते सर्वप्रथमं तां वापिकां द्रक्ष्यन्ति । यदा ते वापिकां दृष्टवन्तः तदा ज्ञातवन्तः यत् सा वापिका पङ्केन पाषाणैः च भृता आसीत् । तत्र जलं कुतः पूरितं भवेत् ? तस्याः भित्तिकासु अपि छेदाः आसन्, कुतः जलं स्थिरं भवेत् ? समीपे न तु कश्चित् पादपः आसीत् न शस्यं वा ! कथं भवेत् हारित्यम् ?

बालकाः ग्रामस्य ज्येष्ठैः सह वापिका-मार्जनाय तस्य समीपेषु पुनः वृक्षारोपणस्य च वार्तां कृतवन्तः । जलस्य समस्यायाः समाधानं तस्मै एव वर्षाय न, अपितु दीर्घकालाय अन्वेष्टव्यम् आसीत् ।

अध्यापकाय - बालकान् भारतस्य मानचित्रे कर्णाटकराज्यम् अन्वेष्टुं प्रेरयेत्

नव्यां योजनां निर्मातुम् एतत् ज्ञानम् अपि आवश्यकम् आसीत् यत् जलं, पूर्वापेक्षया न्यूनं किमर्थम् अस्ति । सर्वं पूर्ववत् किमर्थं न अस्ति । एतत् सर्वं ज्ञातुं ग्रामसभा नगरस्य केषाञ्चित् तेषां जनानां सहायता अपि स्वीकृता ये जलसुरक्षायाः विशेषज्ञाः आसन् । सर्वे मिलित्वा योजनां निर्माय कार्यं कृतवन्तः ।

वापिका एकस्मिन् लघुपर्वते आसीत्, अतः जलं वापिकायाम् एकत्रितं न भवति स्म अपितु, अधः वहति स्म । जलेन सह एव मृत्तिका अपि वहति स्म । ते सर्वप्रथमं वापिकायाः मार्जनं कृतवन्तः । तत्पश्चात् तस्याः भित्तिकानां छिद्रान् पूरयित्वा वापिकां दृढां कृतवन्तः । तस्य समीपे छायाप्रदाः वृक्षाः आरोपिताः, प्राचीनवृक्षाः च जलेन सिञ्चिताः । वयं तत्र शस्यम् अपि आरोपितवन्तः । बालकाः अवसर्पिमार्गे बहुषु स्थानेषु बन्धं कृतवन्तः । ततः सर्वे वृष्टेः प्रतीक्षां कृतवन्तः ।

वृष्टिः आगता, वापिकां च पूर्ववत् जलेन पूरितवन्तः। ते तत्र कांश्चित् मत्स्यान् अपि पातितवन्तः । बालकाः तस्य सुरक्षायां नियुक्ताः अभवन् यत् कश्चित् मत्स्यान् न चोरयेत्, पादपान् च न त्रोटयेत्।

ते स्वपरिश्रमस्य फलं प्राप्तवन्तः । द्वित्रेषु वर्षेषु वापिका पूर्णतः जलेन पूरिता । तस्मिन् पूर्णे वर्षे जलं भवति स्म । तत्समीपक्षेत्रम् अपि शस्यैः पादपैः च हारित्येन युक्तः जातः । शनैः शनैः ग्रामस्य अन्येषु अपि कूपेषु तडागेषु च जलं पूर्णं जातम् । भीमासङ्घस्य अनेन सफलेन प्रयासेन ग्रीष्मकाले कश्चित् अपि ग्रामात् पलायनाय विवशः न भवति।

एतत् सर्वं भवतः आयुषा समानैः बालकैः कृतम् - भीमासङ्घेन । ते बालकाः तु अधुना ज्येष्ठाः सञ्जाताः, किन्तु भीमासङ्घः अद्यापि अस्ति । अद्य अपि तस्मिन् सङ्घे नव्याः बालकाः सम्मिलिताः भवन्ति, कार्यं च कुर्वन्ति ।

अध्यापकाय - बालकेभ्यः ईदृशान् अनुभवान् शृणुयात्, ईदृशान् अनुभवान् एकत्रीकरणाय च कथयेत् ।

अष्टादशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	हिन्दी
जलोद्यानम्	-	वॉटर पार्क
उत्सेका	-	फ़व्वारा
पिच्छलपट्टिका	-	फिसल पट्टी
हास्यचित्राणि	-	कार्टून
जलनलिका	-	पानी का पाइप
मलयुक्तः	-	गन्दगी युक्त
ह्यस्तनम्	-	बीता हुआ कल का
स्थाली	-	पतीला
वापिका	-	टंकी
वारङ्गः	-	हैंडल
विवरणिका	-	रिपॉर्ट
सूचनापट्टिका	-	नोटिस बोर्ड
ग्रामसभा	-	ग्राम पंचायत
पर्वतः	-	पहाडी
पङ्केन	-	कीचड़
भित्तिः	-	दीवार
पादपः	-	पौधा
शस्यम्	-	घास
हारित्यम्	-	हरियाली
अवसर्पिमार्गः	-	ढलवां मार्ग

नवदशः पाठः

मूलानां जालम्

अब्दुलः अवकाशस्य दिने उद्यानस्य कार्ये स्वपितुः सहायतां करणाय गतवान् । पिता अद्य कलायः पङ्क्तिभ्यः शुष्काणि पत्राणि वन्यानि शस्यानि च निष्कास्य पृथक् करोति स्म । अब्दुलः अपि कलायस्य पङ्क्तिभ्यः शस्यानि क्रष्टुम् आरब्धवान् । सः शस्यं सरलतया क्रष्टुं न शक्नोति स्म । द्वित्राणां शस्याणां कर्षणेन एव तस्य हस्तौ रक्तवर्णीयौ जातौ । शस्यपादपानां कर्षणस्य कारणात् एव लतायाः आश्रयरूपेण यः दण्डः स्थितः आसीत् सः पतितः, तेन एव च कलायस्य कोमला लता अपि भग्ना जाता । पिता उक्तवान् - भवान् एवं शस्यपादपान् कथं कर्षति ? शस्यानां मूलानि दृढानि भवन्ति । भवान् एतानि लवित्रेण खनित्वा निष्कासयतु । अब्दुलः लवित्रेण शस्यानां निष्कासनस्य प्रयत्नं कृतवान्, किन्तु एतत् कठिनम् आसीत् । सः दृष्टवान् यत् यावत् घासस्य पादपः भूमेः उपरि आसीत्, तदपेक्षया अपि अधिकं भूमेः अधः प्रसृतम् आसीत् ।

- हरेणोः लतायाः आश्रयः दण्डः तु तत्क्षणम् एव अधः पतितः, किन्तु अब्दुलः शस्यस्य लघुपादपम् अपि सरलतया कथं न उत्पाटयितुं शक्तवान् ?
- किं सर्वेषां पादपानां मूलानि भवन्ति ?
- स्वपरिवेशे कांश्चित् पादपान् पश्यतु । अनुमानेन, एतेषां मूलानि भूम्यां कियत् नीचैः यावत् भवेयुः ।

- त्रयाणां दिनानाम् अनन्तरम् अब्दुलः दृष्टवान् यत् हरेणोः पादपस्य भग्नम् एकं भागं शुष्कं जातम् । चित्रं दृष्ट्वा अनुमानं करोतु यत् पादपस्य कः भागः शुष्कः जातः ? किमर्थम् ?

अब्दुलस्य स्मरणं जातं यत् सलाटवे काश्चित् मूलिकाः उत्पाटनीयाः सन्ति । अब्दुलः मूलिकानाम् उत्पाटनम् आरब्धवान् । सः विचारितवान् - किम् एतानि अपि मूलानि सन्ति ? अधुना अब्दुलः काश्चित् एव मूलिकाः उत्पाटितवान्, तदा एव तीव्रा वातसहिता वृष्टिः च आरब्धा । अब्दुलः तस्य पिता च मूलिकाः गृहीत्वा गृहं प्रति धावितवन्तः । तौ गृहं प्राप्तवन्तौ एव, अकस्मात् अङ्गणे स्थितात् निम्बवृक्षात् शाखां विच्छिद्य पितुः समीपे एव पतिता । किन्तु पिता सुरक्षितः अस्ति । तौ मात्रा सह चायं पातुं तिष्ठतः । पिता उक्तवान् - पादपाः शुष्काः आसन् । अधुना वृष्टिः सञ्जाता, अतः अधुना आवां पादपेभ्यः जलप्रदानाय न गमिष्यावः । अधुना आनन्दपूर्वकं स्थित्वा लूडो इति क्रीडां क्रीडिष्यावः ।

- भवान् किं विचारयति - तीव्रायां वातसहितायां वृष्टौ अपि निम्बवृक्षः कथं न पतितः?
- म्लानेभ्यः पादपेभ्यः जलप्रदानेन तेषां पत्राणि पुनः हरीतानि भवन्ति । कथम् ?
- भवान् किं विचारयति किं सर्वेभ्यः पादपेभ्यः जलम् आवश्यकम् अस्ति ?
- भवतः समीपे परिवेशे केभ्यः पादपेभ्यः प्रतिदिनं जलप्रदानम् आवश्यकम् अस्ति?

_____ _____

- यदि एतेभ्यः पादपेभ्यः जलं न दद्यात्, तदा किं भविष्यति ?
- तदा अब्दुलः विचारितवान् यत् सः तु कदापि निम्बवृक्षाय जलं न दत्तवान्, तदा निम्बवृक्षः कुतः जलं प्राप्नोति ?
- भवतः परिवेशे तादृशाः के के वृक्षाः सन्ति, येभ्यः जलप्रदानस्य आवश्यकता न अस्ति । ते वृक्षाः कुतः जलं प्राप्नुवन्ति ? ऊहां कृत्वा, कारणद्वयं वदतु ।

_____ _____

- किं मूलिका अपि मूलम् अस्ति? एतत् विचार्य अब्दुलः आश्चर्यान्वितः । किमर्थम्?

_____

_____

- निम्नलिखितं चित्रं पश्यतु । ज्ञानं कुरोतु, एतेषु कानि शाकनि पादपानां मूलानि सन्ति ।

प्रश्नाः एव प्रश्नाः

अधुना तु अब्दुलस्य मस्तिष्के पादपानाम् एव विषये विचाराः उत्पन्नाः भवन्ति । तेषां विषये अनेके प्रश्नाः जायन्ते। विद्यालयस्य भित्तिकातः एकं पादपं निर्गतं दृष्ट्वा अब्दुलः विचारं करोति-

- अस्य पादपस्य मूलानि कुत्र पर्यन्तं भवेयुः?
- अस्य मूलानि जलं कुतः प्राप्नुवन्ति ?
- अयं पादपः कियान् दीर्घः भवेत् ?
- भित्तिकायाः किं भविष्यति ?
- समक्षे यत् चित्रम् अस्ति, तस्मिन् प्रदर्शितस्य पादपस्य किं नाम अस्ति ?

अध्यापकाय - पादपाः मूलानां माध्यमेन कथं जलं गृह्णन्ति, एतत् अवगमनम् अस्य आयुषः बालकेभ्यः कठिनम् अस्ति । तथापि एतत् आवश्यकम् अस्ति यत् तेभ्यः अस्मिन् विषये विचारयितुम् अवसरः प्रदेयः । बालकानां चिन्तनं पृथक् पृथक् स्तरस्य भवति । तेषां विचाराः अपि श्रूयेरन् इत्यपि आवश्यकम् ।

भवान् कदाचित् कस्माच्चित् भित्तिकायाः छेदे कञ्चित् पादपं दृष्टवान् ? कुत्र ? किं भवतः मनसि तं दृष्ट्वा कश्चित् प्रश्नः उत्पन्नः?

काञ्चित् प्रश्नान् निर्मातु । तेषां प्रश्नानाम् उत्तराणि ज्येष्ठान् पृच्छतु । यं पादपं भवान् दृष्टवान्, तस्य किं नाम अस्ति ?

अब्दुलः दृष्टवान् यत् मार्गे कश्चित् बहु दीर्घः वृक्षः पतितः अस्ति । तस्य वृक्षस्य काश्चित् पतिताः शाखाः अपि दृष्टाः । सः स्वगृहस्य निम्बवृक्षं स्मृतवान् । सः विचारितवान् –

- किम् एतावन्तं विशालं वृक्षं कश्चित् उत्पाटितवान् अथवा एषः स्वयम् एव पतितः ?
- एषः वृक्षः कियान् प्राचीनः अस्ति ?
- चित्रे पश्यतु, वृक्षं परितः पाषाणचूर्णेन भूमिः पक्का कृता अस्ति । एषः वृक्षः वर्षाजलं कथं प्राप्नुयात् ?

वदतु

- भवतः क्षेत्रे सर्वाधिकाः प्राचीनाः वृक्षाः के के सन्ति ? स्वज्येष्ठान् पृच्छतु यत् ते वृक्षाः कतिभ्यः वर्षेभ्यः प्राचीनाः सन्ति ?
- अस्मिन् वृक्षे के के पक्षिणः निवासं कुर्वन्ति ?
- किं भवान् कञ्चित् दीर्घं वृक्षं पतितं दृष्टवान् ? तं दृष्ट्वा भवान् किं विचारितवान् ?

अहो, ईदृशानि अपि मूलानि ।

एकां रोचकां वार्तां शृणोतु ! वटवृक्षस्य येषु प्रालम्बेषु अब्दुलः भवान् इव बालकाः च हिन्दोलं कुर्वन्ति, ते तस्य मूलानि सन्ति । ते शाखाभ्यः उत्पन्नाः भवन्ति ।

भूमेः अन्तः च प्रविशन्ति । एते प्रलम्बाः दृढस्तम्भाः इव वृक्षस्य आश्रयाः भवन्ति । अन्येषां वृक्षाणाम् इव वटस्य भूमेः अन्तः अपि मूलानि भवन्ति ।

वृक्षाणां कर्त्तनं नियमविरुद्धम् अस्ति ।

राजमार्गे विद्युतः स्तम्भस्य समीपे कश्चित् दीर्घः छायाप्रदः च वृक्षः अस्ति, किन्तु वृक्षेण आवृतत्वात् विद्युद्दीपकस्य प्रकाशः तत्र न भवति । अनेन कारणेन जनाः तस्य वृक्षस्य कासाञ्चित् शाखानां कर्त्तनस्य आवश्यकताम् अनुभूतवन्तः । अतः ते अस्मै कार्याय क्षेत्रस्य सर्वकारीयात् कार्यालयात् लिखिताम् अनुमतिं प्राप्तवन्तः ।

किं भवान् तं वृक्षं दृष्टवान् यस्य मूलानि, शाखाभ्यः अवलम्बन्ते ।

आगच्छतु कुर्याम

कक्षायाः बालकाः त्रिषु चतुर्षु वा समूहेषु विभक्ताः भवन्तु । एतानि वस्तूनि एकत्रितानि कुर्वन्तु ।

काचस्य चषकः दीर्घमुखी कूपी वा, तूलम्, तन्तुः, केचित् मुद्गाः, गोधूमाः, प्रियङ्गवः, सर्षपाः, चणकाः, राजमाषाः च ।

अधुना एतत् प्रयोगं करोतु । प्रत्येकं समूहः पृथक् पृथक् धान्यस्य बीजं स्वीकुर्यात् । प्रत्येकं बीजानि रात्रिं यावत् कंसे जले स्थापयन्तु । एकं कञ्चन काचस्य चषकं दीर्घमुखीं कूपीं वा गृहीत्वा तस्य मुखे आर्द्रं तूलं च बध्नातु । तत्पश्चात् आर्द्राणि बीजानि आर्द्रे तूले स्थापयन्तु । एतत् आवश्यकम् अस्ति यत् तूलम् आर्द्रम् एव स्यात् । एतत् द्वादशं दिनं यावत् प्रतिदिनं पश्यतु । किं बीजेभ्यः किमपि निस्सरति ? सः पादपः चतुर्थे अष्टमे च दिने कीदृशः दृश्यते ? तस्य चित्रं निर्मातु ।

चतुर्थे दिने

अष्टमे दिने

एतेषां प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखतु -

- शुष्केषु आर्द्रेषु च बीजेषु के भेदाः दृष्टाः?
- यदि तूलं शुष्कम् एव भवेत् तर्हि तस्य उपरि स्थितानां बीजानां किं भवेत् ?
- तस्य पादपस्य मूलं कुत्र जातम् ? तस्य तनुः कुत्र जातम् ?
- एते पादपाः तूले कति दीर्घाः जाताः ?
- किं सर्वेभ्यः एव बीजेभ्यः पादपाः उत्पन्नाः अभवन् ?
- मूलानां कः वर्णः अस्ति ?
- किं मूलेषु केशाः इव दृश्यन्ते ?

- एतान् पादपान् तूलात् पृथक्करणस्य प्रयासं करोतु । किं भवान् पृथक्करणे सफलः जातः ? किमर्थम् ?
- भवान् दृष्टवान् यत् मूलानि दृढरूपेण तूलं गृहीतवन्ति । भवान् किं विचारयति? किम् एवम् एव मूलानि दृढरूपेण मृत्तिकां गृह्णन्ति ?

स्वमित्राणां पादपान् अपि पश्यतु ।

किं भवान् जानाति ?

ऑस्ट्रेलियादेशे एकः वृक्षः भवति, तस्य नाम अस्ति-रेगिस्तानी ओक । अयं वृक्षः भवतः कक्षायाः भित्तिकायाः लम्बतां यावत् लम्बितः अस्ति। अस्मिन् न्यूनानि एव पत्राणि भवन्ति । ऊहां करोतु, यत् अस्य मूलानि भूमौ कुत्र यावत् गम्भीराणि स्युः । विचारयतु यदि तादृशाः त्रिंशत् वृक्षाः भूमौ पङ्क्तौ लम्बतानुसारेण स्थापिताः स्युः, अस्य वृक्षस्य मूलानि तस्य लम्बताम् इव भूमौ गम्भीरतया भवन्ति। अस्य वृक्षस्य मूलानि भूमौ तावत् वर्धन्ते, यावत् जलं न प्राप्नुवन्ति । एतत् जलं वृक्षस्य तनौ एकत्रितं भवति । तस्य क्षेत्रस्य निवासिनः एतत् तथ्यं जानन्ति स्म । यदा कदाचित् तस्मिन् क्षेत्रे जलं न भवति स्म, तदा तस्य क्षेत्रस्य जनाः वृक्षस्य तनौ सूक्ष्मां नलिकां निपात्य जलं प्राप्नुवन्ति स्म ।

किं किं वर्धते ?

आरिफ़ः रूपाली च परस्परं वादं विवादं च आरब्धवन्तौ यत् एते वर्धन्ते ।

आरिफ़ः - पत्राणि, मुन्ना, कलिका, शुनकशिशुः, नखाः, यानम् ।

रूपाली - चन्द्रः, वृक्षः, अहम्, केशाः, कलिङ्गम्, मशकः, काकः।

- भवान् किं विचारयति, एतेषु किं किं वर्धते । भवान् अपि एकां सूचीं निर्माय लिखतु ।

भवान् स्वविषये विचारयतु, भवान् केन केन प्रकारेण विगतेषु केषुचित् वर्षेषु परिवर्तितः, यथा -

- किं भवतः लम्बता वर्धिता ? विगते एकस्मिन् वर्षे कियती ?
- विचारयतु, यदि भवान् कदापि स्वनखान् न कर्त्तयेत्, तदा ते कियत् दीर्घाः स्युः ? उत्तरपुस्तिकायां तेषां चित्रं निर्मातु ।
- भवतः शरीरस्य कश्चन तादृशः भागः अस्ति, यः वर्धते? किं समये समये तस्य कर्त्तनं क्रियते ?

अध्यापकाय - विश्वपर्यावरणदिवसस्य अवसरे विद्यालये स्वक्षेत्रे वा वृक्षाणाम् आरोपणाय बालकान् प्रेरयेत् । तदनन्तरं तेषां वृक्षाणां सिञ्चनाय सुरक्षायै अपि च कथयेत् ।

नवदशे पाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	हिन्दी
हरेणुः	-	मटर
लवित्रम्	-	खुरपी
शस्यपादपः	-	घास का पौधा
सलाटुः	-	सलाद
उत्पाटनम्	-	उखाड़ना
वात्या	-	ऑन्धी
निम्बः	-	नीम
शाखा	-	टहनी
हिन्दोलः	-	झूला
वटस्य	-	बरगद
तूलम्	-	रूई
मुद्गः	-	मूंग
गोधूमः	-	गेहूं
प्रियङ्गुः	-	बाजरा
सर्षपः	-	सरसो
चणकाः	-	चने
राजमाषाः	-	राजमा
तनुः	-	शरीर या तना
शुनकशिशुः	-	पिल्ला
कलिङ्गम्	-	तरबूज

कक्षायां प्रीतिभोजः

अवकाशानाम् अनन्तरम् अद्य विद्यालयः उद्घटितः अस्ति। सर्वे बालकाः अद्य परस्परम् अवकाशस्य विषये वार्तां कुर्वन्ति ।

मीना आरत्याः करतलं दृष्ट्वा उक्तवती - "भवती मेन्धिकया करतलं कदा सज्जितवती"। आरती उक्तवती - "मातुलस्य विवाहे"। डेविडः उक्तवान् - "तत्र तु बहु आनन्दः प्राप्तः स्यात्"। आरती प्रसन्नवदना उक्तवती - "आम्, सर्वाधिकः आनन्दः तु भोजनेन प्राप्तः । तत्र वयं सर्वे भ्रातरः, भगिन्यः, सम्बन्धिनः च युगपत् उपविश्य भोजनं कृतवन्तः"। रेहाना उक्तवती - "वयम् अपि विद्यालये एवम् एव किमपि कुतो न कुर्याम"।

डेविडः उक्तवान् - "आम् । वयं सर्वे मिलित्वा कक्षायां प्रीतिभोजं निश्चयेन कर्तुं शक्नुमः । कियान् आनन्दः भविष्यति तदा । रेहाना उक्तवती - "अस्माकम् उपनगरे सर्वेषु उत्सवेषु प्रीतिभोजस्य आयोजनं भवति । वयं तत्र उपनगरस्य निवासिभ्यः धनम् एकत्रितं कुर्मः। वयं किञ्चित् भोज्यपदार्थं परस्परं सहयोगेन निर्मामः, किञ्चित् च आपणात् क्रीणामः"।

रीना उक्तवती - "प्रीतिभोजनाय उत्सवस्य प्रतीक्षां किमर्थं कुर्मः? शनिवासरे अर्धदिनस्य अवकाशः अस्ति, तस्मिन् एव दिने प्रीतिभोजं कुर्मः"।

सर्वे मिलित्वा निर्णयं कृतवन्तः यत् प्रीतिभोजाय कः बालकः किं वस्तु आनेष्यति । तदनन्तरं प्रीतिभोजः अभवत्। तत्र बहु आनन्दः जातः । विविधा भोजनस्य सामग्री आसीत् । सर्वे मिलित्वा बह्व्यः क्रीडाः क्रीडितवन्तः । नृत्यं गीतम् अपि च कृतवन्तः । बालकाः एवं निर्णयं कृतवन्तः यत् ते प्रायः मिलित्वा प्रीतिभोजस्य आयोजनं करिष्यन्ति ।

उत्तरपुस्तिकायां लिखतु

- किं भवते परस्परं मिलित्वा प्रेमभावेन भोजनकरणं रोचते ?
- केषु अवसरेषु भवान् मिलित्वा भोजनं करोति ?
- किं भवान् कदापि कक्षायां प्रीतिभोजस्य आयोजनं कृतवान् ? तदर्थं भवान् किं किं कार्यं कृतवान् ?
- प्रीतिभोजे भवान् भवतः मित्राणि च कानि कानि वस्तूनि आनीतवन्तः ?
- भवन्तः सर्वे किं किं खादितवन्तः ?
- भवान् स्वकक्षायां प्रीतिभोजे कान् कान् आहूतवान् ?
- किम् एवम् अपि अभवत् यत् कदाचित् भवान् स्वविद्यालयस्य कञ्चित् अपि कर्मचारिणं न आहूतवान्? ते, के के जनाः आसन् यान् भवान् न आहूतवान् ?
- किं भवान् स्वकक्षायां प्रीतिभोजे विशिष्टानि वस्त्राणि धृतवान् ?
- प्रीतिभोजं रोचकं कर्तुं किं किं कर्तव्यम् ? चर्चां करोतु ।

अध्यापकाय - कक्षायां प्रीतिभोजस्य आयोजनस्य उद्देश्यम् अस्ति-बालकेषु प्रेमभावनायाः उत्पादनम्, बालकेभ्यः सहैव उपविश्य भोजनस्य अवसरप्रदानं च । अतः एतदर्थं बालकान् नृत्याय गानाय नाटकाय अपि च प्रेरयतुं शक्यते ।

बीहू-उत्सवः

सोनमोनी शीघ्रम् उत्थितवती, तनवीरायाः, फातिमायाः, मज़ान्याः च पार्श्वे गन्तुं धावितवती । यतः अद्य बीहू-उत्सवः अस्ति - अद्य धान्यानां कर्तनम् अभवत् । चतस्रः सख्यः आनन्देन गीतं गायन्ति स्म । ते वार्तां कुर्वत्यः भेलागृहं निर्मान्ति स्म । सर्वाः मिलित्वा बीहोः सज्जायाः वार्तां कुर्वन्ति स्म । भवान् अपि आसां वार्ताः पठतु ।

सोनमोनी - शीघ्रतां करोतु! रात्रेः भोजात् पूर्वं तृणैः वंशैः च भेलागृहस्य निर्माणं कर्त्तव्यम् अस्ति ।

तनवीरा - अद्य उरुका अस्ति, अतः अद्य तु सम्पूर्णस्य ग्रामस्य जनाः रात्रौ सह एव भोजनं करिष्यन्ति ।

फ़ातिमा - भोजस्य सज्जा आरब्धा किम् ?

सोनमोनी - आम् । सर्वे ग्रामवासिनः धनम् एकत्रितं कृत्वा 'बोरा'तण्डुलानां, मत्स्यानां, शाकानां च व्यवस्थां कृतवन्तः । रात्रौ ज्वालनाय काष्ठस्य, वंशस्य मेजी इत्यस्य च व्यवस्थाम् अपि कृतवन्तः । हरिया भादिया च धनं तु न दत्तवन्तः, किन्तु तौ सर्वं कार्यं कारयन्तौ स्तः ।

फ़ातिमा - मांसम्, मत्स्याः, शाकानि च सन्ति न वा ?

सोनमोनी - केचित् जनाः एतत् सर्वं क्रेतुं गताः । बोरातण्डुलाः आर्द्रीकृताः अस्ति । 'पिठा'निर्माणाय ग्रामस्य सर्वे जनाः कार्ये रताः सन्ति । केचित् भोजनं निर्मान्ति, केचित् च शक्रकन्दान् भृज्जन्ति । केचन जनाः रात्रौ भोजनस्य परिवेषणं करिष्यन्ति । सायङ्काले सर्वेभ्यः चायं पीठा च दास्येते ।

अध्यापकाय-'माघबीहू', जनवरी मासस्य 14-15 दिनाङ्कयोः (असमीयदिनाङ्कपत्रस्य दशमे मासे माघमासस्य प्रथमायां द्वितीयायां च) मन्यते । प्रथमदिनम् उरुका इति कथ्यते । अस्मिन् दिने अस्थायिपर्णकुटीरस्य निर्माणं क्रियते, सः भेलागृहम् इति कथ्यते । अत्र सामूहिकभोजस्य आयोजनं भवति । बोरा इति असमराज्यस्य तण्डुलानां कश्चित् प्रकारः अस्ति, एते तण्डुलाः पाकानन्तरं संश्लिष्टाः भवन्ति । बालकान् मानचित्रे असमराज्यस्य अन्वेषणाय प्रेरयेत् ।

तनवीरा - रात्रौ भोजने चेवातण्डुलाः अपि प्राप्यन्ते वा? ते मह्यं बहु रोचन्ते ।

फ़ातिमा - चेवातण्डुलान् कथं पक्ष्यामः?

सोनमोनी - ताओ (कटाहं) अग्नौ संस्थाप्य, तस्मिन् जलस्य उत्क्वाथनं करिष्यामः । तस्य उपरि तण्डुलैः भृतं कटाहं स्थापयिष्यामः । तत्पश्चात् तं कदलीपत्रैः आच्छादयिष्यामः । ततः चेवातण्डुलः सज्जितः भविष्यति ।

वदतु

- बीहू-उत्सवः कुत्र मन्यते ?
- भवतः प्रदेशे के के उत्सवाः मिलित्वा मन्यन्ते ?
- किम् एतेषु उत्सवेषु अपि सर्वे जनाः मिलित्वा भोजनं कुर्वन्ति ?
- किं किं विशिष्टं भोज्यनिर्माणं क्रियते? कथम् ?
- किं भोजननिर्माणे विशेषप्रकारस्य पात्राणां प्रयोगः भवति ? केषां पात्राणां प्रयोगः भवति ?
- सर्वाधिकं दीर्घं पात्रं किं भवति ?

उत्तरपुस्तिकायां तस्य चित्रनिर्माणं करोतु । ऊहां कृत्वा वदतु यत् तस्मिन् एकवारं निर्मितं भोजनं कति जनाः भोक्तुं शक्नुवन्ति ?

भेलागृहं निर्मितं जातम् । अधुना एताः सख्यः सज्जायै धावितवत्यः । किञ्चित्क्षणानन्तरम् एव ग्रामस्य सर्वे जनाः अपि आगतवन्तः । प्रायः महिलाः पाटस्य मूगायाः च मेखलावस्त्रं धृतवत्यः आसन् । चित्रमेखलां धृत्वा चतस्रः अपि सख्यः भेलागृहम् आगतवत्यः । सर्वे जनाः पटहवादनेन सह सानन्दं गीतगानम् आरब्धवन्तः । ततः सर्वे भूमौ उपविष्टवन्तः । तेभ्यः कदलीपत्रेषु भोजनं परिवेषितम् । सर्वे जनाः हास्येन आनन्देन सह प्रेमपूर्वकं मिलित्वा भोजनं कृतवन्तः । सर्वे जनाः रात्रिपर्यन्तं भेलागृहम् एव उषितवन्तः ।

मज़ानी - सोनमोनी! अधुना वयं शयनं कुर्मः । प्रातःकाले उत्थाय मेज़ी (काष्ठं) भेलागृहं च ज्वालयिष्यामः ।

ज्ञात्वा करोतु

- ऊहां कृत्वा वदतु यत् अस्मिन् भोजे प्रायः कति जनाः सहैव भोजनं कृतवन्तः ।
- किं भवान् कदापि बीहूनृत्यं दृष्टवान् अस्ति ? कथम् आसीत् ?
- ज्ञानं करोतु यत् भवतः कक्षायाः बालकाः कं कम् उत्सवं मन्यन्ते ? तेषु उत्सवेषु च किं विशिष्टभोजनं खादन्ति ? उत्सवेषु भोजनस्य पदार्थान् कः निर्माति ?
- किं भवान् कस्मिंश्चित् उत्सवे अवसरे वा कस्यचित् विशिष्टप्रकारस्य विशिष्टवर्णस्य वा वस्त्राणि धरति ? तेषां वस्त्राणां चित्राणि उत्तरपुस्तिकायां निर्मातु ।
- किं भवान् उत्सवेषु कानिचित् विशिष्टप्रकारस्य गीतानि गायति ? कानिचित् गीतानि अवगत्य स्वकक्षायां श्रावयतु ।

- उत्सवेषु क्रियमाणानि कानिचित् विशिष्टनृत्यानि जानातु । ततः विद्यालयस्य प्रातःकालस्य सभायां स्वमित्रैः सह एतानि नृत्यानि कृत्वा दर्शयतु ।

- किं भवान् स्वसमवयस्कैः बालकैः सह मिलित्वा किञ्चित् विशिष्टं कार्यं करोति, यथा काचित् क्रीडा, वार्तालापम्, चलचित्रदर्शनम्, अन्यत् किमपि वा?

मध्याह्नकालस्य भोजनम्

मध्याह्नस्य एकवादने केचित् एव निमेषाः अवशिष्टाः सन्ति । बालकाः क्षुधातुराः सन्ति । अस्माकं बालकानां अवधानं पठने अल्पम् अस्ति, बहिः अङ्गणात् अन्तः प्रविशति भोजनस्य सुगन्धे च अधिकम् अस्ति ।

टन्...टन्....टन्.... ! मध्याह्ने अवकाशस्य घण्टिकायाः नादः जातः । सर्वे बालकाः बहिः धावितवन्तः । केचित् भोजनस्य पात्राणि ग्रहीतुं, केचित् हस्तमार्जनाय च । शिक्षकः मोशायः सर्वान् बालकान् अङ्गणस्य एकस्मिन् कोणे स्थितं नलयन्त्रस्य समक्षं प्रेषितवान् ।

सः उक्तवान् - आनन्दः! पश्यतु, सर्वे सम्यक्तया हस्तौ प्रक्षालयन्ति न वा ?

हस्तौ प्रक्षाल्य वयं सर्वे पङ्क्तौ स्थित्वा भोजनं गृहीतवन्तः । केचित् स्वपात्रेषु, केचित् स्थालीषु च भोजनं गृहीतवन्तः । तत्पश्चात् वयं वृत्ताकारेण उपविष्टवन्तः । भोजनात् पूर्वं सर्वे मिलित्वा गीतवन्तः -

सह वयं क्रीडेम,
सह वयं खादेम,
सह करिष्यामः, सुकार्याणि,
एवं वसेम वयं, सदा सह ।

सप्ताहस्य प्रत्येकं दिने मध्याह्नस्य भोजने किं प्राप्स्यते, एतत् मोनीभगिन्याः कार्यालयस्य बहिः लिखितं भवति । कदाचित् तण्डुलं रसभृतं शाकं च, कदाचित् लूची, कदाचित् चणकाः सूपः च । कदाचित् यदि मिष्टी प्राप्यते तर्हि आनन्दः भवति।

मध्याह्नभोजनस्य समये अस्माकं विद्यालये एका अपरा अपि आनन्दप्रदा वार्ता भवति । वृत्ते प्रतिदिनं स्थानस्य परिवर्तनं कृत्वा उपवेशनं भवति । एतत् मह्यं बहु रोचते । बहुभिः बालकैः सह मित्रता भवति, बहूनि नव्यानि मित्राणि च भवन्ति।

पूर्वं कदाचित् तण्डुलेषु कर्कराणि भवन्ति स्म, कदाचित् च द्विदलम् अपक्वं भवति स्म ।

तदा अनेके जनाः उक्तवन्तः - अस्माकं बालकाः एतत् भोजनं न करिष्यन्ति । मोनी भगिनी उक्तवती- वयं सर्वे मिलित्वा पश्येम यत्, भोजनं शुद्धं, पक्वम्, उष्णम्, नव्यं च भवेत् । मध्याह्नस्य भोजनं बालकाः अवश्यं प्राप्नुयुः । बालकानाम् अभिभावकाः अपि सहायतां कर्तुं निश्चयं कृतवन्तः ।

अधुना सर्वं सम्यक् अस्ति । उष्णम् उष्णं, पक्वं च भोजनं तद् अपि सर्वेभ्यः सार्धम् एव । कदाचित् तु यावत् भोजनं दीयते, तत् लघुबालकेभ्यः पर्याप्तं भवति, किन्तु मह्यं, मम मित्रेभ्यः च पर्याप्तं न भवति ।

अधुना तु विद्यालयेषु मध्याह्नभोजनं प्राप्यते, किन्तु पूर्वम् एतत् न आसीत् । यदा मम ज्येष्ठा भगिनी प्राथमिकविद्यालये पठति स्म, तदा भोजनं न दीयते स्म। केचित् बालकाः तु प्रातःकाले भोजनम् अकृत्वा एव विद्यालयं गच्छन्ति स्म । अहो । ते बालकाः रिक्ते उदरे सति, पूर्णे दिने कथं पठन्ति स्म ।

ज्ञात्वा उत्तरपुस्तिकायां लिखतु ।

- भवान् अपि स्वविद्यालयस्य भोजनस्य विषये वदतु । यदि भवतः विद्यालये भोजनं न प्राप्यते, तदा कश्चित् तं मित्रं पृच्छतु यस्य विद्यालये भोजनं प्राप्यते । लिखतु -
  - ❑ भोजनं कस्मिन् समये प्राप्यते ?
  - ❑ किम् एतत् भोजनं भवते रोचते ?
  - ❑ यावत् भोजनं तत्र प्राप्यते, किं तेन भवतः तृप्तिः भवति ?
  - ❑ किं भवान् स्वकीयं पात्रं सह एव आनयति, विद्यालये वा पात्रं प्राप्यते ?
  - ❑ विद्यालये मध्याह्नभोजने किं किं प्राप्यते ?
  - ❑ भोजनस्य परिवेषणं कः करोति ?
  - ❑ किं भवतः शिक्षकः भवता सह एव भोजनं करोति ?
  - ❑ किं विद्यालयस्य सूचनापट्टे सप्ताहस्य भोजनस्य विषये लिखितं भवति ?

- बुधवासरे शुक्रवासरे च मध्याह्नभोजने किं भोजनं प्राप्यते ?
- यदि भवते विद्यालयस्य भोजनसूच्यां परिवर्तनस्य अवसरः मिलेत् तदा भवान् कानि कानि परिवर्तनानि करिष्यति ? भवते किं किं भोजनं रोचते ? स्वभोजनस्य सूचीं निर्मातु ।

दिनम्	भोजनम्
सोमवारः	
बुधवारः	
शुक्रवारः	

यदि भवतः विद्यालये भोजनं न प्राप्यते, तर्हि ज्ञानं करोतु यत् एवं किमर्थम् अस्ति?

बालकानाम् अधिकारः
मध्याह्नस्य भोजनम्

अस्माकं देशस्य बहवः बालकाः पर्याप्तं भोजनं न प्राप्नुवन्ति । एतेषु बहवः बालकाः तु अभुक्त्वा एव विद्यालयं गच्छन्ति । ते बुभुक्षितत्वात् पठने सम्यक्तया अवधानं दातुं न शक्नुवन्ति ।

केभ्यश्चित् वर्षेभ्यः पूर्वम् अस्माकं देशस्य सर्वोच्चन्यायालयः महान्तं निर्णयं कृतवान् - प्रारम्भिकशिक्षायाः (कक्षा 1-8) विद्यालयेषु सर्वेभ्यः बालकेभ्यः पक्वम्, उष्णं च भोजनं प्रदेयम् एव । अयं सर्वेषां बालकानाम् अधिकारः अस्ति ।

विंशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्		हिन्दी
अवकाशः	-	छुट्टी
अद्य	-	आज
करतलः	-	हथेली
मेन्धिका	-	मेंहदी
मातुलः	-	मामा
विवाहः	-	शादी
उपनगरम्	-	कॉलोनी
उत्सवः	-	त्यौहार
एकत्रितम्	-	इकट्ठा
आपणम्	-	बाजार
प्रतीक्षा	-	इन्तजार
शीघ्रम्	-	जल्दी
धान्यम्	-	फसल
सख्यः	-	सहेलियाँ
भेलागृहम्	-	भेलाघर
व्यवस्था	-	इन्तज़ाम
काष्ठम्	-	लकड़ी
शक्रकन्दः	-	शकरकन्दी
परिवेषणम्	-	परोसना
कटाहः	-	कडाही
अग्निः	-	आग
आर्द्रम्	-	गीला
कदलीपत्रम्	-	केला
मेखलावस्त्रम्	-	मेखला चादर
पटहः	-	ढोल
सुगन्धः	-	खुशबू
कोणः	-	कोना

एकविंशः पाठः
भोजनम्, भोजयनं च

ट्रिनऽऽऽऽऽ.....! घण्टिकायाः ध्वनिं श्रुत्वा मनप्रीता द्वारम् उद्घाटितवती। बहिः दिव्यां स्वस्तिकं च दृष्ट्वा सा प्रसन्ना भूत्वा उच्चैः उक्तवती - "गुरनूरे! पश्यतु अयं कः आगतः अस्ति"। गुरनूरा धावन्ती आगतवती । मित्राणि दृष्ट्वा सा प्रसन्नतया तयोः आलिङ्गनं कृतवती, उक्तवती च - "भवन्तौ स्वकीयात् छात्रावासीयात् विद्यालयात् कदा आगतवन्तौ" । स्वस्तिकः उक्तवान् - "आवां ह्यः एव आगतवन्तौ । भवत्याः मातापितरौ कुत्र स्तः? ताभ्यां सह तु मिलेम ।

गुरनूरा उत्तरं दत्तवती - तौ तु गुरुद्वारं गतवन्तौ । आवाम् अपि तत्र एव गच्छावः । दिव्या प्रसन्नतया उक्तवती - शोभनम् । चलेम । आवाम् अपि भवद्भ्यां सह एव चलावः ।

गुरनूरा पृष्टवती - भवती तु केवलम् अवकाशेषु एव गृहम् आगच्छति । किं भवत्यै छात्रावासे निवासः न रोचते ? भवती मातरं पितरं विना कथं तत्र निवसति?

दिव्या उक्तवती – मातापित्रोः स्मरणं तु बहु भवति, किन्तु छात्रावासे अपि बहु आनन्दः भवति । यद्यपि कदाचित् तत्र भोजनम् अस्माकं कृते न रोचते, किन्तु सर्वैः बालकैः सह उपविश्य युगपत् भोजनकरणे वयम् आनन्दम् अनुभवामः ।

स्वस्तिकः हसन् उक्तवान् - छात्रावासे यदा कस्यचित् छात्रस्य गृहात् कश्चित् खाद्यपदार्थः आगच्छति, तदा सर्वे बालकाः तस्य कक्षे प्रविश्य तं खाद्यपदार्थं केषुचित् एव क्षणेषु समाप्तं कुर्वन्ति ।

- किं भवान् छात्रावासीये विद्यालये पठति? यदि न पठति, तदा छात्रावासे निवासिना छात्रं पृच्छतु -
  - ❑ छात्रावासीयाः विद्यालयाः अन्ये विद्यालयाः च केन रूपेण भिन्नाः भवन्ति ?
  - ❑ तत्र कीदृशं भोजनं प्राप्यते ?
  - ❑ बालकाः कुत्र उपविश्य भोजनं कुर्वन्ति ?
  - ❑ छात्रावासीये विद्यालये बालकेभ्यः भोजनस्य निर्माणं कः करोति ? कः भोजनं परिवेषयति ?
  - ❑ पात्राणां मार्जनं कः करोति ?
  - ❑ किं तत्र सर्वे बालकाः गृहस्य भोजनं स्मरन्ति ?
  - ❑ किं भवान् छात्रावासीये विद्यालये पठनम् इच्छति ? किमर्थम् ?

गुरुद्वारे

बालकाः वार्तां कुर्वन्तः गुरुद्वारं प्राप्तवन्तः । तत्र सर्वे शिरांसि वेष्टितवन्तः ।

ते गुरुद्वारस्य पाकशालायां गतवन्तः । सा पाकशाला महती आसीत् । तत्र अनेकानि कार्याणि भवन्ति स्म। तत्र भोजनं महत्सु पात्रेषु निर्मितं भवति स्म। तत्र एकस्मिन् महति पात्रे माषस्य चणकस्य च सूपः निर्मितः भवति स्म । अपरे पात्रे आलुकस्य गोजिह्वायाः च शाकं निर्मितं भवति स्म । स्वस्तिकः उक्तवान् - भोः गुरनूरे! भवत्याः पिता तत्र अस्ति! चलतु तेन सह मिलामः ।

मनजीतसिंहः बालकैः सह प्रेम्णा मिलितवान्, पृष्टवान् च - भवन्तः सर्वे अत्र किं कुर्वन्ति ? स्वस्तिकः पृष्टवान् - महोदय! किं वयम् अपि भोजनस्य निर्माणे सहायतां कुर्याम ? भवान् किं पचति ?

मनजीतसिंहः उक्तवान् - अहं कटाहप्रसादस्य निर्माणं करोमि । अस्मिन् महति कटाहे घृते गोधूमचूर्णस्य भृज्जनं करोमि । एतत् बहु श्रमस्य कार्यम् अस्ति ।

दिव्या उक्तवती - अहं जानामि। अयं संयावः अस्ति । भवान् अस्मिन् शर्करायाः मिश्रणं कदा करिष्यति ?

तदा एव ते मनप्रीतायाः मातरं दृष्टवन्तः । ते स्मित्वा मातुः पार्श्वं गतवन्तः। दिव्या पृष्टवती - मातः! भवती किं करोति ? माता उक्तवती - पुत्रि! अहम् अग्नीष्टिकायां रोटिकाः पचामि । दिव्या आश्चर्येण उक्तवती - मातः । एतावत्यः रोटिकाः युगपत् पचति। अहम् अपि पचानि किम् । माता उक्तवती - आम् । भवती अपि कृत्वा अनुभवतु । अत्र तु प्रत्येकं जनः सेवां कर्तुं शक्नोति । किन्तु पूर्वं स्वहस्तौ प्रक्षालयतु ।

दिव्या शीघ्रतया हस्तौ प्रक्षाल्य आगतवती । अग्नीष्टिकायां हस्ते गते सति सा उष्णताम् अनुभूतवती । पाचनं त्यक्त्वा सा रोटिकासु घृतलेपनम् आरब्धवती ।

स्वस्तिकः आश्चर्येण पृष्टवान् - एतावद्भ्यः सर्वेभ्यः जनेभ्यः भोजनस्य सामग्रीं कः आनयति ?

एका महिला अवदत् - सर्वे परस्परं सहयोगेन एव एतत् कुर्मः । कश्चित् खाद्यवस्तूनि ददाति, कश्चित् धनं ददाति । यथा यस्मै रोचते सः तथा साहाय्यं करोति ।

मनप्रीता उक्तवती - भो स्वस्तिक! कथम् अनुभवति ? इतः पूर्वम् अपि पाकशालायाः कार्यं कृतं किम् ?

स्वस्तिकः उक्तवान् - नैव । किन्तु सर्वैः सह कार्यकरणे बहु आनन्दः प्राप्यते । शीघ्रम् एव रोटिकाः, तण्डुलाः, सूपः, शाकं च एते सर्वे पदार्थाः निर्मिताः ।

प्रार्थनायाः अनन्तरं सर्वेभ्यः कटाहप्रसादस्य वितरणं कृतम् । केचित् बालकाः शीघ्रतया अङ्गणे आस्तरणं प्रसारितवन्तः । सर्वे जनाः पङ्क्तिषु उपविष्टवन्तः । केचित् जनाः पत्रस्थालिकासु भोजनं परिवेषितवन्तः । केचित् जनाः जलं परिवेषितवन्तः । सर्वे मिलित्वा प्रेम्णा भोजनं कृतवन्तः ।

भोजनानन्तरं सर्वे स्वकीयाः पत्रस्थालिकाः गृहीत्वा एकस्मिन् दीर्घे पात्रे क्षिप्तवन्तः । अन्ते, ये भोजनं कृतवन्तः, ते अपि अन्येभ्यः भोजनं कारितवन्तः । ते सर्वे जनाः एव तत्र मार्जनं कृत्वा पात्राणाम् अपि मार्जनं कृतवन्तः ।

वदतु

- गुरुद्वारे सहैव मिलित्वा भोजननिर्माणं खादनं च, लंगर इति उच्यते । किं भवान् कदाचित् लंगरे भोजनं कृतवान् ? कुत्र कदा च ?
- कति जनाः भोजननिर्माणं कुर्वन्ति स्म, कति जनाः च भोजनं परिवेषयन्ति ?
- किं कस्मिंश्चित् अन्यस्मिन् अवसरे भवान् बहुभिः जनैः सह मिलित्वा भोजनं कृतवान् ? कुत्र कदा च ? तत्र के के भोजनं निर्मितवन्तः, के के च परिवेषितवन्तः?

गुरूद्वारे कानिचित् चित्राणि

एकविंशे पाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	हिन्दी
माषः	-	उडद
सूपः	-	दाल
गोजिह्वा	-	गोभी
संयावः	-	हलवा
आस्तरणम्	-	दरी
पत्रस्थालिका	-	पत्तल

द्वाविंशः पाठः

संसारः मम गृहे

विवादः

प्रतिदिनम् इव अद्य अपि मैरीटायाः गृहे अयं विवादः भवति यत् दूरदर्शने कतमः कार्यक्रमः द्रष्टव्यः ? मैरिटायाः भ्राता क्रिकेटं द्रष्टुम् इच्छति, किन्तु लघ्वी सूसना स्वरुचिकरं कार्यक्रमं द्रष्टुम् इच्छति । मातुः पितृव्यायाः च परस्परं मित्रता अस्ति, किन्तु उभयोः रुचिः भिन्ना अस्ति । माता समाचारं द्रष्टुम् इच्छति, किन्तु पितृव्या कञ्चित् अन्यं कार्यक्रमम् । मैरिटा कार्टून द्रष्टुम् इच्छति, पिता च पादकन्दुक-क्रीडां द्रष्टुम् इच्छति । पिता वदति यत् सः केवलं सायङ्काले एव दूरदर्शनं द्रष्टुं शक्नोति । अन्ते सर्वे पादकन्दुक-क्रीडाम् एव दृष्टवन्तः ।

वदतु

- किं भवतः गृहे अपि व्यजनस्य, दूरदर्शनस्य, आसन्दिकायाः,

कस्यचित् अन्यस्य वस्तुनः विषये वा विवादः भवति ?

- भवतः गृहे तेषां विवादानां समाधानं कः करोति ?
- भवतः गृहस्य तादृशानां विवादानां विषये काञ्चित् रोचकां कथां श्रावयतु ।
- किं भवान् कुत्रचित् अन्यत्र अपि एकस्मै वस्तुने अनेके जनाः विवादं कुर्वन्तः दृष्टाः? कस्मिन् विषये ?

पृथक् किमर्थम् ?

अयं सायङ्कालस्य सप्तवादनस्य समयः अस्ति । प्रतिभा स्वसख्युः गृहात् धावन्ती सती स्वगृहं गच्छति । एकस्मिन् कोणे तस्याः भ्रातरौ सन्दीपः सञ्जयः च मित्रैः सह क्रीडन्ति । तेभ्यः गृहगमनस्य शीघ्रता न अस्ति । ते यदि विलम्बेन गृहं गच्छन्ति, तर्हि काचित् बाधा न अस्ति ।

प्रतिभायै एतत् न रोचते । तस्यै पृथक् नियमः, तस्याः भ्रातृभ्यां च पृथक् नियमः । किन्तु सा तु किञ्चित् अपि करणे असमर्था अस्ति ।

वदतु

- किं भवतः गृहे भवतः मित्रस्य कुटुम्बे वा एवं भवति ? भवान् अस्मिन् विषये किं विचारयति ?
- किं बालकेभ्यः बालिकाभ्यः च, पुरुषेभ्यः महिलाभ्यः च पृथक् पृथक् नियमाः भवेयुः ।

विचारयतु, यदि बालिकाभ्यः निर्मिताः नियमाः बालकेषु आरोपिताःभवेयुः, तथा बालकेभ्यः निर्मिताः नियमाः बालिकासु आरोपिताः भवेयुः, तर्हि किं भविष्यति ?

पिलू मातुलानि

एकदा फली, नाजूः तयोः मित्राणि च पिलूमातुलान्या सह समुद्रस्य तटे भ्रमणार्थं गतवन्तः। जले सिकतायां च क्रीडनानन्तरं बालकाः हिन्दोले आनन्दं प्राप्तवन्तः । भेलपूरीं खादितवन्तः, वातुलम् अपि क्रीतवन्तः । तत्पश्चात् आनन्देन कुल्फ़ी अपि खादितवन्तः । कुल्फ़ीविक्रेता दोषवशात् सप्तानां स्थाने पञ्चानाम् एव धनं याचितवान् । बालकाः विचारितवन्तः यत् अहो अस्माकं द्वयोः धनं सुरक्षितम् । किन्तु पिलू मातुलानी कुल्फ़ीविक्रेतारं सम्यक् गणनाम् बोधितवती। सप्तानाम् एव धनं च दत्तवती ।

तस्मिन् दिने बालकाः पिलू मातुलान्याः यं विषयं शिक्षितवन्तः, तं विषयं प्रायः ते कदा अपि न विस्मरिष्यन्ति ।

- स्वकल्पनया अस्याः कथायाः अन्तस्य परिवर्तनं कृत्वा उत्तरपुस्तिकायां लिखतु ।

- किं भवतः कुटुम्बे अपि कश्चित् पिलूमातुलानीवत् अस्ति ? कः?
- यदि पिलूमातुलानी अल्पं धनं दत्त्वा एव गच्छेत् तदा बालकाः अस्मिन् विषये किं विचारं कुर्युः ? भवान् अस्मिन् विषये किं विचारयति ?

अहं किं करवाणि

अक्षयः स्वपितामहीं बहु प्रेम करोति । पितामही अपि अक्षयाय स्नेहं करोति । सा अक्षयेण सह रोचकाः वार्ताः करोति । सा अक्षयस्य मित्राय अनिलाय अपि स्नेहं करोति, किन्तु सा अक्षयं पुनः पुनः वदति - सः कदापि अनिलस्य गृहस्य भोजनं न कुर्यात्, जलम् अपि न पिबेत् । पितामही वदति यत् अनिलस्य कुटुम्बस्य जनाः अस्माकं कुटुम्बात् बहु भिन्नाः सन्ति ।

कस्मिंश्चित् दिने अनिलस्य गृहस्य पार्श्वे दीर्घे क्षेत्रे करकन्दुकक्रीडा आयोजिता अभवत् । तत्र उष्णता आसीत् । क्रीडायाः अनन्तरं सर्वे पिपासिताः श्रान्ताः च आसन् । अनिलः सर्वान् स्वगृहं प्रति नीतवान् । अनिलस्य माता सर्वेभ्यः मित्रेभ्यः जलं दत्तवती । यदा अनिलः अक्षयस्य हस्ते जलस्य चषकं दत्तवान्, तदा अकस्मात् अक्षयः पितामह्याः वार्तां स्मृतवान् । अस्यां स्थितौ सः किं कुर्यात् इति न अवगतवान् ।

वदतु

- भवान् किम् अनुभवति, अक्षयः किं करिष्यति ?
- अक्षयः किमर्थं किङ्कर्तव्यविमूढः अभवत् ?
- अक्षयस्य पितामही किमर्थम् अनिलस्य गृहस्य जलग्रहणाय अपि निषेधं कृतवती ?
- किं भवान् कञ्चित् तं जनं जानाति यः अक्षयस्य पितामहीवत् विचारयति ?
- किं भवान् अक्षयस्य पितामह्याः मतस्य समर्थनं करोति ?
- भवतः मते अक्षयः किं कुर्यात् ?

कस्य निर्णयः ?

महेशस्य कुटुम्बः विस्तृतः अस्ति । कुटुम्बस्य धनस्य कृषेः च सर्वाणि कार्याणि ज्येष्ठपिता एव करोति । ज्येष्ठपिता एव कुटुम्बस्य सर्वान् निर्णयान् करोति ।

अधुना यावत् सः क्षेत्रे एव कार्यं करोति स्म । किन्तु अधुना सः किमपि नव्यं कार्यं कर्तुम् इच्छति । सः कोषागारात् किञ्चित् ऋणं स्वीकृत्य पेषणस्य चक्रिकां क्रेतुम् इच्छति । ग्रामे एका अपि पेषणस्य चक्रिका नास्ति । महेशस्य विश्वासः अस्ति यत् तस्य एतेन नव्यकार्येण कुटुम्बस्य लाभः भविष्यति । पिता तु आज्ञां दत्तवान्, किन्तु ज्येष्ठपिता तस्य काम् अपि वार्तां न शृणोति ।

अध्यापकाय - एतैः उदाहरणैः बालकानां अवधानं तस्मिन् पक्षे आकर्षयितुं शक्यते, यत् अस्माकं कुटुम्बे समाजे च व्याप्तः अस्ति । एतासां सर्वासां वार्तानाम् अस्माकं जीवने बहु प्रभावः भवति । बालकान् एतेषु विषयेषु विचाराय प्रेरयेयुः । तेषां विचारेषु कक्षायां चर्चा कारयितुं शक्यते ।

वदतु

- यदि भवान् महेशस्य स्थाने भवेत्, तदा भवान् किं कुर्यात् ?
- किं भवता सह कदापि एवं भवति यत् भवान् किमपि कार्यं कर्तुम् इच्छति, किन्तु ज्येष्ठाः तस्य निषेधं कृतवन्तः ।
- भवतः गृहस्य विशेषान् निर्णयान् कः करोति ? भवान् अस्मिन् विषये किम् अनुभवति ?
- यदि भवतः कुटुम्बे सम्बन्धिषु वा कस्यचित् एकस्याः एव व्यक्तेः निर्णयः सर्वदा स्वीकर्तव्यः स्यात् तदा भवान् किम् अनुभविष्यति ।

एतत् मह्यं न रोचते

मीना रितुः च स्टॉपू इति क्रीडां क्रीडित्वा गृहम् आगच्छति स्म । मीना रितुम् आकर्षयन्ती उक्तवती – "चलतु मम गृहम् । चलतु"।

रितुः उक्तवती- "भवत्याः मातुलः गृहे एव अस्ति किम् ? यदि सः गृहे एव अस्ति, तदा अहं न गमिष्यामि" ।

मीनू उक्तवती – "किन्तु किमर्थम् ? मातुलः तु भवत्यै स्नेहं करोति" । मातुलः उक्तवान् यत् – "स्वसखीं रितुं गृहम् आनयेत् । अहम् उभाभ्यां बहून् चाकलेहान् दास्यामि" ।

रितुः मीनायाः हस्तात् स्वहस्तं मोचयित्वा उक्तवती – "अहं भवत्याः मातुलात् बिभेमि । यदा सः मम हस्तं गृह्णाति, तत् मह्यं न रोचते। एतत् उक्त्वा रितुः स्वगृहं गतवती ।

अध्यापकाय - केषाञ्चित् बालकानाम् अनुभवाः रितोः इव अपि भवितुं शक्यन्ते । यदि कक्षायाम् अस्मिन् विषये चर्चाकरणेन बालकाः स्वानुभवानां विषये अपि चिन्तनं करिष्यन्ति । अनेन तेषां धैर्यं शिक्षकं प्रति विश्वासः च अपि वर्धिष्यते । आवश्यकतायाः अनुसारेण, बालकेभ्यः व्यक्तिगतरूपेण अपि वार्तां कर्तुं शक्यते । यदि विद्यालये बालकानां परामर्शदाता अस्ति, तर्हि तस्य साहाय्यम् अपि स्वीकर्तुं शक्यते ।

वदतु

- किं भवत्यै अपि कस्यचित् स्पर्शः न रोचते? कस्य स्पर्शः न रोचते ?
- यदि भवती रितोः स्थाने भवेत्, तदा किं कुर्यात् ?
- एवं जाते सति अन्यत् किं कर्तुं शक्यते ?
- सर्वेषां स्पर्शः समानः न भवति । यदा मीनायाः मातुलः रितोः हस्तं गृह्णाति स्म, तदा रित्वै तत् न रोचते स्म, किन्तु मीनायाः हस्तग्रहणं तस्यै रोचते स्म । विचार्य वदतु यत्, अयं भेदः किमर्थम् आसीत् ।

अध्यापकाय - केचन बालाः स्वस्य कुटुम्बस्य सदस्यानां स्वभावानां विषये यथा - शरीरहानिप्रद-औषधानां विषये यदा चर्चां कर्तुम् इच्छन्ति तदा एतादृशसन्दर्भेषु बहु सावधानतया चर्चा करणीया । यतोहि एषः संवेदनशीलः विषयः अस्ति । एतेभ्यः जायमानाः आरोग्यविषये अपि चर्चा आवश्यकी । एतेषु विषयेषु भवद्भिः सेवाकालीन-प्रशिक्षण-कार्यक्रमेषु अपि अवश्यं चर्चा करणीया ।

कदाचित् एतादृशानां कुटुम्बानां बालकेषु अपि असभ्यः स्वभावः उत्पद्यते । यदि तेषु बालकेषु अथवा अन्यबालकेषु एतादृशः व्यवहारः दृश्यते, तर्हि तैः सह एकान्ते चर्चा करणीया, येन समयेन एव तेषां दुर्व्यवहारः गच्छेत् । अस्मिन् विषये बालैः स्फोरकपत्रं तथा च चित्रपटं निर्माय चर्चा करणीया ।

द्वाविंशे पाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	हिन्दी
कोणः	-	नुक्कड
सिकता	-	रेत
बागोलः	-	गुब्बारा
करकन्दुकक्रीडा	-	बॉलीबॉल
चषकः	-	गिलास
पेषणस्य चक्रिका	-	पीसने की चक्की
चाकलेहः	-	चॉकलेट
मोचनम्	-	छुड़ाना
कुवृत्तिः	-	बुरी लत
रेखाचित्रम्	-	चार्ट

वाणी प्रसादः च मुख्तापुरग्रामस्य निवासिनौ स्तः । तौ भगिनीभ्रातरौ स्तः । तौ वयनस्य कार्यं कुरुतः । अतः तयोः गृहम् अनेकेषां रङ्गानां तन्तूनां समूहः अस्ति । तयोः मातापितरौ कुटुम्बस्य अन्ये सर्वे सदस्याः च वयनस्य कार्यं कुर्वन्ति । एतत् वयनम् बहु सुन्दरं, विचित्रं च भवति ।

तेषां ग्रामः आन्ध्रप्रदेशस्य राज्यस्य पोचमपल्ली इति उपनगरस्य पार्श्वे अस्ति । अत्र प्रायः जनाः तन्तुवायाः सन्ति । अतः एतत् वयनम्, पोचमपल्ली इति नाम्ना ज्ञायते ।

एतेषां ग्रामाणां जनाः प्राचीनकालात् एव एतत् कार्यं कुर्वन्ति । वाण्याः प्रसादस्य च मातापितरौ स्वपूर्वजेभ्यः एतस्य वयनस्य शिक्षां प्राप्तवन्तौ । अधुना वाणी प्रसादः च विद्यालयात् आगत्य स्वमातापित्रोः सहायतां कुरुतः ।

अध्यापकाय - बालकान् वदेत् यत् पारम्पारिकाणां व्यवसायानां प्रायः गृहे एव शिक्षा प्राप्यते । एवम् एव आस्तरणस्य निर्माणम्, क्रीडनकानां निर्माणम्, निर्यासस्य निर्माणम्, इत्यादिषु अन्येषु पारम्पारिकव्यवसायानां विषयेषु अपि चर्चा कारयितुं शक्यते । बालकान् भारतस्य मानचित्रे आन्ध्रप्रदेशस्य अन्वेषणाय प्रेरयेत् ।

पोचमपल्ली इति शाटिकायाः निर्माणस्य विधिः

तन्तोः वस्त्रं यावत्

पिता पोचमपल्लीतः तन्तूनां गुच्छान् आनयति । माता तन्तुगुच्छान् उत्क्वथिते जले निपात्य तान् स्वच्छीकरोति । ततः सर्वे मिलित्वा तन्तून् सुन्दरेषु रङ्गेषु रङ्गयन्ति । ततः तान् शुष्कं कृत्वा तेषां पोटलिकां कुर्वन्ति । ततः ताः पोटलिकाः वापदण्डे वेष्टयन्ति । तत्पश्चात् एताभिः पोटलिकाभिः वस्त्राणां वयनं भवति । यदि कौशेयस्य तन्तुः अस्ति, तर्हि कौशेयस्य वस्त्राणां कृते शाटिकानां कृते कञ्चुकानां कृते च, वस्त्राणि निर्मीयन्ते । सूतीतन्तुना अपि शाटिकाः वस्त्राणां व्यावर्तः, आस्तरणानि च निर्मीयन्ते ।

वापदण्डे सूचिकाः भवन्ति । कलाकृतेः अनुसारेण सूचिकानाम् अङ्कः क्षीयते वर्धते च । तन्तुवायाः नानावर्णानां सुन्दरीं पोचमपल्लीं शाटिकां वयन्ति । एतैः कलाकारैः स्वीयया अनया कलया क्षेत्रस्य प्रसिद्धिः सम्पूर्णे संसारे कृता ।

नाशं गच्छन्ती कला

सुन्दरशाटिकायाः वयनार्थं बहुदक्षता आवश्यकी भवति । एतदर्थं बहुषु दिनेषु श्रमः कर्त्तव्यः भवति । ततः अपि शाटिकानाम् उचितमूल्ये विक्रयणं दुष्करं कार्यं भवति । कौशेयस्य मूल्यं निरन्तरं वर्धते । महान्तः विक्रेतारः तन्तुवायेभ्यः शाटिकानाम् अल्पम् एव मूल्यं ददति । किन्तु ते स्वयं तासां शाटिकानाम् अधिकं मूल्यं स्वीकुर्वन्ति । अतः अनेके तन्तुवायाः एतत् कर्म त्यजन्ति । ते स्वग्रामं त्यक्त्वा महानगरेषु श्रमिककर्म कर्तुं गच्छन्ति । अस्याः समस्यायाः समाधानम् अन्वेषणीयम् । तन्तुवायानाम् इयं प्राचीनकला लुप्ता अपि भवितुम् अर्हति ।

अध्यापकाय - एतेषु परम्परागतेषु व्यवसायेषु अपि बहूनाम् उपकरणानां कलानां च प्रयोगः भवति । अयम् अपि विषयः प्रकाशनीयः यत् एकस्य एव वस्तुनः निर्माणार्थं कुटुम्बस्य सर्वे जनाः परस्परं मिलित्वा कार्यं कुर्वन्ति । सर्वेषां कार्याणि च विभक्तानि भवन्ति ।

चर्चां करोतु

अधुना वाणी प्रसादः च इव अन्ये बालकाः स्वकुटुम्बस्य जनेभ्यः एतां सुन्दरकलां शिक्षितवन्तः । यदा एते बालकाः ज्येष्ठाः भविष्यन्ति तदा किम् एते अपि स्वबालकान् एतां कलां शिक्षिष्यन्ति ?

एतेषाम् उत्तराणि उत्तरपुस्तिकायां लिखतु

- किं भवान् कदाचित् कञ्चित् तान्तवचक्रेण वयन्तं दृष्टवान् ? किं कुत्र च ?
- शाटिकानां तन्तुषु रङ्गः क्रियते । किं भवान् किञ्चित् अन्यत् वस्तु जानाति, यस्मिन् रङ्गः क्रियते ?
- वाण्याः प्रसादस्य च ग्रामे यदि गच्छेत्, तदा दृश्यते यत् सर्वः ग्रामः एव शाटिकानिर्माणं करोति । किं भवान् तस्य कार्यस्य विषये जानाति यत् एकस्य एव स्थानस्य बहवः जनाः कुर्वन्ति ?
- किं ते किमपि वस्तुनिर्माणं कुर्वन्ति ?
- तस्य निर्माणस्य उपायं पृच्छतु ।
- तत् वस्तु निर्माणाय, किं पुरुषाः महिलाः च पृथक् पृथक् प्रकारस्य कार्यं कुर्वन्ति ?
- किं तस्य वस्तुनः निर्माणार्थं बालकाः अपि सहाय्यं कुर्वन्ति ?

पृच्छतु लिखतु च

- केनचित् लौहकारेण तक्षकेन कुम्भकारेण सह वा वार्तां करोतु, तेषां कार्यस्य विषये ज्ञानं करोतु ।

_____

_____

- ते स्वकार्यं कुतः शिक्षितवन्तः?

_____

- ते स्वकार्याय किं किं शिक्षयन्ति ?

  _____

- किं ते स्वकार्यं स्वकुटुम्बे कञ्चित् अन्यम् अपि शिक्षितवन्तः?

  _____

- निम्नलिखितायां तालिकायां केषाञ्चित् कार्याणां सूची प्रदत्ता अस्ति । किं भवान् तान् जनान् जानाति, ये एतानि कार्याणि जानन्ति? तेषां जनानां नामानि लिखतु । तान् पृच्छतु यत् ते एतानि कार्याणि कुतः शिक्षितवन्तः ।

कार्यम्	तेषां नामानि, ये एतत् कार्यं कुर्वन्ति	ते एतत् कार्यं कुतः शिक्षितवन्तः
वस्त्राणां वयनम्	वाण्या प्रसादस्य च मातापितरौ	स्वकुटुम्बात्
भोजनस्य पाचनम्		
द्विचक्रिकायाः सम्यक्करणम्		
वायुयानस्य उड्डयनम्		
सीवनम्		
गायनम्		
उपानहनिर्माणम्		
पतङ्गस्य उड्डयनम्		
कृषिकार्यम्		
केशकर्त्तनम्		

अध्यापकाय - पोचमपल्ली इति उपनगरम् इव भारतस्य केषुचित् क्षेत्रेषु कानिचित् विशिष्टानि वस्तूनि निर्मितानि भवन्ति । तेषां वस्तूनां नामानि तस्य क्षेत्रस्य नाम्ना एव प्रसिद्धानि सन्ति । यथा - कुल्लू इति नगरस्य राङ्कवम्, मधुबनस्य वस्त्रचित्रकला (पेंटिंग), असमराज्यस्य सिल्कः, कश्मीरराज्यस्य सूचिशिल्पम् । अस्मिन् विषये चर्चा कारयितुं शक्यते ।

त्रयोविंशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	हिन्दी
वयनम्	-	बुनना
आस्तरणस्य निर्माणम्	-	कालीन या दरी का निर्माण
क्रीडनकम्	-	खिलौना
तन्तुगुच्छः	-	धागें की लड़ियाँ
स्वच्छम्	-	साफ
पोटलिका	-	गठरी
कौशेयः	-	रेशम
शाटिका	-	साड़ी
कञ्चुकः	-	कुर्ता
सूतीतन्तुः	-	सूती धागा
वस्त्राणां व्यावर्तः	-	कपडों के थान
श्रमिककर्म	-	मज़दूरी
महानगरम्	-	बड़ा शहर
तान्तवचक्रम्	-	चरखे से
लौहकारः	-	लुहार
तक्षकः	-	बढ़ई
कुम्भकारः	-	कुम्हार
सीवनम्	-	सिलाई करना
उपानहनिर्माणम्	-	जूता बनाना
केशकर्त्तनम्	-	बाल काटना
राङ्कवम्	-	शॉल
सिल्कः	-	वस्त्र का प्रकार विशेष

चतुर्विंशः पाठः

दूरदेशस्य वार्ता

अद्य राधायाः गृहे बहु आनन्दः अस्ति । पितृव्यः, तस्य कुटुम्बः च पञ्चवर्षाणाम् अनन्तरं गृहम् आगतवान् । पञ्चवर्षेभ्यः पूर्वं पितृव्यः अरबदेशस्य अबू-धाबी इति नगरे वृत्तिं प्राप्तवान् । ततः अधुना पर्यन्तं, ते तत्र एव निवसन्ति । राधा, तस्य पिता च पितृव्यस्य कुटुम्बस्य स्वागताय वायुयानस्थानके गतवन्तौ ।

वायुयाने आगते सति सर्वेषां यात्रिणां सामग्र्याः अवातारणे पर्याप्तः समयः व्यतीतः । ततः पितृव्यः पितृव्या, तयोः बालकाः च वायुयानस्थानकात् बहिः आगच्छन्तः दृष्टाः । पिता सहसा उक्तवान् - "शान्तिः लता च अधुना दीर्घौ जातौ"। ततः सर्वा सामग्री टैक्सीयाने संस्थाप्य सर्वे राधायाः गृहं प्रति गतवन्तः ।

राधा उक्तवती - शान्ते । भवती एतावत्या दीर्घया यात्रया श्रान्ता भवेत् । पिता माम् उक्तवान् यत् अबूधाबी भारतात् बहु दूरम् अस्ति ।

शान्तिः उक्तवती - नैव भोः । वयं तु किञ्चित् अपि न श्रान्ताः स्म । एतत् सत्यम् अस्ति, यत् अबूधाबी इतः बहुदूरम् अस्ति, किन्तु वायुयानेन वयं ततः द्विहोरायाम् एव अत्र आगतवन्तः । यतः वायुयानं तीव्रगत्या उड्डीयते ।

अध्यापकाय - मलयालमभाषायां चिट्टप्पनः पितृव्यः भवति । कुञ्जम्मा पितृव्या भवति ।

राधा एतत् श्रुत्वा आश्चर्यचकिता अभवत् । सा स्मृतवती यदा सा विद्यालयस्य शैक्षिकयात्रायाः अवसरे चेन्नयीं गतवती, तदा रेलयानेन द्वादशहोरायाः समयः व्यतीतः अभवत् । किन्तु मानचित्रे चेन्नयी कोच्ची च पार्श्वे एव दृश्येते । वायुयानस्थानकात् गृहं यावत् मार्गे राधा शान्तिः लताः च अनेकाः वार्ताः कृतवन्तः । राधा स्मृतवती यत् यदा सा स्वविद्यालयस्य बालकैः सह शैक्षिकयात्रायां गतवती, तदा सः तस्य बहुरोचकः अनुभवः आसीत् । सा शान्त्या अपि सम्पूर्णयात्रायाः वार्ताः ज्ञातुम् इच्छति स्म ।

सिकता एव सिकता

राधा पृष्टवती, किं भवती वायुयानात् किमपि रोचकं दृश्यं दृष्टवती ? शान्तिः उक्तवती - आम् । वायुयानात् प्रायः मेघाः दृष्टाः, यतः वायुयानं मेघेभ्यः बहु उपरि उड्डीयते स्म । इतः पूर्वं किञ्चित् समयं यावत् तु अधः सिकता एव दृष्टिगोचरा अभवत् । किन्तु सिकतायाः वर्णः अपि परिवर्तमानः आसीत् - कदाचित् श्वेतः, कदाचित् पिङ्गलः, कदाचित् पीतः, रक्तः कृष्णः वा । कदाचित् ते सिकतायाः पर्वतान् अपि दृष्टवन्तः । ततः भूमिः दृष्टेः विलुप्ता जाता । लता अग्रे उक्तवती- एते सिकतायाः चयाः अपि कथ्यन्ते ।

राधा उक्तवती- अहं तु केवलं समुद्रस्य तटे एव सिकतां दृष्टवान् ।

पितृव्यः उक्तवान् - तदा तु भवत्या अबूधाबीनगरम् अवश्यम् आगन्तव्यम् ।

पितृव्यः उक्तवान् यत् अबूधाबी तस्य समीपस्थाः च देशाः सिकताक्षेत्राणि एव सन्ति । नगरात् अल्पे एव दूरे गते सति, परितः सिकता एव सिकता दृश्यते । तत्र न कश्चित् वृक्षः अस्ति, न वा हारित्यम्, केवलं सिकता अस्ति ।

पितृव्या उक्तवती – "अहं केरले स्थितम् एतत् गृहं परितः हारित्यं, शीतलं जलं च बहु स्मृतवती, अधुना अत्र आगत्य सुखम् अनुभवामि" ।

पितृव्यः उक्तवान् – "वृष्टिः कीदृशी भवति, एतत् तु शान्तिः लता च विस्मृतवत्यौ एव । तथा एव सिकताप्रदेशे वृष्टिः न भवति । तत्र जलं बहुमूल्यम् अस्ति । तत्र न तु वृष्टिः भवति, न तत्र नद्यः सन्ति, न तत्र कासाराः सन्ति, न च तडागाः सन्ति । भूमेः अन्तः अपि तत्र जलं न अस्ति" ।

लता मध्ये एव उक्तवती किन्तु तत्र सिकताभूमेः अन्तः तैलं भवति, अतः तत्र प्रस्तरतैलं सरलतया प्राप्यते ।

पितृव्यः उक्तवान् - अत्र प्रस्तरतैलस्य मूल्यं जलात् न्यूनम् अस्ति ।

वार्ताः कुर्वन्तः एव सर्वे राधायाः गृहं प्राप्तवन्तः ।

टैक्सीयानात् अवतीर्य लता शान्तिः च परितः बहून् फलयुक्तान् वृक्षान् दृष्ट्वा आश्चर्यचकिते जाते । तत्र बहुविधाः वृक्षाः आसन्। यथा - नारिकेलस्य, कदल्याः, पपीतस्य, पूगीफलस्य, पनसस्य इत्यादीनाम् ।

लता उक्तवती – "अबूधाबीनगरे तु केवलं खर्जूरस्य एव वृक्षाः दृश्यन्ते, यतः सः एव तादृशः वृक्षः अस्ति, यः तत्र रोपयितुं शक्यते ।"

अहो सुन्दराः उपहाराः चित्राणि च

सर्वैः सह मेलनानन्तरं पितृव्या स्वकीयं स्यूतम्, मञ्जूषां च उद्घाटितवती । सा सर्वेभ्यः उपहारान्, स्वादूनि खर्जूरफलानि च आनीतवती । लता राधां अबूधाबीनगरस्य धनपत्राणि नाणकान् च अपि दर्शितवती । शान्तिः उक्तवती यत् तत्र पृथक्प्रकारस्य मुद्रा भवति, सा दिरहम इति उच्यते । तेषु अरबीभाषायां किमपि लिखितं भवति । ते स्वगृहस्य अन्येषां स्थानानाम् अपि च चित्राणि दर्शितवन्तः ।

पितृव्यः राधायै भूगोलकं दत्त्वा उक्तवान्- "राधे अन्वेषणं करोतु, अबूधाबी कुत्र अस्ति, केरलः च कुत्र अस्ति ।" सर्वे बालकाः पृथक् पृथक् स्थानानाम् अन्वेषणेन आनन्दं प्राप्तवन्तः । राधा चेन्नयीं कोच्चीम् अपि च अन्विष्टवती । सायङ्काले सर्वे आलिन्दे उपविश्य शीतलवायोः आनन्दम् अनुभवन्ति स्म । अबूधाबीनगरस्य चित्राणि च पश्यन्ति स्म । चित्रेषु उच्चानि भवनानि तेषु काचस्य दीर्घाणि वातायनानि च आसन् । तान् दृष्ट्वा राधा शीघ्रम् उक्तवती - एतेभ्यः वातायनेभ्यः तु शीतलवायुः आगच्छेत्" ?

पितृव्यः उक्तवान् - "वयम् अबूधाबीनगरे वातायनं न उद्घाटयामः, यतः तत्र उष्णता भवति । प्रायः तत्र जनाः वातानुकूलनयन्त्रस्य प्रयोगं कुर्वन्ति । उष्णतायाः कारणेन एव जनाः अत्र शिथिलानि वस्त्राणि धरन्ति । अत्र जनाः सम्पूर्णं शरीरं शिरः च अपि

आवेष्ट्य एव भ्रमन्ति"। अनेन ते अत्यधिकात् आतपात् सुरक्षिताः भवन्ति।

राधा तेषां चित्राणां दर्शनेन अबूधाबीनगरस्य विषये नव्याः वार्ताः ज्ञातवती, अतः सा आनन्दिता जाता। सा प्रत्येकं चित्रेण सह स्वनगरस्य तुलनाम् अपि करोति स्म। सा निश्चयं कृतवती यत् अबूधाबीनगरस्य विषये एकं लेखं लिखित्वा कक्षायां वाचनं करिष्यति।

चर्चां करोतु लिखतु च

- भवान् अपि अबूधाबीनगरस्य तुलनां स्वनगरेण सह करोतु, तस्मिन् विषये लघुलेखं च लिखतु। भवान् तस्मिन् चित्राणि अपि नियोक्तुं शक्नोति। स्वलेखे एतान् तथ्यान् अवश्यं लिखतु –
  - ♦ जलवायुः ऋतुः च
  - ♦ वृक्षाः वनस्पतयः च
  - ♦ जनानां वेशभूषा
  - ♦ भवनानि
  - ♦ राजमार्गेषु वाहनानि
  - ♦ भाषा
  - ♦ भोजनम्
- सिकताप्रदेशे वृक्षाः अल्पाः किमर्थं भवन्ति ?

  _____
- किं भवतः परिचितः कश्चित् जनः अन्यस्मिन् देशे निवसति ?

  _____

- सः तत्र कतिभ्यः वर्षेभ्यः निवसति ? सः तत्र पठनार्थं गतवान् कार्यार्थं वा ? किं तस्य विदेशगमनस्य किमपि अन्यत् कारणम् आसीत् ?

_____

- **एतानि धनपत्राणि पश्यतु ।**

प्रत्येकं धनपत्रस्य समक्षं मञ्जूषायां तस्य मूल्यं लिखतु ।

- एतानि कस्य देशस्य धनपत्राणि सन्ति ? भवान् कथं ज्ञास्यति ?

_____

- धनपत्रेषु कस्य चित्रम् अस्ति ?

_____

- किं धनपत्रेषु मूल्यम् अतिरिच्य अन्ये अङ्काः अपि लिखिताः सन्ति ?

_____

- किं द्वयोः धनपत्रयोः समानाः एव अङ्काः भवितुम् अर्हन्ति ?

_____

- कञ्चित् दशरूप्यकस्य धनपत्रं पश्यतु । भवान् अस्मिन् लिखिताः कति भाषाः जानाति ?

_____

- कस्मिंश्चित् एकस्मिन् धनपत्रे लिखितं कोषागारस्य नाम लिखतु ।

नाणकानां मेलनं करोतु

- भवान् एतेषु कति नाणकान् जानाति ?

_____

नाणकेषु मूल्यम् अतिरिच्य अन्यत् किं किं लिखितम् अस्ति ?

_____

एतानि धनपत्राणि पश्यतु । किम् एतानि सर्वाणि धनपत्राणि भारतस्य एव सन्ति, यानि धनपत्राणि भारतस्य न सन्ति, तेषु रक्तं वर्तुलं करोतु । ज्ञात्त्वा लिखतु यत् एतानि धनपत्राणि कुत्रत्यानि सन्ति ?

चतुर्विंशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	हिन्दी
पितृव्यः	-	चाचा
वायुयानस्थानकम्	-	हवाई अड्डा
सहसा	-	अचानक
शैक्षिकयात्रा	-	ट्रिप
सिकता	-	रेत
वर्णः	-	रंग
पिङ्गलः	-	भूरा
पर्वतः	-	पहाड़
भूमिः	-	धरती
विलुप्तः	-	विलुप्त
चयाः	-	टीले या समूह
सिकताक्षेत्रम्	-	रेतीला इलाका
हारित्यम्	-	हरियाली
शीतलं जलं	-	ठण्डा पानी
वृष्टिः	-	बारिश
सिकताप्रदेशः	-	रेगिस्तान
कासारः	-	झील
अन्तः	-	अन्दर

पूंगीफलम्	-	सुपारी
पनसः	-	कटहल
स्यूतः	-	बैग या थैला
मञ्जूषा	-	सन्दूक या अटैची
धनपत्रम्	-	नोट
नाणकम्	-	सिक्का
भूगोलकम्	-	ग्लोब
अलिन्दः	-	बरामदा
वातानुकूलनयन्त्रम्	-	एयर कण्डीशनर
शिथिलम्	-	ढीला

पञ्चविंशः पाठः

कौतूहलप्रहेलिकाः

कुट्टिता भवामि, पिष्टा भवामि,
करोमि भोजनं कटुकम् ।
भोजने चेत् अधिका
तर्हि निसृता भवेत् मुखात् सी-सी ।
नेत्रात् घ्राणात् निस्सरेत् जलम्,
कष्टम् अनुभूयात् खादित्त्वा ।
चिन्तय चिन्तय का अस्मि अहम्,
वदतु भोः! का अस्मि अहम् ?

कुट्ट्यते इयं, पिष्यते इयम्,
भोज्ये पीतवर्णम् आनये
सार्षपे सम्मिश्र्य मां वै
व्रणे लेपनात् शान्तिः भवति ।
सर्वेषां पीडां विनश्य
सर्वेषां प्रिया अस्मि अहम् ।
चिन्तय का अस्मि अहम्,
वदतु भोः ! का अस्मि अहम् ?



कृष्णमुक्तिका इव अहम् अस्मि,
लघ्वी गोलाकारयुक्ता अस्मि
पिष्टा वा न्यूनपिष्टा वा
तीक्ष्णः स्वादः मम अस्ति ।
मधुरे वा लवणस्य भोज्ये
उभयोः अहं पतामि
विचारयतु का अस्मि अहम्,
वदतु भोः ! का अस्मि अहम् ?

कृशः अस्मि, लघुः अस्मि
पिङ्गलः च कृष्णः अस्मि
उष्णे घृते, तैले च निपत्य
सुगन्धिं च करोमि वै
दध्नि तथा जलजीरके वा
भृज्जयित्वा पतामि
विचारयतु का अस्मि अहम्,
वदतु भोः! का अस्मि अहम् ?

हरितः अस्मि जीरकवत् च
पाचनशक्तिं वर्धयामि
भोजनानन्तरं खादन्ति माम्
मुखस्य स्वादं वर्धयामि
का अस्मि अहम्,
विचारयतु का अस्मि अहम्,
वदतु भोः! का अस्मि अहम्?



कीलकवत् दृश्ये अहम्
किन्तु अहम् एका कलिका अस्मि
पिङ्गलवर्णस्य अहम् अस्मि
तीव्रसुगन्धिः मम अस्ति
दन्ते पीडा जाते सति
मां स्थाप्यते दन्ते
चिन्तय का अस्मि अहम्,
वदतु भोः! का अस्मि अहम्?

कयोश्चित् द्वयोः उपस्करयोः विषये प्रहेलिकानिर्माणं करोतु, स्वकक्षायां च पृच्छतु । तयोः उपस्करयोः चित्रं निर्माय नामानि अपि लिखतु ।

- ज्ञानं करोतु - भवतः गृहे केषाम् उपस्कराणाम् उपयोगः भवति । तेषां सूचीनिर्माणं करोतु । सहपाठिनां सूचीम् अपि पश्यतु ।

_____ _____

_____ _____

_____ _____

- स्वकीयं पितामहं पितामहीं / मातामहं मातामहीं वा पृच्छतु, यदा ते बालकाः आसन् तदा तेषां पाकशालायां केषां केषाम् उपस्कराणाम् उपयोगः भवति स्म ।

_____ _____ _____

_____ _____ _____

- तस्य उपस्करस्य नाम लिखतु यस्य मधुरे लवणे च उभयोः अपि भोजनयोः प्रयोगः भवति ।

_____

- ज्ञानं करोतु यत् , भोजनम् अम्लीकर्तुं तस्मिन् कस्य कस्य पदार्थस्य मिश्रणं क्रियते?

_____

मम नाम कुट्टनः अस्ति । अहं केरले निवसामि । मम गृहस्य अङ्गणे उपस्कराणाम् उद्यानम् अस्ति । तत्र अहं तेजपत्रीं सूक्ष्मैलां, वृहदैलां, कृष्णमरीचम् इत्यादिकान् उपस्कारान् अङ्कुरयतः पश्यामि ।

- जानातु, किं भवतः क्षेत्रे कस्यचित् उपस्करस्य पादपाः सन्ति ? तेषां नामानि लिखतु ।

_____ _____ _____

- कक्षायां काश्चित् अक्षतान् आनयतु । एकत्रितानाम् उपस्कराणां नामानि तालिकायां लिखतु । स्वनेत्रे निमील्य स्पृष्ट्वा घ्रात्वा वा सर्वेषाम् उपस्कराणां अवगमनाय प्रयत्नं करोतु । येषां ज्ञानकरणे भवान् शक्तः जातः, तेषां समक्षं (✓) चिह्नं करोतु । येषां ज्ञानं न भवति तेषां समक्षं (×) चिह्नं करोतु ।

क्र.सं.	उपस्करस्य नाम	घ्रात्वा	स्पृष्ट्वा
1			
2			
3			
4			
5			

आगच्छतु आलुकस्य स्वादिष्टव्यञ्जनस्य निर्माणं कुर्मः ।

- एतदर्थं वाञ्छितम् अस्ति –
  - ❑ उत्क्वाथिताः आलुकाः - कक्षायाः सर्वेभ्यः बालकेभ्यः पर्याप्ताः स्युः ।
  - ❑ लवणम्, रक्ता मरीचिका, आम्रचूर्णं निम्बुकं वा - आस्वादानुसारम् ।

अध्यापकाय - अनेकेषाम् उपस्करणानां मिश्रितं चूर्णम् उष्णोपस्करः इति कथ्यते । यथा- जीरकम्, एला, (दीर्घा लघ्वी च), लवङ्गं, गन्धवल्कम्, गन्धजातम् इत्यादीनाम् ।

❑ यदि लभ्येत, तर्हि भृज्जितं जीरकम्, कृष्णं लवणम्, मिश्रितोपस्कराः, हरितधान्यकस्य पत्राणि ।

आलुकानि तनूकृत्वा, तेषां लघुं भागं करोतु । इत्येतेषु स्वादानुसारं लवणं रक्तमरीचिकाम्, आम्रचूर्णं निम्बुकं वा मिश्रयतु । व्यञ्जनस्य स्वादं वर्धनाय, अस्मिन् किञ्चित् भृज्जितं जीरकम्, कृष्णलवणम्, मिश्रितोपस्करान् च मिश्रयतु । आलुकानि सम्यक्तया कम्पयतु । अस्मिन् हरितधान्यस्य पत्राणि अपि मिश्रयतु । स्वादिष्टव्यञ्जनं भक्षणाय सज्जितम् अस्ति ।

- कथम् अस्ति एतत् व्यञ्जनम् ? स्वादिष्टं वा ?
- विचारयतु, यदि व्यञ्जने उपस्कराः न स्युः तर्हि अस्य आस्वादः कथं भवेत् ?
- कस्यचित् अन्यस्य व्यञ्जनस्य निर्माणम् अपि शिक्षयतु । कक्षायां मित्रैः सह प्रेम्णा विभज्य खादतु ।
- अल्पानाम् उपस्कराणां व्यञ्जनस्य भक्षणे, तीक्ष्णानाम् उपस्कराणां व्यञ्जनस्य भक्षणे च जिह्वा कथम् अनुभवति ?

पञ्चविंशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	हिन्दी
कटुः	-	तीखा
पीतकम्	-	पीला रंग
पिङ्गलः	-	भूरा
जलजीरकः	-	जलजीरा
हरितः	-	हरा
उपस्करः	-	मसाला
उद्यानम्	-	बगीचा
तेजपत्री	-	तेजपत्ता
सूक्ष्मैला	-	छोटी इलायची
बृहदैला	-	बडी इलायची
कृष्णमरीचम्	-	काली मिर्च
अक्षतः	-	साबुत
निमीलनम्	-	बन्द करना
स्वादिष्टव्यञ्जनम्	-	स्वादिष्ट चाट
जीरकम्	-	जीरा
कृष्णं लवणम्	-	काला नमक
मिश्रितोपस्करः	-	मिला हुआ गरम मसाला
व्यञ्जनम्	-	चाट
जिह्वा	-	जीभ

किं भवान् कुत्रचित् एतस्याः चित्रं दृष्टवान् ? इयं लेफ्टीनेन्टकमाण्डरवहीदाप्रिज़्म अस्ति । इयं भारतीय-जलसेनायां चिकित्सिका अस्ति । इयं जलयाने कार्यकर्त्रीषु कासुचित् महिलासु एका अस्ति । इयं प्रथमा महिला अस्ति या सम्पूर्णस्य पथसञ्चलनस्य नेतृत्त्वं कृतवती । कस्याश्चित् अपि सेनायाम् अयं विषयः असामान्यः भवति ।

भवतः पुस्तकाय वयं तया सह विशिष्टां वार्तां कृतवन्तः । आगच्छतु तां वार्तां पठामः ।

प्रश्नः - वहीदे! भवती स्वबाल्यकालस्य विद्यालयस्य विषये च वदतु ।

वहीदा - मम जन्म थन्नामण्डी इति ग्रामे अभवत् । अयं ग्रामः जम्मू-कश्मीरस्य राजौरी इति जनपदे अस्ति । अहं सर्वकारीयविद्यालये पठितवती । मम ग्रामस्य बह्व्यः बालिकाः अस्मिन् विद्यालये पठितुम् आगच्छन्ति स्म, किन्तु ताः स्वभविष्यस्य विषये न विचारयन्ति स्म ।

अध्यापकाय - बालकान् मानचित्रे जम्मू-कश्मीरराज्ययोः अन्वेषणाय प्रेरयेत् ।

किन्तु मम मनसि अग्रे वर्धनाय उत्साहः आसीत् । अतः अहं दशमकक्षायाः शिक्षां प्राप्तुम् इच्छामि स्म । तस्मिन् समये अस्माकं क्षेत्रे अयम् अतीव नवीनः विषयः आसीत् । अतः पितृभ्यां बहव्यः समस्याः सम्मुखी करणीयाः अभवन् । न केवलं तावत् एव अपि तु ग्रामः अपि अस्माभिः त्यक्तव्यः अभवत् । तदा वयं मातामह्याः गृहे राजौरीजनपदे निवासं कृतवन्तः । अहं द्वादशकक्षाम् अपि ततः एव उत्तीर्णवती ।

प्रश्नः - भवत्याः आरम्भतः एव पृथक् चिन्तनम् आसीत् ?

वहीदा - यदा अहं बालिका आसम्, तस्मात् कालात् एव किञ्चित् पृथक् कार्यं कर्तुं मम इच्छा आसीत् । मम द्विचक्रवाहनस्य चालने रुचिः आसीत् । वयं तिस्रः भगिन्यः स्मः । पितुः अपि इच्छा आसीत् यत् एका पुत्री चिकित्सिका भवेत्, अपरा अधिवक्त्री पुलिसविभागे वा भवेत्, अन्या शिक्षिका भवेत् । अहं भारतीय-जलसेनायां चिकित्सिका अस्मि, मम भगिनी जम्मूनगरे पुलिसविभागे अस्ति ।

प्रश्नः - भवती चिकित्सिका कथं सञ्जाता?

वहीदा - एतदर्थम् अहं बहु श्रमं कृतवती । मम मित्राणि, कुटुम्बः च अपि मम सहायतां कृतवन्तः । अहं जम्मू-चिकित्सा-महाविद्यालये प्रवेशं प्राप्तवती । तत्र अहं पञ्चवर्षं यावत् शिक्षां प्राप्य एम.बी.बी.एस इति परीक्षाम् उत्तीर्णवती ।

प्रश्नः - भवती सेनायां कथं प्रविष्टवती ? भवत्याः कुटुम्बः निषेधं न कृतवान् किम् ?

वहीदा - नैव । मम कुटुम्बस्य जनानां तु विचारः आसीत् यत् इयं वृत्तिः एव मह्यं समुचिता अस्ति । यदा अहं बालिका आसम्, तदा स्वग्रामे सैनिकान् पश्यामि स्म । मम अपि इच्छा आसीत् यत् अहम् अपि तथा एव भवेयम् । अयं मम महान् स्वप्नः आसीत् । विद्यालयस्य समये अहं शिविरेषु गच्छामि स्म, पर्वतेषु आरोहामि स्म, बालिकानिर्देशिका अपि आसम् । यदा अहं चिकित्सिका अभवम्, तत्पश्चात् सेनायां प्रवेशाय अहं साक्षात्कारं दत्तवती ।

अध्यापकाय - बालकेभ्यः भारतस्य त्रिविधानां सेनानां विषये बोधयितुं शक्यते । एतदर्थं सेनाकुटुम्बेभ्यः आगन्तॄणां बालानां साहाय्यं स्वीकर्तुं शक्यते ।

तत्र अहं चिता । ततः मम षाण्मासिकं प्रशिक्षणम् अभवत् ।

प्रश्नः - एवम् । भवती जलसेनायां किमर्थं प्रविष्टवती ? जलसेनायां तु जलयाने एव स्थातव्यं भवति खलु ?

वहीदा - मम भ्रमणे रुचिः अस्ति । मम दूरेषु स्थानेषु गमनस्य इच्छा अस्ति । मम जन्म पर्वतीयक्षेत्रे अभवत् । अधुना अहं समुद्रे कार्यं करोमि । सर्वं रोचकम् अनुभवामि ।

अल्पाः एव महिलाः अधिकारिण्यः जलयाने कार्यं कृतवत्यः । तासु अहम् अपि एका अस्मि । पूर्वं जलसेनायां महिलाः न गच्छन्ति स्म । किन्तु यदा अवसरः प्राप्तः, तदा अहं स्वयम् अग्रे आगत्य स्वनाम दत्तवती । अहं तु अन्तर्जलयाने अपि कार्यं कर्तुम् इच्छामि । यत् यत् कार्यं जनाः विचारयन्ति यत् एतत् कार्यं महिलाः न कर्तुं शक्नुवन्ति, अहं प्रत्येकं तत् तत् कार्यं कर्तुम् इच्छामि । अधुना तु महिलाभ्यः अन्तर्जलयाने गमनाय अवसरः न दीयते, यदि अवसरः प्रदीयते तदा अहम् अवश्यं गमिष्यामि ।

प्रश्नः - भवत्याः चिकित्सा-शिक्षायाः कः उपयोगः अस्ति ?

वहीदा - अहं भारतीय-जलसेनायां चिकित्सिका अस्मि। जलसेनायां ये चिकित्सकाः भवन्ति, ते न केवलं रोगीभ्यः औषधम् ददति, अपितु ते चिकित्सकाधिकारिणः भवन्ति । जलयानं त्रयाणां चतुर्णां वा मासानां कृते समुद्रं गच्छति । तदा मम दायित्वं भवति यत् सर्वेषां स्वास्थ्यं सुस्थिरं भवेत् । अहं जलयाने उपस्थितानां सर्वेषाम् अधिकारिणां नाविकानां च स्वास्थ्यस्य निरीक्षणं करोमि ।

अध्यापकाय - अस्य संवादस्य माध्यमेन बालकान् प्रेरयेत् यत् ते अपि उन्नतं लक्ष्यं प्राप्तुं स्वप्नान् पश्येयुः तदर्थं च परिश्रमं कुर्युः ।

एतत् अतिरिच्य जलयानस्य स्वच्छता भवेत्, कुत्रचित् अपि मलिनता न भवेत्, तत्र मूषकाः च न आगच्छेयुः – इति एतानि अपि मम दायित्वानि सन्ति । यतः मलिनतया मूषकैः च रोगाः उत्पन्नाः भवन्ति । एतत् अतिरिच्य अहं सर्वान् आपातकालीन-चिकित्सायाः विषये अपि सज्जयामि । यदि काचित् दुर्घटना भवेत्, यथा - अग्निदाहः, तदा जलयाने आपातकालीन-चिकित्सायै सज्जितेन भवितव्यम् ।

प्रश्नः - किं जलयाने चिकित्सालयः भवति ?

वहीदा - जलसेनायाः प्रत्येकं जलयाने प्राथमिकी चिकित्सा क्रियते । जलयाने एकः चिकित्सकः द्वित्राः सहायकाः च भवन्ति । आवश्यकाः औषधयः कानिचित् उपकरणानि अपि च भवन्ति । एतत् सर्वं कस्मिंश्चित् लघुप्रकोष्ठे स्थापितं भवति ।

प्रश्नः - यदा भवती पथसञ्चलनस्य नेतृत्वं कृतवती, तदा भवती अस्य कार्यस्य प्रथमा महिला जाता । एतदर्थं भवत्या बहु श्रमः कृतः स्यात् ?

वहीदा - त्रिवर्षं यावत् मम पथसञ्चलनस्य निरीक्षणानन्तरं, मम अधिकारिणः मह्यम् इमम् अवसरं दत्तवन्तः । अहम् अनुभूतवती यत् मम अधिकारिणः मां चितवन्तः, मयि विश्वासं दर्शितवन्तः। अत एव अहं बहुश्रमेण पथसञ्चलनस्य अभ्यासं कृतवती ।

प्रश्नः - पथसञ्चलनस्य विषये किञ्चित् वदतु ।

वहीदा - यदा पथसञ्चलनं भवति, तदा पृष्ठे चत्वारः भागाः चलन्ति । सम्पूर्णे पथसञ्चलने षट्त्रिंशत् निर्देशाः दातव्याः भवन्ति । निर्देशाः एतावता उच्चस्वरेण दातव्याः भवन्ति यत् सर्वतः पृष्ठे यः चतुर्थः भागः, तस्य जनाः अपि तान् निर्देशान् श्रोतुं शक्ताः भवेयुः । ये च क्षेत्रस्य द्वितीयभागे उपविशन्ति, ते दर्शकाः अपि तान् निर्देशान् श्रोतुं शक्ताः भवेयुः ।

अध्यापकाय - अस्य पाठस्य पाठनावसरे अन्येषां व्यवसायानां चर्चा अपि कारयितुं शक्यते ।

प्रश्नः - भवती पथसञ्चलनस्य चतुर्णां भागानां अग्रे चलन्ती कदाचित् भयं न अनुभूतवती ?

वहीदा - भयं तु न आसीत्, किन्तु षट्त्रिंशत् वारं निर्देशाः दातव्याः भवन्ति । यदि एकवारम् अपि विस्मृतं भवेत्, तदा सम्पूर्णं पथसञ्चलनम् अस्तव्यस्तं भवति । अहम् एकमासं यावत् प्रातःकाले सायङ्काले च अभ्यासं कृतवती । अहं पथसञ्चलनं तु विद्यालये अपि करोमि स्म ।

प्रश्नः - भवत्याः नामनि यत् अयं प्रिज़्म इति शब्दः अस्ति, अस्य कः अर्थः अस्ति ?

वहीदा - मम पिता एतत् नामकरणं कृतवान् । प्रिज़्म तत् काचं भवति यत् सप्त रङ्गान् दर्शयति । पिता इच्छति स्म यत् मम पुत्री अपि तथा एव भवेत् । अतः मम पिता बाल्यकालात् एव मह्यम् एतत् नाम दत्तवान् ।

- किं भवान् कम् अपि जानाति यः सेनायां नियुक्तः अस्ति ? सः कस्यां सेनायाम् अस्ति – जलसेनायां, स्थलसेनायां वायुसेनायां वा ।

  _____

- सः तत्र किं कार्यं करोति ?

  _____

- किं भवान् सेनायां प्रवेष्टुम् इच्छति ?

  _____

- कस्यां सेनायां प्रवेष्टुम् इच्छति - स्थलसेनायां, वायुसेनायां, जलसेनायां वा ?

  _____

अध्यापकाय – अस्मिन् विषये बलं दातुं शक्यते, यत् अधुना महिलाः अपि अधिकतया तिसृषु सेनासु, पुलिसविभागे च प्रविशन्त्यः सन्ति । बालकान् कक्षायां प्रिज़्म इति दर्शयेत् ।

- सेना इव कासु कासु वृत्तिषु जनाः विशिष्टं परिधानं धरन्ति ?

_____

- वहीदा जलसेनायां चिकित्सिका अस्ति । भवान् जलसेनायाः कानिचित् अन्यानि पञ्च कार्याणि वदतु ?

_____

_____

- किं भवान् कदाचित् पथसञ्चलनं दृष्टवान् ? स्वविद्यालये पथसञ्चलनं करोतु षट्त्रिंशत् वारं च निर्देशान् ददातु । यथा - "दक्षिणं पश्यन्तु", "सावधानाः भवेयुः", "पृथक् पृथक् चलतु" "समीपं पङ्क्तौ चलतु" । किं भवान् एतेषु पथसञ्चलनस्य कांश्चित् अन्यान् अपि निर्देशान् योक्तुं शक्तः अस्ति ?

_____ _____ _____

- केनचित् चिकित्सकेन सह वार्तां करोतु । तस्य कार्यस्य विषये ज्ञानं करोतु ।

_____

- किं भवान् काञ्चित् महिलां जानाति, या विशिष्टं कार्यं कृतवती? तया सह तथा एव वार्तां करोतु यथा वयं वहीदया सह कृतवन्तः । विचारयतु, कान् प्रश्नान् प्रक्ष्यति। तां पृच्छतु यत् सा तत् कार्यं किमर्थं चितवती, सा तस्मिन् कार्ये काः काः दुष्करताः अनुभूतवती ।

षड्विंशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	हिन्दी
दुष्करः	-	कठिनता
रुचिः	-	शौक
वृत्तिः	-	नौकरी
साक्षात्कारः	-	इण्टरव्यू
प्रशिक्षणम्	-	ट्रेनिंग
पर्वतीयक्षेत्रम्	-	पहाड़ी इलाका
अन्तर्जलयानम्	-	पनडुब्बी
चिकित्सकाधिकारी	-	मेडिकल अधिकारी
स्वास्थ्यम्	-	तबीयत
दायित्वम्	-	जिम्मेदारी
सुस्थिरम्	-	ठीक
मलिनता	-	गंदगी
मूषकः	-	चूहा
पथसञ्चलनम्	-	परेड़
अस्तव्यस्तम्	-	गड़बड़ाना
षट्त्रिंशत्	-	छत्तीस
दक्षिणः	-	दांया

सप्तविंशः पाठः

प्रयत्नः सफलः अभवत्

रमायाः स्वप्नः

एतत् दिनं रमायै विशिष्टं दिनम् अस्ति । प्रसन्नताकारणेन सा रात्रौ निद्राम् अपि न प्राप्तवती । जानाति किमर्थम् ? रमा अद्य दशवर्षीया अभवत्, किन्तु अद्य सा प्रथमवारं विद्यालयं गमिष्यति । रमा बहूभ्यः वर्षेभ्यः अस्य दिनस्य प्रतीक्षां करोति स्म ।

विद्यालयः रमायाः गृहात् अधिकं दूरं न अस्ति । तत्र प्राप्तुं केवलं दीर्घेण राजमार्गेण भूत्वा, कासारस्य तटे यः मार्गः, तत्र चलन् भवतु । पोपलर-वृक्षस्य समीपात् कासारम् अतिक्रामतु । ततः किञ्चित् आरोहणस्य मार्गः अस्ति, ततः विद्यालयः प्राप्यते । लद्दाखस्य स्किटपो पुल इति ग्रामस्य सर्वे बालकाः एवम् एव विद्यालयं गच्छन्ति, रमां विहाय ।



रमायाः लद्दाखस्य च कानिचित् चित्राणि

- भवान् विद्यालयं कथं गच्छति ?
- जानातु, लद्दाखः कुत्र अस्ति । तत् कीदृशं क्षेत्रम् अस्ति ?

पूर्वं तु रमा अपि न जानाति स्म यत् सा अन्येभ्यः बालकेभ्यः कथं भिन्ना अस्ति । शनैः शनैः सा अनुभूतवती यत् सा अन्येषां बालकानाम् इव सर्वाणि कार्याणि कर्तुं न शक्नोति । अस्य कारणे तस्य पादौ आस्ताम् । तस्याः जन्मनः समयात् एव तस्याः पादौ विकृतौ आस्ताम् ।

रमायाः आसन्दिका

रमा पूर्णे दिवसे वातायनस्य पार्श्वे उपविश्य चित्रं निर्माति स्म । तस्याः माता वदति स्म यत् रमा बहु शोभनं चित्रं निर्माति । तेन रमा प्रसन्ना भवति स्म । कस्मिंश्चित् दिने तस्याः पिता तस्यै चक्रासन्दिकां क्रीत्वा आनीतवान् । रमा शीघ्रम् एव चक्रासन्दिकायाम् उपविश्य तया अग्रे गमनं, पृष्ठे गमनं च शिक्षितवती । अनेन रमा प्रसन्ना जाता । अधुना पिता ताम् उत्थाप्य कुत्रचित् न नाययति, अपितु यदा अपि तस्य चलनस्य इच्छा भवति स्म, सा मातरं वदति स्म यत् माम् आसन्दिकायाम् उपवेशयतु । ततः सा स्वयम् एव आसन्दिकायाः चक्रे चालयित्वा बहिः अङ्गणे आगच्छति स्म ।

रमा प्रतिदिनं बालकान् पश्यति स्म । बालकाः हसन्तः खेलन्तः प्रसन्नतापूर्वकं विद्यालयं गच्छन्ति स्म । तस्याः अपि इच्छा भवति स्म यत् सा अपि तेषु बालकेषु सम्मिलिता भूत्वा विद्यालयं गच्छेत् ।

कस्मिंश्चित् दिने अब्दुलः तस्य गृहे कस्यचित् पत्रं दातुम् आगतवान् । सः पृष्टवान् - रमे! भवती विद्यालयं किमर्थं न गच्छति ? रमा उदासेन मनसा उक्तवती - पिता मां प्रतिदिनम् उत्थाप्य विद्यालयं प्रापयितुं न शक्नोति । अहं स्वयम् अपि चक्रासन्दिकां चालयित्वा गन्तुं न शक्ता अस्मि, यतः विद्यालयस्य मार्गः समतलः न अस्ति, नतोन्नतः अस्ति । अहं नदीम् अपि कथं पारं कर्तुं शक्ता अस्मि ।

अब्दुलः पृष्टवान् - "किं भवती विद्यालयं गन्तुम् इच्छति ?" रमा प्रसन्नतया उक्तवती - "अवश्यम् । अवश्यम् । अहम् अपि भवताम् इव विद्यालयं गन्तुम् इच्छामि, पठितुम् इच्छामि, क्रीडितुम् इच्छामि..."

किन्तु रमायाः पितामहः तस्याः वार्तां मध्ये एव अवरुद्धवान् - "रमे ! स्वप्नानि न पश्यतु । भवती जानाति यत् एतत् शक्यं न अस्ति ।"

- भवते विद्यालये किं किं कार्यं रोचते ?
- किं भवते विद्यालये गमनं रोचते ?
- यदि भवान् केनचित् कारणेन कदाचित् विद्यालयं गन्तुं न शक्नोति, तदा भवान् कथम् अनुभवति ?

एकः उपायः

अब्दुलः रमायाः गृहात् गतवान्, किन्तु सः तस्याः विषये एव चिन्तनं करोति स्म । सः रमां विद्यालयं प्रेषयितुम् कञ्चित् विशेषम् उपायं विचारितवान् । सः तम् उपायं स्वविद्यालयस्य प्रधानाचार्यम् उक्तवान् । सः सर्वान् अध्यापकान् अपि रमायाः विषये निवेदितवान् । अध्यापकाः अपि तस्य निवेदनं स्वीकृतवन्तः । ते सर्वे मिलित्वा उपायं कृतवन्तः, येन रमा अपि चक्रासन्दिकां चालयितुं शक्ता भवेत् ।

तदर्थं नतोन्नतः मार्गः, समतलः कर्तव्यः आसीत् । बालकानां एकः समूहः रमायाः गृहस्य समक्षं नतोन्नतं मार्गं समतलकरणे लग्नः जातः । अपरः समूहः नद्याः समीपं मार्गं समतलं कृतवान् । किन्तु एका अन्या समस्या आसीत् यत् रमा नदीं कथं पारं करिष्यति ? एतदर्थं बालकाः अध्यापकानां साहाय्यं स्वीकृतवन्तः । ते काष्ठानां माध्यमेन नद्याः उपरि लघुसेतोः निर्माणं कृतवन्तः । बालकाः प्रसन्नतापूर्वकम् एतत् कार्यं कृतवन्तः । यतः ते इच्छन्ति स्म यत् रमा शीघ्रम् एव विद्यालयम् आगच्छेत् ।

रमायाः मातापितरौ अपि सर्वेभ्यः उष्णं चायं, पिष्टकान् च दत्तवन्तौ । पार्श्वे एव उपविष्टस्य पितामहस्य नेत्रयोः प्रसन्नतायाः अश्रूणि आसन् । एतत् कार्यं दृष्ट्वा पितामहः दुःखी न आसीत्, अपितु प्रसन्नः आसीत् ।

सायङ्कालं यावत् सर्वं कार्यं समाप्तम् अभवत् । सर्वे बालकाः प्रसन्नाः आसन् । किन्तु रमा सर्वाधिका प्रसन्ना आसीत् । तस्याः स्वप्नः पूर्णतां प्रति गच्छति स्म ।

अधुना तत् एव दिनम् अस्ति । रमा शीघ्रतया विद्यालयं गन्तुं सज्जिता भवति । सा अधुना अधिकां प्रतीक्षां कर्तुं न शक्नोति ।

वदतु

- रमा कस्य कस्य सहयोगेन विद्यालयं गन्तुं शक्ता अभवत् ?
- यदि भवान् अब्दुलस्य स्थाने भवेत्, तदा किं कुर्यात् ?
- रमा विद्यालयं तु गतवती, किन्तु विद्यालये तस्यै कानि कानि कष्टानि भवितुं शक्यन्ते ? यदि भवान् रमायाः मित्रम् अस्ति, तदा तस्याः कथं सहायतां कुर्यात् ?
- किं भवतः विद्यालये चक्रासन्दिकायाः कृते मार्गः निर्मितः अस्ति ?
- किं भवतः गृहस्य समीपे कश्चित् तादृशः बालकः निवसति, यस्य विद्यालयं गन्तुं काचित् बाधा अस्ति ? किं भवान् तस्य बालकस्य काञ्चित् सहायतां कर्तुम् इच्छति ? कथम् ?
- स्वगृहस्य समीपे स्थितानि भवनानि पश्यतु । किं तेषु चक्रासन्दिकां चालयितुं मार्गः अस्ति ?

आगच्छतु, निर्माणं कुर्मः

- उत्तरपुस्तिकायां विकलाङ्गमार्गस्य चक्रासन्दिकायाः च चित्रं निर्मातु ।
- भवान् अपि सेतुं निर्मातु । एतदर्थं सामग्री भवान् समीपे एव प्राप्तुं शक्नोति । यथा - कूलप्याः दण्डाः, प्लास्टिकचमषाः, लघवः दण्डाः, रज्जुः इत्यादयः । स्वकीयानि सर्वाणि मित्राणि अपि सेतुनिर्माणाय वदतु ।
- अधुना समूहेन सह मिलित्वा काञ्चित् प्रतिकृतिं निर्मातु । प्रतिकृतौ क्षेत्राणि, नदीः, पर्वतान्, राजमार्गं रेलयानस्य मार्गं च निर्मातु । एतदर्थं भवान् मृत्तिकां, सिकतां, पाषाणखण्डानि, काष्ठखण्डानि च उपयोक्तुं शक्नोति । अस्यां प्रतिकृतौ पृथक् पृथक् स्थानेषु सेतून् स्थापयतु ।

रमा तस्य गृहं च



रमां विद्यालयं प्रापयतु ।

सप्तविंशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

संस्कृतम्	-	हिन्दी
कासारः	-	झील
आरोहणस्य मार्गः	-	चढ़ाई का रास्ता
वातायनम्	-	खिड़की
चक्रासन्दिका	-	पहिया वाली कुर्सी
बहिः	-	बाहर
पत्रम्	-	चिट्ठी को
समतलः	-	समान तल वाला
नतोन्नतः	-	ऊबड़-खाबड़, ऊँचा-नीचा
पितामहः	-	दादा
प्रसन्नता	-	खुश रहना
अश्रूणि	-	आँसू
स्वप्नः	-	सपना
बाधा	-	रुकावट
विकलाङ्गमार्गः	-	अपाहिजों के लिए मार्ग
सामग्री	-	सामान
कूलप्याः दण्डाः	-	आइसक्रीम की डण्डियाँ
प्रतिकृतिः	-	मॉडल / प्रारूप

भारतसर्वकारस्य प्रतिलिप्याधिकारः २००६

१. आन्तरिक-विवरणान् सत्यदर्शनस्य दायित्वं प्रकाशकस्य अस्ति ।

२. समुद्रे भारतस्य जलप्रदेशः उपयुक्त-आधार-रेखया मापितं द्वादशमीलस्य दूरपर्यन्तम् अस्ति ।

३. चण्डीगढ-पंजाब-हरियाणायाः प्रशासी-मुख्यालयः चंडीगढे अस्ति ।

४. अस्मिन् मानचित्रे दर्शितस्य अरुणाचलप्रदेश-असम-मेघालयस्य मध्ये दर्शितम् अन्ताराज्यीयसीमाः उत्तरी-पूर्वि-क्षेत्रस्य निर्वाचनानुसारं दर्शितम् अस्ति, किन्तु अधुना परीक्षणं भवितव्यम् अस्ति ।

५. भारतस्य बाह्यसीमाः तथा च समुद्र-तटीय-रेखाः भारतीय सर्वेक्षणविभागद्वारा सत्यापित-अभिलेख-प्रधानेन सह सदृशम् अस्ति ।

६. अस्मिन् मानचित्रे उत्तराञ्चलः तथा च उत्तर-प्रदेशः, झारखण्डः तथा च विहारः, छत्तीसगढ एवं मध्यप्रदेशः, एतेषां मध्यस्थाः राज्यसीमासम्बद्धाः सर्वकारद्वारा परीक्षणं कृतं नास्ति ।

७. अस्मिन् मानचित्रे दर्शितानां नाम्नाम् अक्षरविन्यासः विभिन्न-सूत्रद्वारा स्वीकृतः अस्ति ।

428

राष्ट्रियशैक्षिक-अनुसन्धानम् एवं च प्रशिक्षणपरिषद्

NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING

ISBN 81-7450-692-6